मनु :- फें फट फां श्रीं महामन्थानभैरव श्री पा — मः १ + डमरुभास्वर-भैरवश्री पा + मः । ८ ॥

Colophon :

46

Sl. No. 47944 अष्टभैरव्युद्धारः Ms. No. C. 2111-9

Beginning :

ज्ञानार्णवे भैरव्युद्धारः—

सूर्यस्वरं समुच्चार्य बिन्दुनादकलात्मकम् ।
स्वरान्तःपृथिवीसंस्थं तुर्यस्वरसमन्वितम् ॥

बिन्दुनादकलाक्रान्तं सर्गवान् भृगुरव्ययः ।
शक्रस्वरसमोपेता विधेयेऽन्यक्षरी मता ॥

End :

तारं च भुवनेशानि श्रीबीजं कामराजकम् ।
हृदन्ते भगवत्यर्णात् माहेश्वरिपदं लिखेत् ॥

अन्नपूर्णाग्निजाया च विधेयं विंशदक्षरी ।
ओं ह्रीं .... विन्नपूर्णस्वाहा ॥

Colophon :

इति अष्टभैरव्युद्धारः ।

47

Sl. No. 47947 **अष्टाक्षरकल्पः** **Ms. No. P. 4396–28**

Beginning:

अथ अष्टाक्षरकल्पः उच्यते—

हिरण्यगर्भं संवृतं सर्ववेदनिधिं शुभम् ।
प्रणम्य नारदं प्रोच्य देवर्षिमृषिसत्तमाः ॥

अनुगृह्णीष्व भगवन् सर्वशास्त्रविशारद ।
अष्टाक्षरविधिं सर्वमस्माकं वद सुव्रत ॥

End :

आसीनो वा शयानो वा तिष्ठन् वा यत्र कुत्रचित् ।
नमो नारायणयेति मन्त्रैकशरणा वयम् ॥

य इमां धारयिष्यति देवर्षिर्नारदोदिताम् ।
अष्टाक्षर ब्रह्मविद्यां यान्ति ते वैष्णवं पदम् ॥

Colophon :

इत्यष्टाक्षरब्रह्मविद्यायां देवर्षिनारदप्रणीतायां चतुर्थोऽध्याय:
इत्यष्टाक्षरकल्प: समाप्त:

48

Sl. No. 47951 **अष्टाक्षरपञ्चाक्षरमन्त्रलक्षणम्** **Ms. No. P. 2613-37**

Beginning :

अथ पुन: शिवपञ्चाक्षरीलक्षणमुच्यते ॥
नकारादिपञ्चावमन्त्राणां गौतमोऽत्रिर्वि-
श्वामित्राङ्गिरोर्विशिष्ठा ऋषय: । ....
.... अथ पुनरपि वक्ष्ये मन्त्रमष्टाक्षराख्यं
सकलदुरितगाढ श्रेणिसंहारभानुम् ।
प्रणवहृदयनाशं वर्णतोऽन्तेयणार्णे, ?
अपरिमितसमुद्दिष्टोयमिष्टार्थदाय ॥

End :

काचिन्निरीक्ष्य निशिनीलसरोरुहाक्षी
सेन्दीवरं समधुराहतवर्धमानम् ।
प्रोवाच परय दयितं तवपर्ययेन
चन्द्रं महीतलगतं भ्रमरा: पिबन्ति ॥

Colophon :

इत्यष्टाक्षरपञ्चाक्षरमन्त्रयोः लक्षणं समाप्तम् ॥

49

Sl. No. 47952 अष्टाक्षरब्रह्मविद्या **Ms. No. B. 172**

Beginning :

हिरण्यगर्भसम्भूतं सर्ववेदनिधिं शुभम् ।
प्रणम्य नारदं प्रोचुः देवर्षिं मुनिसत्तमाः ॥
अनुगृह्णीष्व भगवन् सर्वशास्त्रविशारद !
अष्टाक्षरविधिं सम्यक् अस्माकं वद सुव्रत ॥

End :

आसीना वा शयाना वा तिष्ठन्तोयत्रकुत्रचित् ।
नमो नारायणैति मन्त्रैकशरणावयम् ॥
य इमां धारयिष्यन्ते देवर्षेर्नारदोदिताम् ।
अष्टाक्षरब्रह्मविद्यां ते यान्ति परमां गतिम् ॥

Colophon :

इत्यष्टाक्षरब्रह्मविद्यायां नारदप्रणीतायां चतुर्थोऽध्यायः समाप्तः ॥

50

Sl. No. 47957 अष्टाक्षरमन्त्रजपविधिः **Ms. No. P. 9493–2**

Beginning :

अस्मद्देशिकमस्मदीयपरमाचार्यानशेषान्

गुरून् श्रीमल्लक्ष्मणयोगिपुङ्गवमहापूर्णं मुनिं यामुनम् ।
रामेपद्माविलोचनं मुनिवरं नाथं शठनेषिणं
सेनेशांश्रियमिन्दिरासहचरंनारायणं संश्रये ॥

....मूलमन्त्रप्राणायामं कृत्वा अस्य श्रीमदष्टासरमहामन्त्रस्य अन्तर्यामिनारायणऋषिः ।

End :

ओं भूर्भुवस्सुवरोमिति दिग्बन्धः । ओं बलायकवचाय हुम् इति देहावकुण्ठनं कुर्यात । ततः इदं गुरुभ्यः इत्यादिकारिकादर्पणोक्तसङ्ग्रहक्रमेणनिगमान्तदेशिकोक्त होममन्त्रमनुचिन्मयन् यथाशक्तिमूलमन्त्रं जपेत् ॥

Colophon :

हरिः ओम्

51

Sl. No. 47964 अष्टादशयोगपीठाः **Ms. No. P. 5788–20**

Beginning :

लङ्कायां शाङ्करीदेवी कामाक्षी काञ्चिपट्टणे ।
इक्षुदेशेऽङ्गुष्ठादेवी चामुण्डा क्रौञ्चद्वीपके ॥

End :

कोल्हापुरे महादेवी अनं [न्त]ःपूतीत योगिनी ।
इत्यष्टादशपीठाश्च योगपीठाः प्रकीर्तिताः ॥
यो नरः पठते नित्यं सर्वव्याधिनिवारणम् ।
अलक्ष्मीनश्यते नित्यं सदा लक्ष्मीस्तुतिष्ठति ॥

Colophon :

52

Sl. No. 47966 **अष्टाविंशत्युत्तरशताक्षरीबगलामन्त्रविधिः** **Ms. No. P. 8100-5**

Beginning :

अस्य श्रीविद्याग्रसिनी अष्टविंशित्युत्तरशताक्षरी बगला महामन्त्रस्य ब्रह्माऋषिः । गायत्रीछन्दः । परविद्याग्रसिमी ब्रह्मास्त्रबगलामुखिदेवता । ह्रीं बीजम् ह्रीं शक्तिः ।

End :

ओं श्रीं क्लीं ह्रीं ग्लौं ऐंक्लीं हुं ह्रीं परमप्रज्ञापहारिणि प्रज्ञां शाहिशाहि ओं ह्रीं सीं ह्रीं ग्लों ऐं क्लीं हुं ह्रीं स्तम्भन स्वरूपिणि बुद्धिविनाशाय विनाशाय पञ्चेद्रियज्ञानं .... स्वाहा ॥ इति मनुः ।

Colophon :

53

Sl. No. 47969 **अस्त्रयन्त्रविधिः** **Ms. No. P. 664-9**

Beginning :

अस्त्रयन्त्रप्रकारः—

पीताम्बरालङ्कृतपीतवर्णां शातोदरीं सर्वमुखामरार्चिताम् ।
पीतस्तलालङ्कृतपीतपुष्पां सदा स्मेरयं बगळामुखीं हृदि ॥

नमोऽस्तुमन्त्रायमकोविदाय श्रीनीलकण्ठाय नमो नमस्ते ।
एतन्मनोर्यन्त्रमखण्डतेजः प्रयोगमूल वद चन्द्रमौले ॥

End :

बिन्दुमध्ये लिखेद्बीजं बगलायश्च पुत्रक ।
साध्यं तद्बीजगर्भस्थं कुर्यात्सम्यक् सुबुद्धिमान् ॥

तद्बीजं च लिखेत्कोणत्रितयेषु त्रिधा त्रिधा ।
अष्टपत्रेषु विलिखेद्गायत्रीं बगला × ×

Colophon :

54

Sl. No. 47974 **अस्त्रोपसंहारमहामन्त्रः** Ms. No. P. 3591–25

Beginning :

अस्त्रोःसंहारमहारमहामन्त्रस्य ब्रह्माऋषिः गायत्रीच्छन्दः परमात्मा देवता ।
आं बीजं । ईं शक्तिः । ऊं कीलकम् । अस्त्रोपसंहरणार्थे जपे विनियोगः —

End :

अस्त्रोपसंहारत्तिल् अङ्गन्यासमिल्लामैयाले १२९ एट्टिल् पिन्पुरत्तिल्
मून्रांवरियिलुं अडक्कं तोडंगियानं मोदलानढु कण्डुकोळ्ळवदू ॥

Colophon :

:- श्री :-

55

Sl. No. 47979 आकाशभैरवकल्पः P. 2592-6

Beginning :

गुरुं गणपितिं वन्दे भैरवं भैरवेश्वरम् ।
नमस्कृत्वा प्रवक्ष्यामि मन्त्रशास्त्रविभूतये ॥
साङ्गं सलक्षणं वेदसारभूतं अभिष्टदम् ।
ज्ञानद जीवजन्तूनां साधकानां सुखावहम् ॥

श्रीदेव्युवाच—

श्रीशिवेशानदेवेश श्रीनाथजगतां पते ।
श्रीगळाकाळगळचिद्रूपश्री भवते नमः ॥

End :

आदिक्षार्णान्नमन्त्रप्रभवबहुकलाकारशास्त्रोत्तमांशं
शर्वान्नाग्न्यादिनत्त्वाप्रसवलयकरं भैरवं ब्रह्मकल्यम् ।
रम्यामन्त्रीसमीक्ष्य स्वमनिविभवतो वर्णयत्वात्वेबोधं
कर्णे शिष्यस्य कस्यापिचदृढमनोऽनल्पबुद्ध्यै रहस्यम् ॥

Colophon :

इति श्री आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शङ्करेण विरचिते शरभसाळवपक्षिराजकल्पे निग्रहसप्तकं नाम अष्टसप्ततितमोऽध्यायः ॥
पक्षिराजकल्पं समाप्तम् ॥

56

Sl. No. 47987 अग्नेयमन्त्रः Ms. No. P. 3972-16

Beginning :

अग्नेयमभिधारयामि मन्त्रं सर्वार्थसाधकम् ।

मरीचिः काश्यपः प्रोक्तो मुनिरस्य महात्मनोः ॥

त्रिष्टुप् छन्दो देवतास्तत्र जातवेदाग्निरीरितः ।
नवभिस्सप्तभिः षड्भिः सप्तभिः पुनरष्टभिः ॥

End :

समिद्भिः प्रजूयात्? × ध्यायेन्मासेन वैरिणाम् ।
सिं × दिरूपां धावन्ति दा × मानं रिपूं प्रति ॥

शरान् कार्मुकनिर्मुक्ता वह्निज्वालाकुला × × ।
× × च्छतीं संस्मरन् दुर्गां तर्पयेदुष्टवारिणा ॥

Colophon :

॥ श्री रामार्पणम् ॥

57

Sl. No. 47996 **आञ्जनेयमहामन्त्रः** **Ms. No. P. 6652**

Beginning:

अस्य श्री आञ्जनेयमहामन्त्रस्य श्री रामचन्द्रो भगवान् ऋषिः । गायत्री छन्दः । अञ्जनागर्भसम्भूत आञ्जनेयो देवता । आं बीजं । नमः शक्तिः । आञ्जनेयेति कीलकम् । आञ्जनेयप्रसादसिध्यर्थे जपे विनियोयः ।

End :

आं इति षडङ्गन्यासः । ध्यानम् :-
द्विभुजं स्वर्णरूचिरं रामसेवापरायणम् ।
मौञ्जीकौपिनसहितमञ्जनातनयं भजे ॥

षट्पूजा ।

Colophon :

58

Sl. No. 47997 आञ्जनेयास्त्रविधिः **Ms.No. P. 4461-105**

Beginning :

रामभक्तं महावीरं रविकोटिसमप्रभम् ।
राक्षसान्तकमत्युग्रं रामदूतमहं भजे ॥

पार्वत्युवाच—

अष्टसिद्धिप्रदातारं पुष्टिकान्तिप्रवर्धनम् ।
सृष्टिसंहारमीशानमष्टमूर्तिमहं भजे ॥

अधुना गिरिजानाथ आञ्जनेयास्त्रमुत्तमम् ।
समन्त्रं सप्रयोगं च वद मे करुणाकर ॥

\+ \+ \+ \+

End :

नृकपाले लिखेदस्त्रं ग्रस्तं शत्रुमनुत्तमम् ।
श्मशाने निखनेद्देवि मारणं पूर्ववद्भवेत् ॥
ग्रस्तं ग्रामपदे देवि नृकपाले लिखन्मनुम् ।
निखनेद्ग्राममध्ये तु स्फोटकैःक्षयमाप्नुयात् ॥
पूर्ववद्व्रणशब्दं च कृत्वा सम्यक्कपालयोः ।
लिखित्वा शत्रुनाशाय निखनेन्यध्यदेशतः ॥
रात्रौ नग्नं च मध्ये च सर्वस्वजद माहरेत् ।
सप्तरात्रप्रयोगेण म्रियते रोगसत्कुलैः ॥

न कुर्याद्विप्रजातिभ्यां मरणं मुक्तिमिच्छताम् ।

Colophon :

59

Sl. No. 48006 आदिभूवराहमन्त्रविधिः **Ms. No. P. 8121-5**

Beginning :

अस्य श्री आदिभूवराहमन्त्रस्य ब्रह्माऋषिः । गायत्रीछन्दः । आदिभूवराहो-देवता । इति ध्यानम् । ओं पूर्णज्ञानानन्दात्मने अङ्गुष्ठाभ्यां नमः । पूर्णैश्वर्यात्मने तर्जनीभ्यां नमः ।

End :

ओं नमो भगवते सकलवराहाय भूर्भुवस्सुवः पतये भूपतिस्त्वं मे देहि ददापय-स्वाहा । ओं नमो भगवते उत्तरमुखि महादित्यवराहाय लं लं लं सकल-संपत्काराय स्वाहा ॥

Colophon :

60

Sl. No. 48008 अद्यादिश्रीमहालक्ष्मीयन्त्रपूजाविधानम् **Ms. No. P. 4641-15**

Beginning :

त्रिकोणमध्ये यदि काम × × कोणत्रये ब्रह्महरिं शिवाख्यम् ।
कोणे वसौ चन्द्रमनुप्रयुक्तं दशारयुग्मं हरिपञ्चबाणान् ॥

श्रीकारं षोडशारे च वार्णीं चैव दळाष्टके ।
पञ्चशन्नतृकावेष्ट्य लेखान् सप्रणवान् लिखेत् ।।

तत्प्रकारः —

End :

त्रिकोणं चापि पट्कोणं वृत्तमष्टदळाग्रतः ।
बिन्दुत्रिकोणं पश्चांच्चचतुष्कोणं च मण्डलम् ।।
कृत्वात्रिकोणमध्ये तु लक्षबीजं लिखेत्पुनः ।
ततश्चोपरिदेहान्तमाद्यं लक्ष्मीं प्रपूजयेत् ।।

Colophon :

61

Sl. No. 48011 आनन्दकन्दम् **Ms. No. B. 933-1**

Beginning :

कैलासशिखरासीनं कालकन्दर्पनाशनम् ।
प्रसन्नं परमेशानां जगदानन्दकारणम् ।।

प्रणम्य परया भक्त्या भैरवस्तुतिमातनोत् ।
देव्युवाच - देव देव महादेव जन्मदारिद्र्यनाशन ।
प्रसीद करुणा मूर्ते प्रसन्न परमेश्वर ।।
दिव्यागमरहस्यानि तुळकाळादिकानि च ।
ज्ञानं तव प्रसादेन मायामङ्गळविग्रहा ।।
श्रोतुमिच्छामि सर्वेश त्वत्तोदिव्यरसायनम् ।
जरजन्मयन्धं च खेचरत्वादिसिद्धिदम् ।।

दारिद्र्यदुःखशमनं ब्रह्मत्वादि परप्रदम् ।

ईश्वर उवाच—

साधु साधु महाभागे सर्वलोकोपकारिणि ।
तस्तर्वं जायते सूत च्छुद्धान्नप्राणवल्लभे ॥

End :

हर्षणं चलनं हन्यादन्तानां दार्ढ्यकारणम्
चर्वेयदथ ताम्बूलं चिक्कणादिगुणान्वितम् ॥

Colophon :

इति श्रीमहाभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्ते सप्तदशोल्लासः

62

Sl. No. 48012 आनन्दकन्दम् Ms. No. B· 933-2

Beginning :

क्रमुकं नागवल्याश्च पक्वशुभ्रदळानि च ।
चूर्णं पाषाणजं श्रेष्ठं कर्पूरकटुकीःफलम् ॥

End :

या दुग्धगन्धा वटपत्रपत्रा विचीत्रर्णोरुफलासदीर्घाः ।
सावित्रवल्लीत्युदिता रसेन्दो निबध्यते तत्फलमध्यसंस्थः ॥
चतुष्षष्टिरिति प्रोक्तादित्यौषध्यैर्महाबलः ।
अभिबद्धो रसोनृणां देहलोहार्थसाधकः ॥

Colophon :

इति श्रीमहाभैरवोक्ते आनन्दकन्दे क्रियाकरणविश्रान्त नवमोल्लासः ।

63

Sl.No. 48015 आनन्दभैरवकल्पः Ms. No. P. 8736-9

Beginning :

असिताङ्गभैरवः ।

महाव्याधिभये चोरे कृत्रिमादि समुद्भवे ।
राजभीतौ शत्रुभीतौ राज्यक्षोभे द्विषज्जनैः ॥

कृताभिचारदोषादि सम्प्राप्ते मृत्युसङ्कटे ।
परयन्त्रक्रिया तन्त्र शल्यपुत्थलिकादिभिः ॥

End :

कृतं मधुकवर्त्या च मन्त्रलक्षाभिमन्त्रितम् ।
ससमे हायने भुक्तिस्थाने चैवोपवेशने ॥

विकीर्य तैलमध्ये च जले वा तस्य पानतः ।
संहरत्यचिराच्छत्रून् मृतिं यान्ति न संशयः ॥

Colophon :

64

Sl. No. 48017 आनुष्टुभदक्षिणामूर्तिमन्त्रविधिः Ms. No. P. 4461-35

Beginning :

अथानुष्टुभम् । अस्य श्री आनुभदक्षिणामूर्तिमन्त्रस्य शुकर्षिः । अनुष्टुप् छन्दः । ओं बीजम् । ह्रीं शक्तिः । ओं ह्रीं दक्षिणामूर्तये ह्रां हृत् । ओं ह्रीं तुभ्यं ह्रां शिरः । ओह्रूं वटमूलनिवासिने ह्रूं शिखा । ओं ह्रूं ध्यानैक-निरताङ्गाय ह्रैं कवचम् + + +

End :

ध्यानम् :-

मुद्राभद्रार्थदात्रीं सपरशुहरिणं बाहुभिस्सन्दधानो
जान्वासक्तैकाहुर्भुजगवरसमाबद्धकण्ठो वटाधः ।
आसीनश्चन्द्रखण्डप्रतिघटितजटः क्षीरगौरस्त्रिणेत्रो
दद्यादाद्यैः शुकाद्यैर्मुनिभिरभिवृतो भावशुद्धिं भवो नः ॥

ओं ह्रीं दक्षिणामूर्तये तुभ्यं वटमूलनिवासिने ।
ध्यानैकनिरताङ्गाय नमोरुद्राय शम्भवे ॥

ओं ह्रीं इति मन्त्रः अयमेवमन्त्रराज इति शङ्कराचार्यप्रभृतेर्मतम् । केवलज्ञानप्रदः ।
दुग्धाप्लुतैस्तिलैर्वापि सक्तुत्तेनपयोम्भत्सावाद्वयेनहोमः ॥

Colophon :

65

Sl. No. 48021 आपदुद्धरणमहामन्त्रः **Ms. No. C. 4676–46**

Beginning :

अस्य श्री आपदुद्धारणमहामन्त्रस्य स्कधभगवान्ऋषिः । अनुष्टुप्छन्दः । श्री आपदुद्धारणो देवता । ह्रीं शक्तिः । ह्रूं कीलकम् । आपदुद्धारणप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

उद्यद्भास्वरसन्निभं त्रिणयनं रक्तां रागस्तजं
स्मेरास्संवरदं कमालमभयं शूलं दधानं करैः ।
नीलग्रीवमुदारभूषणशतं शतांशुकल्पोज्ज्वलं

बन्धूकारणवाससं भयहरं देवं सदा भावयेत् ॥
ओं ह्रीं वटुकाय आपदुद्धरणाय कुरुकुरुवटुकाय ह्रां वं स्वाहा ।

Colophon :

66

Sl. No. 48030 आपदुद्धारश्रीराममन्त्रः **Ms. No. C. 1982–9**

Beginning :

अस्य श्री आपदुद्धारमहामन्त्रस्य ब्रह्माऋषिः । गायत्री छन्दः ।
भक्तापमृत्युनिर्हरणश्रीरामचन्द्रो देवता ।

ध्यानम् :-

रामं श्यामाभिरामं रविशशिनयनं कोटिसूर्यप्रकाशं
दिव्यं दिव्यास्त्रपाणीं शरमुखशरधिं चारुकोदण्डहस्तम् ।
कालं कालाग्निरुद्रं रिपुकुलदहनं विघ्नविछेददक्षं
भीमं भीमाट्टहासं सकलभयहरं रामचन्द्रं भजेऽहम् ॥

End :

मनुः

आपदामपहर्तारं दातारं सर्वसम्पदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥

Colophon :

67

Sl. No. 48032 **आपदुद्धारणवटुकभैरवमन्त्रः** **Ms. No. P. 4525-48**

Beginning :

अस्य श्री आपदुद्धारणवटुकभैरवमहामन्त्रस्य कालाग्निरुद्र ऋषिः । देवी गायत्री छन्दः । आपदोद्धारणवटुकभैरवमहारुद्रो देवता । ह्रां बीजम् । ह्रीं शक्तिः । ह्रूं कीलकम् ।

End :

शतवारमिदं मन्त्रं जपेत्सर्वार्थसिद्धये ।
त्रिवारं कार्यसिध्यर्थं जपेदेकाग्रमानसः ॥

प्रथमं तु त्रियामिश्रं गुरुं स्पष्टहृदं स्मरन् ।
तत्कार्यसिद्धये शक्तौ जुहुयात्स्वात्मनि पादुके ॥

इत्याकाश भैरवकल्पे ।

Colophon :

68

Sl. No. 48036 **आभिचारादिशान्तिविधिः** **Ms. No. P. 4925-76**

Beginning :

बीजं साध्यसमन्वितं च विलिखेन्मध्ये च पत्रेषु त-
न्मात्राणां श्चतुरो विभज्य विलिखेल्लिप्या बहिर्वेष्टयेत् ।
बाह्ये कोणगबीजबन्धवसुधागेहद्वयेनावृतं
मन्त्रं श्रु[illegible]ताभिचारविपदां प्रध्वंसनं श्रीकरम् ॥

End :

अस्मिन् संस्थापयेद्यन्त्रे नवकुम्भान् सुशोभनान् ।
सुतीर्थतोयसम्पूर्णान् रत्नवस्त्रौपधीयुतान् ॥
मध्ये सम्पूजयेद्देवं नृसिंहं शान्तविग्रहम् ॥
+ + + +
यथावत्पूजयेद्भक्तया गुरुदेवमवञ्चयन् ।
राजा विजयमाप्नोति युद्धे विधिनामुना ॥

Colophon :

69

Sl. No. 48037 **आम्नायः** **Ms. No. P. 6462**

Beginning :

अस्य श्रीगुरुमन्त्रस्य ब्रह्माऋषिः । गायत्रीछन्दः। श्रीगुरुर्देवता । हं बीजम् । सः शक्तिः । सोऽहं कीलकम् योगः । हं सामिति न्यासः ध्यानम्—

वन्दे गुरुपदद्वन्द्वमवाङ्मसगोचरम् ।
रक्तशुक्लप्रभामिश्रमतकर्यं त्रैपुरं महः ॥
+ + + +

End :

प्रकाशविमर्शात्मकस्वच्छप्रकाशपरिपूर्णपरापरमहाप्रकाशपरिपूर्णानन्दनाथश्रीमहाभैरवीचरणनिमग्नचेतने श्री अमुकानन्दनाथस्वगुरवे नमः । श्रीगुरुपादुकां पूजयामि ।

Colophon :

पूर्वं दक्षिणपश्चिमोत्तरमनूंश्चोर्ध्वं ततोऽनुत्तरं
स्त्रोतद्वन्द्वपरान्गुरूंश्चरणान् रक्तादिमिश्रान्तकान् ।
पञ्चाम्बानवनाथषोडशषडाधारं च षड्दर्शनं
गागाद्यष्टक सप्तविंशतिरहस्यान्तं न्यसेत्पूजयेत् ॥
इति षडाम्नायाः समाप्ताः ।

70

Sl. No. 48042 आम्नायविधिः **Ms. No. B. 268**

Beginning :

अम्नायविधिः प्रारम्भः

नमस्कृत्वा जगन्नाथं उमां लोकैकधारिणीम् ।
सिद्धप्रदीपिकाशास्त्रं टिकां व्याकुर्महे वयम् ॥ १ ॥
हरिः ओम् ॥ ऐं ह्रीं श्रीं । ऐं हीं - श्रीं – हिखप्रैम् ।

End :

इत्यनूत्तराम्नायगुरून् भ्रूमध्ये नशःचक्रे न्यसेत् ।
पूजयेच्च ।
श्रीनाथदिगुरुत्रयं गणपतिं पीटत्रयं भैरवं
सिद्धौघं व्रटुकत्रयं पदयुगं दूतिक्रमं मण्डलम् ।
राःद्धीयष्टचतुष्कषष्ठिनवकं वीरक्तवलीपङ्क्ति
श्रीमन्मालिनि मन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ॥

Colophon :

॥ आम्नायविधिः समाप्तः ॥

71

Sl. No. 48043 **आम्नायविधिः** **Ms. No. B. 639**

Beginning :

मन्त्ररहस्यप्रारम्भः :-

करकलितकपालः कुण्डलीदण्डपाणिः
तरुणतिमिरनीलः व्यालयज्ञोपवीती ।
क्रतुसमयसपर्याविघ्नविच्छेददक्षः
जयतुवटुकनाथःसिद्धिदः सिद्धकानाम् ॥
.... जानामि धर्मं नच मे प्रवृत्तिः
जान्नाऽम्मधर्मं नचमेनिवृत्तिः ॥
त्वया हृषिकेश हृदिस्थितेन
यथानियुक्तोऽस्मि तथाकरोमि ॥

End :

ओं अहं ब्रह्मास्मि । ओं ब्रह्मैवाहमस्मि । ओं विज्ञानं ब्रह्म । ओं प्रज्ञानं ब्रह्म । ओं तत्त्वमसि ।
.... ओं अयमात्मा ब्रह्म । ब्रह्मज्योतिरहोम् ।
इति गुरुराज्ञया गुरुमुखात् महावाक्यं अनुसन्धाय ॥

Colophon :

इति अनुत्तराम्नायः समाप्तः

72

Sl. No. 48049 **आम्नायविद्याक्रमः** **Ms. No. P. 2153–2**

Beginning:

अस्य श्री गुरूपरमगुरुपरमेष्टिगुरुमन्त्राणां ब्रह्माऋषिः । गायत्री छंदः । हंसरूपी

श्रीगुरुर्देवता । + + श्रीगुरुप्रसादसिध्यर्थे जपे विनियोगः ।

End :

ऐं ह्रीं हसकफं हसौः । + + + ऊर्ध्वाम्नायविद्येश्वर्यै नमः । आरभ्य मालिनीपूर्वमण्डलान्त देवता सहिताय सहस्रदेवतासहिताय शाङ्करीपीठाय नमः ॥ इत्यूर्ध्वाम्नायविद्या ॥

ॐ तत्सत् ।

Colophon :

73

Sl. No. 48050 **आम्नायव्यख्या** **Ms. No. C. 1530**

Beginning :

सच्चिदानन्दनाथस्य गुरोः पादाम्बुजद्वयम् ।
प्रणम्य शिरसा भक्तया ग्रन्थानालोक्ययत्नतः ॥

आम्नायलक्षणं वक्ष्ये संक्षेपेण यथाक्रमम् ।
उद्रेक आयसंयुक्तं मन्त्रयन्त्रादिलक्षणैः ॥

End :

अथ श्रीविद्योपासकानां त्रिकूटविद्यायाः । षोडश्या श्रीकामेशमात्मानमात्मनासर्वदेहस्थितः श्रीगुरोर्दिव्यदृष्ट्यावगत्यात्मना तमोहनिरस्तप्रपञ्चं सदा तत्त्वमस्यद्वयब्रह्मसंवित् ज्ञानं भवतीति ।

Colophon :

इति अम्नायव्याख्या समाप्ता ।

74

Sl. No. 48051 आम्नायसहस्राक्षरी **Ms. No P. 8106-11**

Beginning :

भगवन् सर्वलोकेश सर्वज्ञ करुणानिधे ।
शुद्धशक्तिमहामन्त्रं ब्रूहि मे परमेश्वर ॥

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि जन्मान्तं परिपृच्छसि ।
तस्य श्रवणमात्रेण चक्रपूजाफलं लभेत् ॥

End :

सर्वागमरहस्यार्थः परंधामप्रकीर्त्यते ।
शुद्धनामोऽन्ताः स्वाहान्ताः तर्पणान्ता जयान्तकाः ।
शुद्धायाः शक्तिमालायाः शिवस्तेन विधीयते ॥

Colophon :

इत्याम्नायसहस्राक्षरी सम्पूर्णा ।

75

Sl. No. 48053 आम्नायस्तोत्रम् **Ms. No. P. 5002-1**

Beginning :

श्रीरस्तु ॥

शुद्धविद्या च बाला च द्वादशार्धा मतङ्गिनी ।।
एताः कामगिरीन्द्रस्थाः पूर्वाम्नायस्य देवताः ।। १ ।।

गुरुत्रयादिपीतान्तं चतुर्विंशत्सहस्रकम् ।
एतदावरणोपेतं पूर्वाम्नायं भजाम्यहम् ।। २ ।।

End :

यस्त्रिसन्ध्यं वदेद्विद्वान् आम्नायस्तोत्रमुत्तमम् ।
सर्वपापविशुद्धात्मा सर्वैश्वर्यसमन्वितः ।।

भुक्त्वा भोगान् यशस्कामं सर्वप्रियहितेरतः ।
श्रीविद्यालोकमाप्नोति वेदवाक्यानुसारणात् ।। १२ ।।

Colophon :

।। हरिः ओम् ।।

76

Sl. No. 48055 **आराधनविधानम्** **Ms. No. P. 4252-27**

Beginning :

श्रीशिव :-

आराधनं प्रवक्ष्यामि सर्वसिद्धिप्रदायकम् ।
भोगमोक्षप्रदं पुण्यं भुक्तिमुक्त्यैकहेतुकम् ।।

विषुकालेऽयने पुण्ये पुण्यायां दर्शके तथा ।
एकादश्यां च द्वादश्यां शुक्रसोमेन्दुवासरे ।।

End

इत्येवं सततं कुर्यात् स्वयमेवशिवो भवेत् ।
तद्ब्रह्मागमनं मत्वा कम्पन्ते विग्रहाग्रहाः ॥
किम्पुनर्दर्शनादार्ये भूतप्रेतादिराक्षसाः ।

Colophon :

इति आकाशभैरवकल्पे आराधना विधानम् ॥

77

Sl. No. 48059 **आवहन्तीकल्पः** **Ms. No. P. 10053-61**

Beginning :

अथावहन्तीकल्पं व्याख्यास्यामः । कृष्णपक्षप्रदि जुहुयात् । अङ्गारयुक्ते प्रशस्ता द्वादश्यां श्रवणेषु वाह्य एवस्नात्वा शुक्लवस्त्रधरः शुक्लयज्ञोपवीती आवहन्तीति जले तिष्ठन् आदित्याभिमुखो भूत्वा यच्छन्दसामृषभ इति अष्टोत्तरशतं जपेत् । यावतीहोमसंख्या तावती जपेत् । तत उत्तीर्य शुचौ देशे स्थण्डिलमुल्लिख्य + + + +

End :

ततो मे श्रियमावह । नेत्रत्रयावौषट् । लोमशां पशुभिः सह अस्त्रायफट् । पद्दोलर्षिः, त्रिष्टुप् छन्दः श्रीप्रदा विष्णुर्देवता । नित्यं च विश्वादेवान उक्त संख्याभिः .... यथाशक्ति जुहुयात् । अचिरेण व्रीहिमान् भवति ।

स्वर्णवर्णाभ्यामुभाभ्यां च दधतं श्रियम् ।
अन्याभ्यां शङ्खं चक्रं धारयन्तं हरिं स्मरेत् ॥

Colophon :

इति काम्यावहन्तीकल्पः ।

78

Sl. No. 48063 आवेशभैरवमन्त्रः **Ms. No. P. 4868–22**

Beginning :

अस्य श्री आवेशभैरव महामन्त्रस्य अगस्त्यऋषिः । जगतीच्छन्दः । स्वस्थावेशभैरवो देवता । क्षं बीजम् । ह्रीं शक्तिः । हुं कीलकम् । सद्य आवेशसिद्ध्यर्थे जपेविनियोगः ॥

End :

चतुर्थमिन्द्रगोपाच्च अजापित्तेन
अद्रिकद्रवसंयुक्तं जम्बीररस मर्दितम् ।
पशूनां च गजानां च सर्वेषां चक्षुषं क्षिपेत् ।
प्राणत्यागेन कर्तव्यं अंजनं प्राणमुद्धरेत् ॥
सर्पदष्टेव महाभूतनिवारणम् ॥
... . रें डुसाछ ॥

Colophon :

॥ हरिः ओम् ॥

79

Sl. No. 48067 आवेशमन्त्रः **Ms.No. P. 10024-12**

Beginning :

ओं नमो भगवति करालो गारुडी काली शंकरी दडश्री इलः मतिः

मनः सराराम: स्त्वणी स्त्रीणि भाण्डामण्डिता सदुरीमुखः मुर्मुर्मुखीमुत्रा: मुत्राहार्वाचं विग्रह—

End :

ಚಂದ್ರಂ ತಿರುಗು ಮಳೆತಿರುಗು ಮಾನಿತಿರುಗು ಮಾರಿತಿರುಗು ಶೂಲಂ ತಿರುಗು ಸುಜುಗಜುಂ ತಿರುಗು ನೀಲಕಂಠಸ್ವಾಮಿಯಾಣೆ ಅಪಕರ್ಣಾಪರಚಿಯೋಃಹಿ ಸ್ವಾಹಾ ।

Colophon :

- श्रीः -

80

Sl. No. 48069 **आवेशविधिः** Ms. No. C. 548-3

Beginning :

गुरु गणपतिं दुर्गां वटुकं शिवमच्युतम् ।
ब्रह्माणं गिरिजां लक्ष्मीं वाणिं वन्दे विभूतये ।।

श्रीकण्ठ शिव विश्वेश महादेव महेश्वर ।
विश्वेश्वरेश सर्वज्ञ विश्वमङ्गलदायक ।।

End :

एतत्सलक्षणं शक्ति यन्त्रमध्ये प्रपूजयेत् ।
शतवारं मूर्ध्निभागे भस्म मन्त्रेण निक्षिपेत् ।।

अतीतानगतं चैव वदत्याश्चर्यकं तथा ।
न शक्यते × महात्म्यहं मया वक्तुं महेष्वरि ।।

Colophon :

इति श्री आगमरहस्ये अथर्वणतन्त्रखण्डे उमामहेश्वरसंवादे आवेशमन्त्रयन्त्र

पूजादिविधिर्नाम प्रथमः पटलः ।

81

Sl. No. 48070 आशुताक्षमहामन्त्रः Ms. No. P. 7552–11

Beginning :

अस्य श्री आशुताक्षमहामन्त्रस्य शङ्कर ऋषिः । जगती छन्दः । आशुताक्षो-गरुडो देवता + + + ध्यानम्—

आजानोस्तप्तहेमप्रभममलं नाभिदेशानयस्ता-
दाकर्णा × माभं हतवहशिखमुखं श्याममामूर्ध्वकेशम् ।
आब्रह्माण्डव्याप्तदेहं द्विभुजमहिवरैः भूषणैर्भूपितांगं
पिगाक्षं तीक्ष्णदंष्ट्रं वरदमभयदं तार्क्ष्यमुग्रं नमामि ॥

End :

शिखिपुरमनुयुक्तं चाष्टपत्रं × टान्तं शरीर × शशुयुक्तं स्यात् बहिस्साध्य-नाममहियुतमनुषण्यं प्रक्रिया च क्रमेतत् प्रतिवशमतुलं स्यात्युत्रभांग्यप्रदश्च ।

Colophon :

इत्यर्क भैरतन्त्रे प्रत्यक्षसिद्धिप्रदे आशुताक्षकल्पे एकादशोऽध्यायः ।

82

Sl. No. 48073 आसनलक्षणम् Ms. No. P. 4554–17

Beginning :

वंशासने दरिद्रं स्यात् पापाणे व्याधिसम्भवम् ।
धरण्यां दुःखदौर्भाग्यं दौर्भाग्यं दारुकासने ॥

तृणासने यशोहानिः पल्लवे चित्तविभ्रमः ।

End :

गृहस्थो गुरुरेव स्यात् न कदाचिद्यतिर्गुरुः ।

\+ \+ \+ \+ \+ \+ \+

सप्तसागरपर्यन्तं यानि तीर्थानि कृत्स्नशः ।
गुरोऽङ्घ्रिजलबिन्दूनां सहस्रांशेन नो समः ॥

Colophon :

83

Sl. No. 48075 **आसनस्थानविधिः** **Ms. No. P. 4925-19**

Beginning :

सर्वान् कामानवाप्नोति मनुष्यः कम्बलासने ।
कृष्णजिने जपेन्मुक्तिर्मोक्षश्रीव्याघ्रचर्मणि ॥
कुशासने भवेज्ज्ञानमारोग्यं पत्रनिर्मिते ।
× × × जपपूजाः समारभेत् ॥

End :

नदीं जलाशयं चैव पृष्ठकृत्सञ्जपेन्नतु ।
सूर्यस्याग्नेर्गुरोरिन्दोर्दीपस्य च जलस्य च ॥
विप्राणां च गवां चैव सन्निधौ शस्यते जपः ॥

Colophon :

84

Sl. No. 48076 **आसुरीअस्त्रमन्त्रविधिः** Ms. No. C. 3494-20

Beginning :

अस्य श्री आसुरी अस्त्रमहामन्त्रस्य ब्रह्माऋषिः । अनुष्टुप्छन्दः । श्री आसुर्यम्बा देवता । आं बीजम् । ह्रीं शक्ति । क्रों कीलकम् । श्री आसुर्यम्बा-प्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

ओं उत्तमे शिखरेदेवि भूम्यां पर्वतमूर्धनि ।
ब्रह्मयोनिसमुत्पन्ना आसुरी आगच्छागच्छयथासुखम् ।।
मां रक्षरक्ष ओं आं ह्रीं क्रौ असुरी सर्वदुष्टानां नाशय नाशय — — गुह्येति च समर्पणम् ।

Colophon :

इत्यासुरी अस्त्रमन्त्रविधिः

86

Sl. No. 48078 **आह्निकम्** Ms.No. P. 8214-29

Beginning :

श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवम्
सिद्धौघं वटुकत्रयं पदयुगं दूतीक्रमं मण्डलम् ।
वीराद्यष्टचतुष्कषष्टिनवकं वीरावलीपञ्जरं
श्रीमन्मालिनि मन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ।

ब्राह्मे मुहूर्ते चोत्थाय अवश्यकं निर्वर्त्य रात्रिवासः परित्यज्य वासान्तरं परिधाय स्वासने चोपविश्य ।

End :

प्राणायामादिन्यासत्रयं कृत्वा गुह्यातिगुह्येति देव्यैसमर्प्य योन्या प्रणमेत्। गौरीर्मिमायेत्युपस्थाय अभिवाद्य गुरुपादुकां यथाशक्ति जपेदिति सायंसन्ध्याविधिः। मन्त्रपारायणं कुर्यात्। ततोऽर्धरात्रौ तुरीयसन्ध्यामुपासीत। स यथा अर्कमण्डले — × × × ×

Colophon :

86

Sl. No. 48081 इन्द्रजालतन्त्रम् **Ms.No. P. 4461-125**

Beginning :

ईश्वरोवाच—

आश्चर्यदं कलौदेवि वयस्स्तम्भनकारकम्।
तद्योगं चैव वक्ष्यामि तव पर्वतनन्दने॥

ब्रह्मवृक्षस्य पञ्चाङ्गं छाया शुष्कं तु चूर्णितम्।
मध्वाज्याभ्यामिहोत्कर्षं वर्षकेण जरां जयेत्॥

\+ + + +

End :

भैरवं बीजमुच्चार्य पाशबीजं समुच्चरेत्।
एवं च त्रिशतं जप्त्वा यक्षधूपं च पार्वति॥

धूपं दद्यात्स्वप्रियाय तस्य भूतभयं हरेत्।
कृष्णागरुं च सङ्गृह्य रविवारे सुबुद्धिमान्॥

मन्त्रेणानेन गिरिजे सहस्रं मन्त्रयेन्नरः ।
तनैव धूपं दत्वा तु तस्य सम्मोहनादिकम् ।
अन्यहस्तगतो लोको नात्र कार्या विचारणा ॥

Colophon :

इतीद्रवालतन्त्रे द्वाविंशतिः पटलः ।

87

Sl. No. 48084 इन्द्राक्षी अङ्गमन्त्रविधिः **Ms. No. P. 4461-88**

Beginning :

अस्य श्री इन्द्राक्षी अङ्गमन्त्रस्य पुरन्दरऋषिः । अनुष्टुप् छन्दः । इन्द्राक्षी-देवता । ऐं बीजम् । ह्रीं शक्तिः । क्रों कीलकम् । इन्द्राक्षीप्रसादसिद्ध्यर्थे जपे विनियोगः । बीजशक्तिकीलकैरनुलोमविलोमात्मकैः प्रणवसम्पुटितैरङ्गुलिहृदयन्यासं कुर्यात् ।

\+ + + +

End :

आदित्यवारे रात्रौ शुचिर्भूत्वा कचित्स्थाने यन्त्रं लिखित्वा शयने कृते स्वप्ने शुभाशुभं कथयति । नोचेत्सोमावारे भौमवारे वा अवश्यं सिद्धम् । ध्याये सकलवादिनि प्रपञ्चजनमोहिनि ह्रूीं ह्रीं ह्रूीं महावीरस्वभावदर्शिनि नन्द नन्द वहसि कार्यं मम स्वप्ने कर्णे कथय स्वाहा । जपकॢप्तिः पूर्ववत् ।

Colophon :

88

Sl.No. 48086 इन्द्राक्षीकल्पः Ms. No. P. 6915-18

Beginning :

इन्द्राक्षि ओं लीं ह्रीं ह्रूं मं श्रीं इन्द्राक्षि नाविनानिधज्वरां दुष्टग्रन्थि स्फोटय अरीन् भञ्जय भञ्जय मनोग्रन्थि प्राणग्रन्थि शरीरग्रन्थि घातय घातय -

End :

अक्षरायाकारायै नक्षत्रादिदिवसरूपायै चन्द्रार्कप्रचण्डायै ततमहाकाशाग्नि रुद्रायै निटिलग्रहराहु तवरौद्रायै भैरवभीकराण्डभैरवायै नवदुर्गि .... कुण्टे खङ्गस्तम्भनम् ॥

Colophon :

शुभमस्तु

89

Sl. No. 48089 इन्द्राक्षीत्रिविधम् Ms. No. P. 8687-8

Beginning :

प्राणायामत्रयं कृत्वा अथ भूशुद्धिं भूतशुद्धिं कृत्वा ।
अथातस्सम्प्रवक्ष्यामि इन्द्राक्षीत्रिविधं क्रमात् ।
साङ्गोपाङ्गविधानेन श्रृणुश्व परमेश्वर ।
मूलमन्त्रं चाङ्गमन्त्रं मालामन्त्रं विशेषतः ।
तद्रहस्यं च विधिना शृणु गोप्यं महामनुम् ॥

End :

उरगभय मृगभय देशवतां यै छिन्दि छिन्दि हन हन भिन्न भिन्न हन हन

२ रौद्रायै पुररौद्रायै कालरौद्रायै आं ह्रीं क्रों हूं फट् फट् स्वाहा ।

Colophon :

इति इन्द्राक्षी अष्टमाला सम्पूर्णम् ।

90

Sl. No. 48094 इन्द्राक्षीमन्त्रः **Ms. No. P. 4461–86**

Beginning :

अथातः सम्प्रवक्ष्यामि इन्द्राक्ष्याश्च विधिं क्रमात् ।
साङ्गोपाङ्गविधानेन शृणुष्व परमेश्वरि ॥

मूलमन्त्रं चाङ्गमन्त्रं मालामन्त्रं विशेषतः ।
तद्रहस्यं च विधिवच्छृणुगोप्यं महामनुम् ॥

अस्य श्री इन्द्राक्षीमूलमन्त्रस्य धन्वन्तरिः ऋषिः । जगती छन्दः । इन्द्राक्षी देवता । + +

End :

मन्त्रः :- ओं ऐं घ्रों हुं दुं श्री ईं इन्द्राक्षि मम शत्रून् दुःखग्रान्थि स्फोटय स्फोटय मे अरीन् भञ्जय भञ्जय मनोग्रन्थिं प्राणग्रन्थिं शरीरग्रन्थिं घातय घातय फट् हुं फट् स्वाहा । इत्यष्टाविंशोत्तरशतं जपित्वा पञ्चोपचारैरभ्यर्च्य संहारमुद्रां प्रदर्शयेत् ।

Colophon :

91

Sl. No. 48326 इन्द्राक्षीमहामन्त्रः Ms. No. P. 5940-6

Beginning :

शुभमस्तु ॥ वृत्तद्व + + हरिग्द्दलं विलिख्य
इन्द्राक्षीरत्रर्णान् विलिखेत् क्रमां श्र ।
मध्येतु भाध्यं प्रणवेन युक्तं
तद्बह्यवृत्तेपिव पोडशारम् ॥

End :

ओं ऐं घें ह्रीं हुं ईं इन्द्राक्षि रक्ष रक्ष । मम शत्रुदु:खव्याधिभयं × × टय × × टय । मारीं भञ्जय भञ्जय । मनोग्रन्थिं प्राणग्रन्थिं शरिर_ग्रन्थिं घातय घातय । फट् हुं फट् स्वाहा ।

Colophon :

- श्रीः -

92

Sl. No. 48098 इन्द्राक्षीमालामन्त्रः Ms. No. P. 4461-89

Beginning:

ओं नमो भगवति इन्द्राक्षि सर्वजनमनोहारिणि सर्वजनसम्मोहिनि कालरात्रि नारसिंहसंहारिणि अजये अभये महानागप्रतिह-विश्वरूपे मधुसूदनि महाविष्णु_स्वरूपिणि महासिंहवाहिनि

+ + + +

End :

शिरश्शूलकक्षशूलकुक्षिशूलगुल्मशूलगुण्डशूलदन्तशूलनानावर्णशूलनिवारणाय

गण्डमालादि सकलप्राणापहरणाय अत्युग्रदण्डप्रकाशवदनाय अभ्यन्तरज्वाला-भेदि उग्रमार्ताण्ड ह्र ह्रं फट् बडवानलभैरवाय स्वाहा ह्रां गुरुभ्यो नमः ॥

Colophon :

93

Sl. No. 48101 इन्द्राक्षीमूलमन्त्रः **Ms. No. P. 5657–82**

Beginning :

इन्द्राक्षीमूलमन्त्रः ।

ह्रां ह्रीं ह्रुं ह्रैं ह्रः ।

इन्द्राक्षीदेविशार्वरी मां पालय पालय स्वाहा । इति मूलमत्रः ।

End :

ॐ नमो भगवते सर्वविषनीवरणाय अमृतांशुशेखराय सकलविषसंहाराय शुद्धस्पटिक शरीराय + + + + शीघ्रं निर्विषं कुरु कुरु महेशाय हुं फट् स्वाहा ।

Colophon :

श्रीः

94

Sl. No. 48102 इन्द्राक्षीयन्त्रम् **Ms. No. P. 10344-30**

Beginning :

ठकारबाह्ये अष्टदलं लिखित्वा इन्द्राक्षीयन्त्रं विलिखेत् । ताञ्च मध्ये च सायं

प्रणवेनयुक्तं तद्बाह्यवृत्तेपि च पोडशारम् दलेपु लेख्यं स्वरशोडशं च दानान्तरेकादि वर्णां × × × × ।

End :

महापद्मश्च पद्मश्च शंखो मकरकच्छपौ ।
मुकुन्दकुन्दनीलाश्च वागश्च निधयो नव ।

इति लिखित्वा । तत्पश्चिमे अणिमाद्यष्टसिद्धिः ।
अणिमामहिमा चैव गरिमालघिमा तथा ।
प्राप्तिः प्रकाम्य मीशत्वं वशित्व चाष्टभूतयः ॥
अष्टसिद्धिः लिखित्वा क्रों इति पाशांकुशाभ्यां वेष्टयेत् ।

Colophon :

95

Sl. No. 48107 इन्द्राक्षीयन्त्रलक्षणम् **Ms. No. P. 5756-24**

Beginning :

ओं । विं । दूं । श्रीं ई ।
बालर्ककोटिरूचिरां स्फटिकाक्षमालां
कोदण्टमिक्षुजनितास्मरपञ्चबाणाम् ।
विद्यां च सूत्रकमलं दधतीं त्रिनेत्रीं
ध्यायेत् समस्तजननीं नवचन्द्रजूटीम् ॥

End :

ओं श्रीं ह्रीं कीं इन्द्राक्षी । ओं श्रीं क्लीं हुं स्वाहा । मूलमन्त्रः । यत्रं । वृत्ताकारत्रिकोणं च तन्मध्ये च त्रियक्षरम् ।

तत्पार्श्वे सिद्धनामानि तत्रोपरि च वेष्टितम् ।

Colophon :

इदमिद्राक्षियन्त्रस्य लक्षणं क्रियते विदुः ।

96

Sl. No. 48112 इन्द्राक्षीयन्त्रलक्षणम् **Ms. No P. 4461-87**

Beginning :

अथ यन्त्रोद्धरणम् ।

रः रबाह्ये अष्टदलं विलिख्य इद्राक्षीमन्त्रं विलिखेत् क्रमाच्च ।
मध्येच साध्यं कुणपे न युक्तं तद्बाह्यवृत्तेषु च षोडशारम् ।
दलेषु लिख्य स्वरषोडशं च । दलान्तरे कादिवर्णानि लिख्य तद्बाह्यके भूपुरभैरवाष्टकम् ।

End :

तत्पूर्वभागेऽपि च मालिकाख्यं तद्दक्षिणे मातृकनामलेख्यम् ।
तत्पश्चिमे पञ्चशरानिधीश्च तदुत्तरेऽप्यणिमाद्यष्टसिद्धिः ॥
पाशाङ्कुशाभ्यां परिवेष्टयेच्च
सर्वेष्टसिद्धिं कुरुते नराणम् ।
एवंक्रमेणैव लिखेद्विभूत्यां
तत्कांस्यपात्रे च शुभं प्रशस्तम् ॥
इन्द्राक्षीयन्त्रं कथितं मु × × भिः
\+ + + +
संहारश्चाष्टभैरवाः

Colophon :

इति यन्त्रोद्धारः ।

97

Sl. No. 48119 इन्द्राक्षीस्तोत्रजपविधिः Ms. No. P. 4580-18

Beginning :

एवं गुणविशेषणविशिष्टयां शुभतिथौ यजमानः नियोगेन यजमानस्य गोत्रनामधेयस्य शरीरे वर्तमानवर्तिष्यमाण + + + आयुष्याभिवृद्ध्यर्थं अष्टादशपीठिका नामोच्चारणं करिष्ये ।

End :

अप्रकाशमिदं मन्त्रं सर्वसिद्धिमनुत्तमम् ।
स्मरणादेव मन्त्रस्य सर्वमृत्युर्निवारणम् ॥

सर्वरोगहरं हरान् सर्वकामप्रदायकम् ।
प्रणवादि मायबीजान्तं अङ्गमन्त्रन्तु पूर्ववत् ।

मूलमन्त्रः । ॐ ऐं ग्रीं ईं हुं दुं लं श्रीं ह्रीं इन्द्राक्षी रक्ष रक्ष ।

Colophon :

98

Sl. No. 48122 इन्द्राक्षीस्तोत्रजपविधिः Ms. No. P. 8778-5

Beginning :

अस्य श्री इन्द्राक्षीस्तोत्रमहामन्त्रस्य शचोपुरन्दरऋषिः । अनुष्टुप्छन्दः । ईन्द्राक्षीदेवता । महालक्ष्मीति बीजम् । भुवनेश्वरीति शक्तिः । भवानीतिकीलकम् । मम इन्द्राक्षी प्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

शतमावर्तयेद्यस्तु मुच्यते व्याधिबन्धनैः ।
आवर्तयेत्सहस्रं तु लभते वाञ्छितं फलम् ॥
सर्वमङ्गलमाङ्गल्ये शिवेसर्वार्थसाधके ।
शरण्ये त्र्यम्बकेदेवि नारायणि नमोऽस्तुते ॥

Colophon :

एवं इन्द्राक्षीस्तोत्रं सम्पूर्णम् ।

99

Sl. No. 48125 उग्रवीरज्वालानृसिंह्ममहामन्त्रः **Ms. No. P. 9019–41**

Beginning :

रामप्रह्लादवरद :-

अस्य श्री उग्रवीरज्वालानृसिंह्ममहामन्त्रस्य प्रह्लादऋषिः । अनुष्टुप् छन्दः ।
अघोरपञ्चाग्निनरसिंह्मो देवता + +

शङ्खचक्रधरं देवं किरीटादिविभूषितम् ।
दंष्ट्राकराळवदनं नारसिंह्म नमोस्तु ते ॥

End :

अहो वीर्यमहो धैर्यं अहो बाहू परा × × मम् ।
भीमाक्षं भीमवदनं नारसिंह्म नमोस्तु ते ॥

अस्य श्रीवीरनारसिंह्माय रौद्राग्निज्पालादिज्वलितनेत्राय प्रळयाकालरुद्राय अवताराय ॥ श्रीनारसिंह्माय नमः ।

Colophon :

100

Sl. No. 48134 उच्चाटनशरभमन्त्रयन्त्रविधिः **Ms. No. P. 8756–7**

Beginning :

उच्चाटनशरभ :-

ऐं खं ह्रां खं हुं फट् । ऊर्ध्वं चत्वारि र खा विलासन्नव कोमा भवन्ति तेषु चतुस्त्रिकोणं ३६ भवन्ति चतुर्दिक्षु ।

End :

ओं ठं रं पा श्रींतनयकायसंवलनं कुर्विति २६ कोणेषु रं फ धूशूलिनि ज्वलसुतानां जीवजन्तूनां स्त्रीणामकर्षणं भवेत् ।

श्रीशूलिनी प्रीयताम् ।

Colophon :

महीशूरुपुरस्थ आत्रेयगोत्रोत्पन्नवेंकटरमणात्मजवेंकटनारायणेन लिखितमिदं पुस्तकम् । स्वार्थं परार्थं च ।

101

Sl. No. 48135 उच्चाटनसुदर्शनमन्त्रः **Ms.No.P. 4268-17**

Beginning :

अस्य श्री उच्चाटनमन्त्रस्य अहिर्बुन्ध्यो भगवान् ऋषिः । गायत्री

छन्दः । सुदर्शनो देवता । हुं बीजम् । ग्लौं शक्तिः । स्वाहा कीलकम् ।
उच्चाटनसिद्धयर्थे जपे विनियोगः ।

End :

शोणितं पिब पिब मां न खाहि खाहि मम शत्रून् भस्मीकुरू । क्रो हुं ग्लौं रं ह्रीं ह्रीं हुं फट् खे स्वाहा । पुनः हृदयादिन्यासः । इति दिग्विमोकः । पुनः ध्यानम् । पुनः पञ्चपूजा ।

Colophon :

102

Sl. No. 48142 **उत्तारगणपतिकल्पः** **Ms. No. P. 3400-1**

Beginning :

अस्य श्री उत्तारगण॰ति श्रीपादुकां पूजायामि । अस्य श्रीउच्छिष्टगणपति-महामन्त्रस्य मतङ्गगणक ऋषिः । गायत्री छन्दः । श्री उत्तारगणपतिर्देवता + + + ध्यानम्—

ततो ध्यानं प्रवक्ष्यामि रत्नसिह्मासनोपरि ।
पद्मासने समासीनं द्विभुजं रक्तवर्णकम् ॥

End :

एवं कृतश्चेद्‌गणपतिः प्रसन्नो भूत्वा निखिलकामितार्थान् ददाति ; शत्रून् नाशयति ; ग्रामान् नाशयति ; वशीकरोति कलौ - इति दुर्गागणपतिवचनात् नास्त्यत्र संशयः ।

Colophon :

इति सिद्धिशाबरतन्त्रे उमामहेश्वरसंवादे कलियुगसिद्धिप्रदे अतिरहस्ये उत्तारगणपतिकल्पेऽष्टमः प्रयोगस्सम्पूर्णः ।

103

Sl. No. 48143 उद्धारकोशः Ms. No. P. 3250-1

Beginning :

देवदेव जगन्नाथ भक्तानुग्रहकारक ।
श्रोतुमुद्धारको शाख्यं नानागमविनिश्चितम् ॥
इच्छामि परया प्रीत्या वक्तुमर्हसि धूर्जटे ।

ईश्वर उवाच ।

शृणु पार्वति वक्ष्यामि ह्युद्धारं त्रिपुरादितः ।
देवीनां दशविद्यानां मन्त्रोद्धारमनुत्तमम् ॥

End :

अथ ते भैरवस्याहं ध्यानं वक्ष्यामि पार्वति ।
निःसृते भैरवे तन्त्रे यथाभीष्टफलप्रदम् ।
कपालहस्तं भुजगोपवीतं
कृष्णच्छविं दण्डधरं त्रिणेत्रम् ।
अचिन्त्यमाद्यं व्यपानसक्तं
हृदि स्मरे भैरवमिष्टवन्तम् ॥

Colophon :

इति श्री दक्षिणामूर्तिविरचिते सर्वागमसारे उद्धारकोशाख्ये सकलदेवता-ध्याननिरूपणं नाम सप्तमः कल्पः ।

104

Sl. No. 48144 **उपदेशसारसर्वस्वसङ्ग्रहः** Ms. No. P. 3005-1

Beginning :

× × × ×

× × × हृदीहगोपीजनवल्लभश्रितः ।

श्रीयेऽस्तु भूयो जगतां वशङ्करः ॥ १ ॥

ह्रीं भावां श्रीमतीं प्रत्यक्षभवकलिकां कामदां शान्तमूर्तिं ।

नम्राङ्गीं दर्पनेत्राम्बुजगलदमृतां नादिनी स्थाणुकान्ताम् ॥

श्रीमूर्तिं दन्तशूकोद्भयवसकलसांम्बुजकल्पभूतां

लं हं रं यं वमेतैरिषु मितयजनैः पादुकां पूजयामि ।

End :

नरसिंहवेषधात्री देव्यस्मत्पापमति × × । ह्रां ह्रीं ह्रूं सिंहवदने धूरुधूरुगच्छगछपरस्परविद्वेषणं कुरु कुरु हं फट स्वाहा । सीसपट्टे सर्षपिति सहस्रं परगृहे विसृष्टं विद्वेषकम् । ६४ । क्लीं स्त्रीं ॥ × ×

Colophon :

[इति श्रीमत्परमहंसपरिव्राजकाचार्यशिवादिगुरुवर्यसंत्सम्प्रदायानुसारिमुनीन्द्र-सच्छिदानन्दनाथशिष्यसहजानाथशिष्यप्रकाशानन्दनाथचरणकमलमकरन्दसारज्ञेण नारायणविदुषा विरचिते उपदेशसारसर्वस्वङ्ग्रहे प्राभातिककालीनयोगध्यानानु-भवप्रकारो नाम प्रथमो विश्रामः]

105

Sl. No. 48145 **उपस्थानसहस्राक्षरी** Ms. No. P. 8106-10

Beginning :

अथोदारमितां विद्यां सहस्राक्षरमालिकाम् । ऐंचामुण्डे ऊर्ध्वकेशिनि

विद्युज्जिह्वेदंष्ट्राकरालवदने रसारसप्रिये हंसस्सोहं क्रों क्रों विजृम्भमाणत्रैलोक्य परिवर्तिनि -

End :

ब्रह्माण्डमालाधरे बन्धूकशोणाधरे त्रैलोक्यसत्यै नमः
ऐं क्लीं सौः श्रीं ह्रीं - ऐं

उपस्थायततो ध्यात्वा श्रीमत्रिपुरसुन्दरी सन्तार्यकामतः सम्यक् मूलाविद्यां त्रयी पृथक् ॥

Colophon :

इति उपस्थानसहस्राक्षरी सम्पूर्णा ।

106

Sl. No. 48153 ऊर्ध्वाम्नायः **Ms. No. P. 4197-7**

Beginning :

स्मर्तव्यं पादुकं पूर्वं चरणं तदनन्तरम् ।
पञ्चधा नवधावाधश्च मूलविद्याश्चषोडश ॥

आधारविद्या षट्पञ्चपुनरङ्घ्रिरनुक्रमात् ।
मूलविद्यां परा ज्योतिरहस्यं योगिनीपदा ॥

शाम्भवश्चैवहृल्लेखा समया ठद्बोधिनी ।
कुलपञ्चाक्षरी पञ्चदशानामुत्तरात्मिका ॥

\+ \+ \+ \+

End :

\+ \+ \+ \+

हसौः स्वाहा। सोहं प्रकाश विमर्शाचरणश्री। ९१४ हसौः ओम्।
योहमस्मि ब्रह्माहमस्मि अहमस्मि ब्रह्महमस्मि सोऽहं स्वच्छप्रकाशः।

Colophon :

इत्यूर्ध्वाम्नायः समाप्तः।

107

Sl. No. 48159 **ऋणशोधनविधिः** **Ms. No. P. 4925-22**

Beginning :

नामाद्यक्षरमारभ्य यावन्मन्त्रादिदर्शनम्।
त्रिधा कृत्वा स्वरैर्हत्वा तदन्यद्विपरीतक्रम्॥
कृत्वाधिको ऋषिः ज्ञेयः ऋणीचेन्मन्त्रमुत्तमम्।
स्वयं ऋणीचेत्तन्मन्त्रं त्यजेत्पूर्वं ऋणी यतः॥

\+ \+ \+ \+

End :

तद्विपरीते तु सप्तभिर्गुणित्वा त्रिभिर्हरेदित्यर्थः। तत्रा शर्मप्रसिद्धनम्नोर्मध्ये किं वा ग्राह्यमित्याकाङ्क्षायां कल्पाक्षरे प्रोक्तं प्रसिद्धनामगृह्णीयात्। सुप्तो येन च जागृयादिति।

Colophon :

108

Sl. No. 48165 **एकाक्षरगणेशपद्धतिः** **Ms. No. C. 1384**

Beginning :

विनायकगुरुं भानुं ब्रह्मविष्णुमहेश्वरान्।

सरस्वतीं प्रणम्यादौ सर्वकार्यार्थसिद्धये ॥

एकाक्षरगणेशस्य कुर्वेऽहं पद्धतिं स्फुटाम् ।
गजाननं गुरुं नत्वा भट्टलक्ष्मणपाटिलः ॥ २ ॥

End :

हीनभक्तिवर्णैश्च व्यञ्जनैरक्षरैरपि ।
तत्सर्वं वक्ष्यतां देव त्वत्प्रसादाद्गजानन ॥ ५ ॥

भट्टनारायणसुतो भट्टलक्ष्मणपाटिलः ।
गजाननप्रसादेन चक्रे रम्यां सुपद्धतिम् ॥ ६ ॥
इति काम्यप्रकरणम् ।

Colophon :

इति लक्ष्मणभट्टपाटीलविरचिता एकाक्षरगणेशपद्धतिः समाप्ता ।

109

Sl. No. 48167 **एकाक्षरीमहालक्ष्मीमहामन्त्रः** **Ms. No. B. 679-12**

Beginning :

अस्य श्री एकाक्षरीमहालक्ष्मीमहामन्त्रस्य । भार्गव ऋषिः । अनुष्टुप् छन्दः । श्री एकाक्षरीमहालक्ष्मीः देवता । श्रीं बीजम् । श्रीं शक्तिः । श्रूं कीलकम् । श्रीएकाक्षरीमहालक्ष्मीप्रसादसिध्यर्थे जपे विनियोगः ॥

End :

लमित्यादि पञ्चपूजा ।

स्तम्भनं चतुरस्रं च मत्स्यं गोखुरमेव च ।
योनिमुद्रेति विख्यातः पञ्चमुद्राः प्रकीर्तिताः ॥

अथ मनुः पुनः षडङ्गं ध्यानं पूजामुद्रा गुह्यातिगुह्यं श्री ।

Colophon :

॥ श्रीरस्तु ॥

110

Sl. No. 48168 **एकादशन्यासः** **Ms. No. C. 2532-18**

Beginning :

श्री गणेशाय नमः । अथ एकादशन्यासः । ऊर्ध्वकेशीति शिखाबन्धनम् । ओं अनन्तासनाय नमः । ओं विमलासनाय नमः । पृथिव्या मेरुपृष्ठऋषिः । कूर्मो देवता । सुतलं छन्दः । आसने विनियोगः ।

End :

सप्तव्याहृतिपूर्वकं श्लोकं कृत्वा ।
महास्तोत्रं जपेत् मन्त्रशुद्धिः ॥
सप्तव्याहृतिसम्पुटितं श्लोकं ।
कृत्वा जपेत् मन्त्रशुद्धिः ॥

Colophon :

॥ इति मन्त्रशुद्धिः ॥
॥ इति दीपदानं सम्पूर्णम् ॥
॥ अथ एकादशन्यासः समाप्तः ॥

111

Sl. No. 48172 **ओड्डीशशास्त्रम्** **Ms. No. P. 2514**

Beginning :

प्रणम्य सर्वलोकेशं भवानीवल्लभं शिवम् ।

ओड्डीश × दिनं शास्त्रं प्रवक्ष्यामि समासतः ॥

नासारन्ध्रद्वयं लि × गोघृतेन ततो मुखे ।
क्षिपेत् बिम्बफलं यस्तंकुयोगेन हि बाधते ॥

End :

अमृतोद्भवाय अमृतं कुरुकुरुस्वाहा ॥
समुध्दृत्य × वृन्ताकं राजवृक्षजम् ॥
निवारयति गेहस्थं वैश्वानरभवंभयम् ॥
रोहिण्यां वटवृन्ताकं कटिस्थं वीर्यवर्धनम्

×× ×× ×× ××

Colophon :

112

Sl. No. 48173 **ओढ्याणपीठनिवासिनीमन्त्रः** **Ms. No. P. 7039-2**

Beginning :

ओं पराशक्ति पराक्षिणि चण्डकपालिनिगोदर्शनभ्रमरिणि अट्टहासिनि ओढ्याणपीठनिवासिनि एह्येहि श्रीं ह्रीं ऐं क्लीं सौः योगिनि

End :

इन्द्रवज्रेण यमदण्डेन गरुडपक्षवातेन सर्वानर्थे आपदः विद्रावय विद्रावय । मां रक्ष रक्ष मम दुरितान् हुं फट् स्वाहा ।

Colophon :

113

Sl. No. 48175 कक्षपुटयन्त्रविधिः Ms. No. P. 3902-5

Beginning :

श्रीदेव्युवाच—

देवदेव महादेव कालान्तक कृतान्तक ।
ओना पूजा मतङ्गाख्या महापीठोपरिस्थिता ॥
अकथ्यमपि देवेशि तव स्नेहाद्वदाम्यहम् ।
यन्त्रं कक्षपुटं वक्ष्ये शृणु सर्वाङ्गसुन्दरि ॥

End :

मूलं :- ओं ऐं ह्रीं श्रीं श्रीं ह्रूं क्लीं त्सीं भुवनाधिपतये नमः । [रुचतिलसिद्धिः]
बार्ण्णमायाकमलामामारमासमुद्धरेत् ।
भुवनाधिपतेः पश्चात् चतुर्थ्यन्त नमाम्यहम् ॥

Colophon :

हरिः ओम् ।

114

Sl. No. 48176 कक्षपुटशास्त्रम् Ms. No, P. 3895-1

Beginning :

अथतो भुवनैश्वर्याः पुरुषार्थहितप्रदम् ।
करुणार्णवकल्लोलहरिरूपपेशलम् ॥
महत् कक्षपुटं शास्त्रं दृष्टप्रक्रियमद्भुतम् ।
महाराज्ञीपदाम्भोज ध्यानामृतनिषेविणाम् ॥

End :

रुद्रसंख्या लेखनस्य × नन्दिनि ।
रकार तौ कास करी वराङ्गाराभयांशुका ॥
कोष्टं प्राथमिकं देवि समारभ्य यथाक्रमम् ।
लिखेत् षोडशकोष्ठेषु रुद्रसंख्या भविष्यति ॥
×× ×× ××

Colophon :

इति श्रीभुवनाधिपत्युः कक्षपुटशास्त्रे मारणक्रियाविवरणं नाम अष्टमः पटलः ।

115

Sl. No. 48180 **कदनरत्नम्** **Ms. No. P. 4538–17**

Beginning :

तकारं स्वरसंयुक्तं तकारेण प्रयोजयेत् ।
उकारेण च संयुक्तं तकारेण प्रयोजयेत् ॥
मत्रो यथा :- जौं जौं जौं फटिति द्रितीय्यमन्त्रम् । जं त्यग्रेण शतं जपेत् ॥
अथ स्तम्भनम् ॥ ततः शत्रूणां मुखस्तम्भनम् । मेघनाद × मुखस्थं तारं वेष्टितं सुधि । परवादि भवादि भवेत् मूकोऽथवातिदिगन्तरम् ।

End :

बं (बीं) अग्निहन्त्री गोषारजादवो जातिना भवो बुहिनानिनदो दिव्य-परिस्तम्भे ईश्वरी महेशाः । ऐते स्तम्भन ईश्वरमहदेव (तुलोहं लिपेत् स

× कृतदोष विशुध्यति) इमं मन्त्रं अयुतं जपेन दिवात्सिद्धिः । बीं लोह प्रज्वल ज्वल ।

Colophon :

इति श्रीनाथभट्टविरचिते कदनरत्ने अग्निस्तम्भनं नाम प्रकरणम् ।

116

Sl. No. 48181 **कपिञ्जलतन्त्रम्** **Ms. No. B. 623-2**

Beginning :

अथ कपिञ्जलतन्त्रम्—

अनाथनाथ भद्रंते कृतानुग्रहदेशिक ।
नैवाभूतिं प्रपश्यामि नदारिद्र्यं न पातकम् ।।

तत्कृपासाधुपूरेस्मिन् विहरन् फलिनेमुदा ।
येनाहं गतसन्देहः करिष्यामि रसक्रियाम् ।।

End :

तदेनतत् कुङ्कुमाकारं सिन्धूरं श्रीकरं परम् ।
सहस्रधिकवेधीस्यात् लोहग्रामे रसेऽपिवा ।।

वर्गमेकादशं शुद्धं ह्येतत् धातुकयीरितम् ।
देहशुद्धिकरं ज्ञेयं जरामरणहारकम् ।।

Colophon :

इति कपिञ्जलतन्त्रे पञ्चमः पटलः ।।

117

Sl. No. 48184 करङ्किणीतन्त्रम् Ms.No.P. 1716-35

Beginning :

नमः फालेक्षणाग्निज्वालाय शशिमौलये ।
पुरान्धकगजध्वंसमेण्डिताय पिनाकिने ।।

करङ्किणीमह × × × शाबरततन्त्रकम् ।
निर्गतं तत्प्रसङ्गेन किञ्चिदुल्लिख्यते म ०। ।।

End :

एकाऽपि चेटिका येन साधितासैव सर्वदा ।
चतस्रस्त्वधिकां शान्ति शेषा? स्त × पैकभूमयः ।।

करङ्किणीमतं तन्त्रं चेटिकानां प्रकीर्तितम् ।।

Colophon :

इति करङ्किणीतन्त्रम्

118

Sl. No. 48187 कर्णयक्षीमहामन्त्रविधिः Ms. No. P. 3897-15

Beginning :

अस्य श्री कर्णयक्षी महामन्त्रस्य आश्वलायनऋषिः । अनुष्टुप् छन्दः । श्री कर्णयक्षी देवाता । क्लां बीजं । कलीं शक्तिः । कर्णयक्षीप्रसादसिद्ध्यर्थे जपे विनियोगः । त्वामित्यादि करहृदयषडङ्गन्यासः ।

End :

नित्यं पूजाकर्तव्या । देवीसान्निध्या सती सर्वाभीष्टं ददाति । भूत-

भविष्यद्वर्तमानकार्यान् सर्वान् सर्वेषां मन्त्रिणः स्कन्धे स्थित्वा प्रतिनिमिषं सर्वदा कर्णान्तं कथयति ।। एवं कर्णयक्षीविधानं एतत्कार्यस्याञ्जनं वक्तव्यम् । तदेव सर्वमूलम् ।

Colophon :

119

Sl. No. 48197 **कात्यायनीमन्त्रः** **Ms. No C. 2093-5**

Beginning :

श्रीभगवानुवाच :-

अतिगुह्यतमं मन्त्रं पृष्टवत्यासि पार्वति ।
भक्तिभावेन ते देवि कथयामि शुचिस्मिते ।।

प्रसन्नतां यथा याति देवी कात्यायनी तथा ।
कवितामतुलैश्वर्यं ददाति पदमुत्तमम् ।।

End :

अष्टाक्षरी महाविद्या सर्वकामफलप्रदा ।
अस्याः पूजादिकं सर्वे पूर्ववच्च समाचरेत् ।।

इति कात्यायनिः । मन्त्रभेदमाह मायेति मायाह्रीं रमाश्रीं कात्यायनी स्वरूपं वह्निभार्यास्वाहा । इत्यष्टाक्षरी ।

Colophon :

श्रीः

120

Sl. No. 48199 कादिमतम् Ms. No. P. 3950-1

Beginning :

भगवान् सर्वतन्त्राणि भवतोक्तानि मे पुरा ।
नित्यानां षोडशानं च नवतन्त्राणि कृत्स्नशः ॥

तेषामन्योन्यसापेक्ष्याज्जायते मतिविभ्रमः ।
तस्मात्तु निरपेक्षं मे तन्त्रं तेषां वद प्रभो ॥

\+ + + +

End :

\+ + + +

यस्तन्त्रमेतत्सकलं नित्यविद्याख्यकं शिवे ।
भक्त्त्या सङ्गृह्य विधिवद्भजते समदर्शकः ॥

× शिवतत्त्वमयी व्याप्तिरिति सम्यक् समीरिता ।
अन्यानि फालना चित्ते तत्तत्संस्यन्महत्कृतम् ॥

इति षोडशनित्यातन्त्रेषु कादिमते षड्विंशः पटलः ।

Colophon :

इति कादिमताख्यं षोडशनित्यातन्त्रं सम्पूर्णम्

121

Sl. No. 48204 कादिमतोक्तमातृकाः Ms. No. C. 2111-8

Beginning:

णोरुरस्तो प्रामच्छवा ।

वीदो यो युजर्नारवा ॥
निर्शनाप्तायास्तश्चव्या ।
मातामतार्णा क्नां रुवा ॥
जह्निः चिम्निः स्तेर्वेशु ।
आतिः वास्वा भाद्युदाशिप्र ॥

End :

कं पाथस्तोयं रसोंऽवुहृत् ।
नामान्येतानि वर्णानां आप्यानां स्युर्यथाक्रमम् ।
विभुः स्वं स्वविरत्रं चयोमशून्यं नभो वियत् ।
हंसश्च नामान्येतानि वर्णाःस्युः व्योमारूपिणः ॥

Colophon :

॥ श्रीः ॥

122

Sl. No. 48207 कामकला **Ms. No. B. 301–1**

Beginning :

सकलभुवनोदयस्थितिलयमयकलाविनोदनोद्युक्ता ।
अन्तर्लीनविमर्शः पातु महेशः प्रकाशमात्र तनुः ॥

End :

साप्येषा मित्रसंज्ञान् स्थानेशान् ज्येष्ठमध्यबालाख्याह्वान् ।
चित्प्राणविषयभूतान् त्रेतायुगदिकारण त्रिगुरून् ।
बीजत्रितयाधिपतीन् परीक्ष्य त्रिद्यां प्रकाशयामास ॥

Colophon :

[चिद्वल्ल्याख्या व्याख्यानसमेता] कामकला सम्पूर्णा ।

123

Sl. No. 48211 **कामकलान्यासः** **Ms. No. P. 8715-4**

Beginning :

गुरुशक्तिखशक्तिं च गुरुज्येष्ठकनिष्ठयोः ।
खज्येष्ठस्यापि चोच्छिष्टं खादे नान्यस्य पार्वति ॥

ऐं ह्रीं श्रीं श्रीं ह्रीं ऐं महातुरीयोऽहं प्रकाशात्मातत्त्वगुणसम्भूतं स्थूलशरीरामिमानिनं —

End :

अनन्तरं द्वितीयखण्डेन अनन्तरं प्रथमखण्डेन तदनन्तरं खण्डत्रयेण मातृकान्यासं करोतीति कुङ्कुमन्यास इति व्हाख्येयं महान्तैः। मुखे स्तद्वये गुह्ये ईं ह्रीं श्रीं महात्रिपुरसुन्दरी परापररूपवक्रस्तनयोन्ये नम इति खण्डत्रयैः सह न्यसेत् । मूलेन सह बीजत्रयेण सह व्यापकं कुर्यात् ॥

Colophon :

इति कामकलान्यासः ।

124

Sl. No. 48220 **कामकलाव्याख्या** **Ms. No. B. 896-B**

Beginning :

वन्दे [illegible] ।

अनुत्तरं परं ज्योतिरितियद्भाव्यते बुधैः ॥

श्रीमते नटनानन्दयोगिने परमात्मने ।
रक्तशुक्लप्रभामिश्रतेजसे गुरवे नमः ॥

पुण्यानन्दमुनीन्द्रात् कामकला नाम विश्रुता जाता ।
आर्या काचिदमुष्या नटनानन्दः करोति सव्याख्याम् ॥

इह हि शक्तिपादसमुन्मिपत्-सकलवेदवेदान्ततात्पर्यनिर्णयविशारदाः + पुण्यानन्दाः + परेषामपि भक्तिभाजां पुरुषाणामुज्जिहीर्षुतया परमात्मैकलक्षणं रक्षणमाशास्ते —

End :

स्थूलत्वं नाम चक्रस्य त्रिकोणादिचतुरश्रपर्यन्तविचृम्भणम् । देवताया अपि त्रिपुराम्बादिपराशक्त्यन्तरूपेण मननम् । एवंविधयोश्चक्रदेवतयोर्न भिदा भेदकारणाभाव दित्यर्थः । तत्र हेतुमाह-सा परैव सूक्ष्मा (इयानेव ग्रन्थः)

Colophon :

125

Sl. No. 48221 कामकला व्याख्या (चिद्विल्ली ; शिवचिद्वल्ली) Ms. No. B. 301–2

Beginning :

वन्दे तन्मिथुनद्वन्द्वमाद्यमानन्दचिद्घनम् ।
अनुत्तरपरञ्ज्योतिरिति यद् भाव्यते बुधैः ॥ १ ॥
पुण्यानन्दमुनीन्द्रात्कामकला नाम विश्रुता जाता ।

आर्या काचिदमुष्या नटनानन्दः करोति सव्याख्याम् ।। ५ ।।

....अत्र पुण्यानन्दयोगिनः .... शिवकामेश्वरीरूपमादावाचक्षते सकले-त्यादिना ....

End :

तथान्यसमयस्याञ्च कुळस्य महदन्तरम् । इत्यादिना कुळदर्शनस्य रूपमभिधाय तन्निष्ठस्यैव मोक्षोनान्यसमयनिष्ठस्येत्याह । एतद् ज्ञात्वा वरारोहे सद्यः खेचरतां व्रजेत ।।

इति श्रीशिवचिद्वल्ली लिखितानन्दरूपिणी ।
व्याख्या कामकलायास्तु शङ्करेण शिवाज्ञया ।।

Colophon :

चिद्वल्ल्याख्या व्याख्या (समेता कामकला) सम्पूर्णा ।

126

Sl. No. 48225 — कामकलाव्याख्या (समूला) (कामकलाविलासः) — Ms. No. P. 2175-1

Beginning :

सकलभुवनोदयस्थितिलयमयवेलाविनोदनोद्युक्तः ।
अन्तर्लीनविमर्शः पातु महेशः प्रकाशमात्रतनुः ।। १ ।।

अथैतस्य भगवान् पुण्यानन्दमुनीन्द्रः सत्सम्प्रदायनिष्ठोत्तंसः करुणापागमाव-धारितयाथार्थ्यविषयभूतविद्याधिदेवताभूतमहात्रिपुरसुन्दरीमन्त्रराजचक्रक्रमं व्याचि-कीर्षतया तदधिष्ठानभूतकामकामेश्वररूपमादाय व्याचष्टे सकलभुवनेति ।

End :

इति कामकलाविलासानुभवपुण्यानन्दमहात्मा एवं वदतीति च प्रतीयते ।

इति शब्दः स्तवसमाप्तिद्योतक इति मन्तव्यम् ।। ४४ ।।

Colophon :

इति श्रीमदद्वैतसमानविलासपुण्यानन्दोदितकामकलाङ्गनाविद्याविलासः सम्पूर्णः ।

127

Sl. No. 48226 **कामकलास्तोत्रम्** **Ms. No. P. 8106–19**

Beginning :

कामकलास्तोत्रम्—

सकलभुवनोदय लतिलय मयलीलाविनोदनोक्तः ।
अन्तर्लीनविमर्शः पातु महेशः प्रकाशमात्रतनुः ।। १ ।।

End :

चित्तात्तरङ्गस्तरङ्गः तृणासलिलः प्रपञ्चवाराशिः ।
यदनुग्रहेणवर्णाः तस्मै श्री नाथनायकाय नमः ।। ५४ ।।

Colophon :

इति श्रीपरमाद्वैत सविमर्श विलास श्रीपुण्यनन्दोदितकामकलाविद्या सम्पूर्णा ।

128

Sl. No. 48230 **कामधेनुकल्पः** **Ms. No. P. 5572–22**

Beginning :

अस्य श्रीकामधेनुमहामन्त्रस्य ।
त्रिभुवनेश्वरं नारायणं नमस्कृत्वा देवं त्रिभुवनेश्वरम् ।

कामधेनुं मनुं वक्ष्ये सर्वसौभाग्यसिद्धिदम् ॥

End :

मुच्यते सर्वपापेभ्यो धेनोश्चैव प्रसादतः ।
जन्मजन्मान्तरे वापि धनधान्यादिसम्पदः ॥

स्वयं वृणन्ति तं प्राप्यतिष्ठन्त्येव न संशयः ।
देहान्ते मुक्तिमाप्नोति विष्णुलोकं सगच्छति ॥

Colophon :

इति श्रीललितातन्त्रे ब्रह्मनारदसंवादे कामधेनोरुपासनं नाम नवमः पटलः ॥

129

Sl. No. 48234 **कामरतिन्यासविधिः** **Ms. No. P. 8032-9**

Beginning :

अस्य श्रीकामरतिन्यासस्य सम्मोहनऋषिः । गायत्री छन्दः । सर्वसम्मोहनमकर-
ध्वजो देवता । क्लीं बीजम् । ईं शक्तिः । स्वाहा कीलकम् । कामरतिप्रीत्यर्थे
विनियोगः । क्लामित्यादिषडङ्गन्यासः + + +

End :

सं मत्तकवृकादरीभ्याम् हं मेघश्यामाभ्याम् क्षं विपुलश्रीभ्याम् ।

मातृकार्णैर्न्यसेद्देवीं मातृकावत्सदानघे ।
अन्नेन व्यासयोगेन त्रैलोक्यक्षोभके भवेत् ॥

Colophon :

130

Sl. No. 48238 कामराजमन्त्रः Ms. No. P. 5852-9

Beginning :

कामराजमन्त्रः -

अस्य श्री कामरारमन्त्रस्य संमोहनऋषिः । गायत्री च्छन्दः । सकलजनमनोवश्यार्थे जपे विनियोगः । क्लां हृदयायनमः । क्लीं शिरसे स्वाहा । क्लूं शिखायै वौषट् । क्लैं कवचायहुम् । क्लौं नेत्रत्र्याय वौषट्—

End :

कामराजायविझहे पुष्पवाणाय धीमहि । तन्नो नन्दः प्रचोदयात् । ओं नमः कामदेवाय सर्वजनप्रियाय सर्वजनसंमोहनाय ज्वलज्वल प्रज्वलप्रज्वल सर्वजन हृदयंमम वश्यं कुरु कुरु स्वाहा ॥

Colophon :

हरिः ओम् ।

131

Sl. No. 48239 कामराजयन्त्रविधिः Ms. No. P. 3897-1

Beginning :

मध्ये मारबीजं विलिख्य, उपरि O वलयं विलिख्य, O वलयादूर्ध्वं अष्टदलानि विलिख्य, दलमध्येषु ह्रीं श्रीं विलिख्य, दलाग्रेषु शूलानि विलिख्य, शूलाग्रेषु ब्लूंकारं विलिख्य—

End :

शिखादि मृगादि शूलादि सर्ववश्यकरं विशेषण स्त्रीवश्यकरं एवं प्रकारं

कामराजयन्त्रं - उद्धारक्रमः । रं हं पं वं यं सं शं इन्द्रादि बीजाक्षाराणि ।

Colophon :

132

Sl. No. 48241 काम्यतर्पणम् **Ms. No. B. 1122-25**

Beginning :

श्रीं विष्णुसहितायै रमायै स्वाहा ।
श्रीं विष्णुसहितां रमां तर्पयामि ।।
|| ४ || मूलेन चतुर्वारम् || ४ ||
श्रीं रामसहिताय विष्णवे स्वाहा ।
श्रीं रामसहितं विष्णुं तर्पयामि || ४ ||
मूलेन चतुर्वारम् || ४ ||

End :

पं वसुमतिसहिताय पद्मनिधये स्वाहा ।
पं वसुमतिसहितं पद्मानिधिं तर्पयामि ।
|| ४ || मूलेन चतुर्वारम् || ४ ||
एवं कृते चतुश्चत्वारिंशदुत्तरसहितं जायते ।

Colophon :

इति काम्यतर्पणविधिः समाप्तः ।

133

Sl. No. 48242 कारुण्यलक्ष्मीमन्त्रः **Ms. No. P. 6068-7**

Beginning :

अस्य श्री कारुण्यलक्ष्मीमन्त्रस्य दन्तवक्रऋषिः । वशमा गायत्री +

छन्दः । कारुण्यलक्ष्मीः देवता । श्रीं बीजम् । स्वाहा शक्तिः । स्वेच्छाभीष्टार्थसिध्यर्थे जपे विनियोगः ।

End :

अमृतकलशपद्मा भीतिदानाग्रहस्तां
प्रणतसुभगदोःश्रीं नौमि कारुण्यलक्ष्मीम् ।

श्रीं ओन्नमो भगवति कारुण्यलक्ष्मि वर वर देवि भूतये स्वाहा ।। २४
सहस्र जपः ।

Colophon :

- श्रीः -

134

Sl. No. 48244 **कार्तवीर्यकवचम्** **Ms. No. C. 3490-1**

Beginning :

पार्वत्युवाच—

कैलासशिखरे रम्ये देवदेवं सनातनम् ।
सच्चिदानन्दमद्वैतं उमाप्रोवाचशङ्करम् ।।

देवदेवजगन्नाथ सर्वज्ञकरुणानिधे ।
कवचं कार्तवीर्यस्य ब्रूहिमे सर्वरक्षकम् ।।

End :

कार्तवीर्यार्जुनोनाम राजा बाहुसहस्रवान् ।
तस्य स्मरणमात्रेण हृतं नष्टं च लभ्यते ।

एतन्मन्त्रं लिखित्वा तु तत्तत्स्थाने निवेशयेत् ।
नष्टप्राप्तिर्भवेत् सत्यं कार्तवीर्यप्रभावतः ।।

Colophon :

इति सुदर्शनसंहितायां कार्तवीर्यार्जुनकवचं नाम पञ्चमोऽध्यायः ।

135

Sl. No. 48246 कार्तवीर्यकवचम् Ms. No. P. 902-3

Beginning :

अस्य श्रीकार्तवीर्यार्जुनकवचस्तोत्र महामन्त्रस्य दत्तात्रेय ऋषिः । अनुष्टुप् छन्दः । कार्तवीर्यार्जुनो देवता । कार्तवीर्यमितिबीजम् सहस्रभुजमण्डलमिति शक्तिः ।

End :

आदौ सम्बोधनं कृत्वा तन्महद्ध्यानपूर्वकम् ।
सत्यन्ते चक्रमन्त्राणां नाचरेद्विज ×× ××
कमचं धारयेत् सुधीः ।

Colophon :

इति श्रीमड्डामरेश्वरविरचिते उमामहेश्वरसंवादे कार्तवीर्यार्जुनकवचं सम्पूर्णम्

136

Sl. No. 48248 कार्तवीर्यमन्त्रविधानम् Ms. No. P. 10741-5

Beginning :

वन्दे शम्भुं सदानन्दं शङ्करं करुणाकरम् ।
चन्द्रार्धचूडमिन्द्राद्यैर्वन्दितं नन्दिवाहनम् ॥

रजताद्रिप्रतीकाशं रजताद्रिनिवासिनम् ।
पप्रच्छ पार्वती शम्भुं गिरीशं गिरिनन्दना ।

श्रीदेव्युवाच—

देवदेव महादेव देवारिबलमर्दन ।
देववर्धन देवेन्द्र वन्दितेन्द्रशिखामणे ॥

कार्तवीर्यमनोर्देव विधानं वक्तुमर्हसि ॥
अरहस्यं महासौख्यं श्रोतुमिच्छामि विस्तरात् ॥

End :

आं ह्रीं क्रों ग्लौं पद्म कार्तवार्य शत्रुक्षयक ॐ प्रों भ्रूं आं ह्रीं घे घे कार्तवीर्य चोरोत्कर्षण । ॐ भ्रों क्ष्रीं कों हुं कार्तवीर्य धनार्जनेगे । ॐ प्रों क्रीं श्रीं स्वाहा कार्तवीरार्जुनाय नमः ।

Colophon :

श्रीसाम्बसदाशिवार्पणमस्तु ।

137

Sl. No. 48250 कार्तवीर्यमहाकवचम् **Ms. No. C. 549-3**

Beginning :

कार्तवीर्यमहाकवच प्रारम्भः ॥

देव्युवाच—

देवदेव महादेव सर्वलोकहितेरत ।
केन रक्षा भवेन्नृणां भीतानां विविधापदि ॥
राजचोरादिपीडासु शस्त्राग्निविषपातने ।

End :

ज्ञानतोऽज्ञानतो वापि श्रद्धयापि वा ।
तस्मात् सर्वप्रयत्नेन कवचं धारयेत् सुधीः ॥

Colophon :

इति श्री उड्डामरतन्त्रे उमामहेश्वरसंवादे कार्तवीर्यमहाकवचं सम्पूर्णम् ।

138

Sl. No. 48251 **कार्तवीर्यार्जुनकल्पः** Ms. No. C. 2681

Beginning :

वन्दे शम्भुं सदानन्दं शङ्करं करुणाकरम् ।
चन्द्रार्धचूडमिन्द्राद्यैर्वन्दितं नन्दिवाहनम् ।

\+ ++ ++

देव्युवाच—

देवदेवमहादेव देवारिबलसूदन ।
देववर्धनदेवेन्द्र वन्दितेन्द्रशिखामणे ॥

कार्तवीर्यस्य मन्त्रस्य विधानं वक्तुमर्हसि ।
तद्रहस्यं महापुण्यं श्रोतुमिच्छामि विस्तरात् ।

End :

इन्द्राद्यैः पञ्चमावरणम् । एवं पञ्चावरणसहितं देवं संपूज्य षोडशोपचार-
पूजां कृत्वा यथाशक्तिः मूलमन्त्रजपं कृत्वा स्तोत्रपठनं कुर्यात् ।

Colophon :

इति श्री उड्डामरेश्वरतन्त्रे उमामहेश्वरसंवादे रहस्ये कार्तवीर्याजुनकल्पं सम्पूर्णम् ।

139

Sl. No. 48252 कार्तवीर्यार्जुनकल्पः **Ms. No. C. 2684**

Beginning :

कश्यप उवाच—

दत्तात्रेयमहाप्राज्ञ सर्वज्ञकरुणाकर ।
श्रोतुमिच्छामि तत्त्वज्ञ कार्तवीर्यस्य वैभवम् ।

दत्तात्रेय उवाच—

गङ्गायाः दक्षिणे भागे रेवायां च नदीतटे ।
महिष्मती नाम पुरे हैहये राजवंशजम् ।

End :

आत्ममन्त्रान् प्रवोधय प्रवोधय जटापट्टजहि जटापट्टजहि ह्रां ह्रीं हुं उं महा मण्डलेश्वराय हैहयवंशवर्धनाय कार्तवीर्याजुनाय सहस्रबाहवे ह्रां ह्रूीं ह्रूं ह्रैं ह्रः धीरधीराजुहुं फट्र निशङ्कयविषं स्वाहा ।

Colophon :

इति श्रीविष्णुधर्मोक्तकार्तवीर्याजुनकल्पः सम्पूर्णः ।

140

Sl. No. 48256 कार्तवीर्यार्जुनकवचम् **Ms. No. P. 6713–1**

दलेष्वक्षरविन्यस्तं त्रिधा पाशेन वेष्टितम् ।
सर्वसर्पविषं हन्ति स्तम्भनं मूलयन्त्रकम् ॥

Colophon :

इति श्री काश्यपीये विनियोगविधिः द्वितीयोऽध्यायः ।

23

Sl. No. 48623 गीताशास्त्रमन्त्रः Ms. No. P. 8749-2

Beginning :

अस्य श्रीगीताशास्त्रमहामन्त्रस्य श्रीवेदव्यासो भगवान् ऋषिः । प्रायेणा-
नुष्टुप् छन्दः । + + + श्रीकृष्णप्रीत्यर्थे जपे विनियोगः ।

End :

यो गीतानां समूहेन स्तोतुमिच्छति पाण्डव ।
स एभिः कु × भिश्लोकैः स्तुत एव न संशयः ॥

हृदि विनिहितपद्मं सार्कसोमाग्नि बिम्बं
प्रणवनयनुसारं यस्य पीठं प्रकल्प्य ।
अचलमपरसूक्ष्मं ज्योतिराकाशसारे
स भवतु मनसा मे वासुदेवप्रतिष्ठाम् ॥
पञ्चपूजां कुर्यात् ।

Colophon :

238

Sl. No. 48627 गुरुजपलक्षणम् Ms.No. C. 3780-22

Beginning :

अथुना आपद्नवं वक्ष्ये गुरूणां सारमुत्तमम् ।

गद्यपद्यात्मिकाविद्या परमहंसस्य दैवतम् ।
ब्राह्मो मुहूर्ते शयनतलादुत्थाय हस्तपादौ प्रक्षाल्य निजासने समुपविश्य
+ + + + + श्री अमुकानन्दनाथश्रीपादुकां पूजयामि ।

End :

महानैवेद्यं देवस्य पुरतो दत्वा —
होमपात्रं गतं परमान्नं सुसुस्मृतम्(?) ॥
पञ्चधा षड्सोपेतं गृहाण मम सिद्धिद ।
ततः कवचसहस्रनामस्तवराजपाठादिकं कृत्वा यथेच्छं विहरेत् ।

Colophon :

इति श्रीरुद्रयामले उत्तरतन्त्रे परमहंसोपाख्याने उमामहेश्वरसंवादे
श्रीगुरुजपलक्षणं सम्पूर्णम् ।

239

Sl. No. 48631 **गुरुनमस्कारग्रन्थः** Ms. No. B. 951-2

Beginning :

अथ गुरुनमस्कारग्रन्थो लिख्यते—
कैलासशिखरे रम्ये देवदेवं महेश्वम् ।
प्रणिपत्य महादेवं पप्रच्छ गिरिजा मुदा ॥
+ + + +
श्रीमहादेव उवाच—
शृणु देवि प्रवक्ष्यामि नराणां हितकाम्यया ।
गुरुपद्धतिनमस्कारं त्रैलोक्येष्वपि दुर्लभम् ॥

End :

श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवं

सिद्धेभ्यो बटुकत्रयं पदयुगं द्युतिक्रमं शाम्भवम् ।
वीरे चाष्टचतुष्कपष्टि ःकं वीरावलीपञ्चकं
श्रीमन्मालिनिमन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ॥

Colophon :

इति श्रीपद्मपुराणे ईश्वरपार्वतीसंवादे गुरुपद्धतिनमस्कारग्रन्थस्सम्पूर्णः ।

240

Sl. No. 48632 गुरुपरम्परास्तोत्रम् Ms. No. P. 6355-3

Beginning :

श्रीसाम्बगुरुवर्याद्यामस्मदाचार्यमध्यगाम् ।
अस्मदाचार्यपर्यन्तं वन्दे गुरुपरम्पराम् ॥

पाशाङ्कुशधनुर्बाणपाणिमर्कायुतप्रभम् ।
किंशुकाभां शुकां वन्दे देशिकावलिमाश्रये ॥ ३ ॥

End :

श्रीनाथादिगुरुत्रयं गणपतिं × रत्रयं भैरवं
सिद्धौघं बटुकत्रयं पदयुगं दूतिक्रमं मण्डलम् ।
वीराद्यष्टचतुष्कषष्टिनवकं वीरावलीपञ्चकं
श्रीमन्मालिनिमन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ॥

Colophon :

इति व्याख्या समाप्ता ।

241

Sl. No. 48633 **गुरुपादुकापूजाविधिः** Ms. No. P. 2063-2

Beginning :

समस्तप्रकटगुप्तगुप्ततरसम्प्रदायकुलकौलिनीगर्भरहस्यातिरहस्यपराशररहस्ययो-
गिनी श्रीपादुकेभ्यो नमः ।

गु गुरुभ्यो नमः । गं गणपतये नमः ।
दु दुर्गायै नमः । क्षं क्षेत्रपालाय नमः ।

यों योगिनीभ्यो नमः । ओं वटुकभैरवाय नमः । सं सरस्वत्यै नमः ।
पंपरमात्मने नमः ।

End :

आदौ गुरुं नमस्कृत्य गुरुपादार्चनं शिवे ।
गुरुं प्रदक्षिणीकृत्य गुरुपात्रं निवेदयेत् ॥

करे गुरूणां दातव्यं अभावे यदि × रिणाम् ।
तदभावे स्वयं पेयं गुरुबुद्ध्या न पापवान् ॥

गुरुपात्रं देशिकस्य दत्त्वा तां योगिनीं ततः ।
आयाहि ×× ×× ×× ×× ॥

Colophon :

242

Sl. No. 48640 **गुरुपूजाविधिः** Ms. No. P. 5002-86

Beginning :

अथ गुरुपूजा ।

अखण्डगु × नमः ॥

निजस्तुतिनमस्कार निरस्तदुरहङ्कृते ।
कुलागमरहस्याय बहिर्निर्वेद्यरूपिणे ॥
नमस्ते गुरुनाथाय गुरवे कुसुमाञ्जलिः ।

End :

चिदचिद्रूपरूपाय रूपातीतस्वरूपिणे ।
सच्चिदानन्दरूपाय गुरवे कुसुमाञ्जलिः ॥
सच्चिदानन्दसम्पूर्णनिष्यन्दामृतसिन्धवे ।
नमोस्तु गुरवे नित्यं स्वस्वरूपविधायिने ॥
गुरवे परब्रह्मणे नमः ॥

Colophon :

हरिः ओम् ।

243

Sl. No. 48641 **गुरुमण्डलपूजाविधिः** **Ms. No. C. 3494-9**

Beginning :

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥
गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नमः ।

End :

श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवं

सिद्धौघं वटुकत्रयं पदयुगं दूतीक्रम मण्डलम् ।
वीराद्यष्टचतुष्कषष्टिनवकं वीरावलीपञ्चकं
श्रीमन्मालिनिमन्त्रराजसहित वन्दे गुरोर्मण्डलम् ॥

Colophon :

॥ श्री ॥

244

Sl. No. 48646 **गुरुमन्त्रः** Ms. No. P. 6952-15

Beginning :

शिवाय गुरुरूपाय नमो मुद्राः प्रदश्यवे ।
सिद्धानन्दगुरोराज्ञां अवलम्ब्य स्वमूर्धनि ॥
हंसानन्दमुनिर्वक्ति दीक्षां निर्वाणसंज्ञिकाम् ॥

End :

परात्परं वाग्भवमन्त्रबीजं सुधारसम्योत्तमकामराजम् ।
परात्परं शक्तिशिवं तृतीयसव्यापसव्यं प्रणमामि नित्यम् ॥

Colophon :

श्रीः

245

Sl. No. 48656 **गोपालकृष्णमन्त्रविधिः** Ms. No. C. 3494-22

Beginning :

अस्य श्री गोपालकृष्णमहामन्त्रस्य नारदभगवान् ऋषिः । अनुष्टुप्

छन्दः । श्रीगोपलकृष्णः परमात्मा देवता । क्लीं बीजम् । ह्रीं शक्तिः । श्रीं कीलकम् । श्रीगोपालकृष्णप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

देवकीसुत गोविन्द वासुदेव जगत्पते ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥
आं क्लीं कृष्णाय नमः । इति जपः ।
वासुदेवाय विद्महे शुद्धसत्त्वाधिष्ण्याय धीमहि । तन्नः कृष्णः प्रचोदयात् ।
न्यासध्यानं पूर्ववत् । गुह्येति च समर्पणम् ।

Colophon :

इति गोपालकृष्णमन्त्रविधिः ।

246

Sl. No. 48665 **गोपालमन्त्रः** **Ms. No. C. 696-36**

Beginning :

सनत्कुमारं योगीन्द्रं सिद्धाश्रमनिवासिनम् ।
ब्रह्मनिष्ठमुनिं शान्तं प्रसन्नादित्यवर्चसम् ॥

विनयेन समभ्यर्च्य शिरसा प्रणिपत्य च ।
नारदः परिपप्रच्छ देवर्षिः सर्वकालवित् ॥ +

साधु पृष्टं त्वया ब्रह्मन् नारद ब्रह्मणो मुखात् ।
श्रुतं मया महाभाग नारदं परिपृच्छता ॥

गोपालविषया मन्त्रास्त्रयस्त्रिंशदुदाहृताः ।
तेषु मन्त्रेषु सर्वेषु मन्त्रराजमिमं शृणु ॥

End :

ध्यात्वा नित्यं जपेन्मन्त्रं मोक्षार्थी त्रिसहस्रकम् ।
संसारसागरं तीर्त्वा याति विष्णोः परं पदम् ॥
बहुना किमिहोक्तेन धर्मकामार्थमोक्षदम् ।
मन्त्रमेतत्समाख्यातं किं भूयः श्रोतुमिच्छसि ॥

Colophon :

इति श्री सनत्कुमारसंहितायां प्रथमः पटलः ।

247

Sl. No. 48667 **गौरीपञ्चाक्षरी** **Ms. No. P. 8429-1**

Beginning :

अस्य श्री गौरीपञ्चाक्षरीमहामन्त्रस्य वामदेवऋषिः । पङ्क्तिः छन्दः ।
श्रीगौरीसाम्बसदाशिवो देवता । ह्वः बीजम् । ह्रीं शक्तिः । ह्रूं कीलकम् ।
श्रीगौरीसाम्बसदाशिवप्रीत्यर्थे जपे विनियोगः ॥

End :

नमस्ते गिरिजादेवि नमस्ते लोकनायकि ।
शरण्ये त्र्यंबके देवि महागौरि नमोऽस्तु ते ॥ नमस्कारः ।
सौमङ्गल्यं सदा देवि पुत्रपौत्रप्रवर्धनम् ।
आयुरारोग्यमैश्वर्यं दीयतां मे महेश्वरि ॥
प्रार्थनम् । यस्य स्मृत्येति क्षमापणम् ।

Colophon :

248

Sl. No. 48672 **गौरीपञ्चाक्षरी** **Ms. No. B. 1122–8**

Beginning :

अस्य श्री गौरीपञ्चाक्षरीमहामन्त्रस्य वामदेव ऋषिः । पङ्क्तिःछन्दः । श्रीभवानी गौरी देवता । ह्रीं बीजम् । नमः शक्तिः । गौर्यै कीलकम् । मम श्रीगौरीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

कैलासवासिनीं देवीं हेमाभां कमलासनाम् ।
भक्तानां वरदां नित्यं गौरीं तां चिन्तयाम्यहम् ॥
अमरीकबरीभारभ्रमरीमुखरीकृतम् ।
दूरीकरोतु दुरितं गौरीचरणपङ्कजम् ॥

पञ्चपूजा । मनुः ह्रीं श्रीं नमो गौर्यै उत्तरन्यासं कृत्वा समर्पणम् ।

Colophon :

249

Sl. No. 48676 **गौरीमन्त्रः** **Ms. No. P. 3584–18**

Beginning :

आदौ गणपतिध्यानम् ।

अस्य श्री गौरीपञ्चाक्षरमहामन्त्रस्य वामदेव ऋषिः । पङ्क्तिः छन्दः । ह्रां बीजम् । ह्रीं शक्तिः । ह्रूं कीलकम् । गौरी प्रसादार्थे जपे विनियोगः ।

End :

कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ।
सदा रमन्तं हृदयारविन्दे भवं भवानीं सहितं नमामि ॥
लमित्यादिपञ्चपूजा .... लोकत्रयेण तद्विमोक्षः ।

Colophon :

॥ श्रीः ॥

250

Sl. No. 48679 ग्रहन्यासविधिः Ms. No. P. 5002–51

Beginning :

अथ ग्रहन्यासः । ऐं ह्रां श्रीं अं १५ ह्रां सूर्याय भगवते रेणुकाम्बाय नमः । हृदधः रक्तवर्णध्यानम् । ऐं ह्रीं श्रीं यं रं लं वं सं सोमाय भगवते अमृताम्बायै नमः इति भ्रूमध्ये श्वेतवर्णध्यानम् ।

End :

ग्रहन्यासेन यस्यैवं शरीरं तत्तु विन्यसेत् ।
ग्रहकर्तृकदुःखेभ्यो मुच्यते स स्वयं प्रिये ॥

पापग्रहाश्च शुभदाः ग्रहन्यासश्च पुण्यतः ।
एतस्यापि न माहात्म्यं वक्तुं शक्नोमि पार्वति ॥

Colophon :

॥ श्रीः ॥

251

Sl. No. 48686 घटचक्रम् Ms. No. C. 204

Beginning :

परं पद । परमध्ये शिव । शिवमध्ये शक्ति । शक्तिमध्ये नाद । नादान्तविन्दु । विंदुंत ? सदाशिव । सदाशिवांत महेश्वर । महेश्वरांत रुद्र ।

En :

जगदात्मा विठलमाझे वोबडया भाषणा नें संतोषपावो ह्मणु नहाग्रन्थत्याचे - चरणीं अर्पिला । आणि त या विठलचे पदसारसीं मिळिन्दायमान मन्मरुंजी धालिर्ते येणें करूनपाण्डुरङ्ग संतोषपाऊन संतत मध्द्दयीं बसो ।

Colophon :

इति श्री घटकचक्रग्रन्थः सम्पूर्णः

252

Sl. No. 48690 चक्रार्चनपद्धतिः Ms. No. C.4234

Beginning:

जगदम्बायै नमः । परशुरामसूत्रोक्तरीत्या अर्चनपद्धतिः । गुरुर्ब्रह्मा + + + + नमः ।

श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवं ।
सिद्धौघं वटुकत्रयं .... मण्डलम् ।।
अस्मादाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ।

End :

विशेषार्घ्यमामस्तकमुध्दत्य पात्रान्तरेण आर्द्रं ज्वलति कुण्डलिन्यां हुत्वा

प्रियशिष्याय वा दद्यात् । प्रक्षाल्य प्रताप्य स्थापयेत् । यथाशक्ति विप्रादीन् भोजयेत् ।

Colophon:

इति नित्यक्रमः ।

253

Sl. No. 48693 चण्डिकापद्धतिः Ms. No. B. 669

Beginning :

अस्य श्री नवार्णवमहामन्त्रस्य ब्रह्मविष्णुमहेश्वरा: ऋषयः । श्रीमहाकाली महालक्ष्मी महासरस्वत्यो देवताः । गायत्र्युष्णिगनुष्टुप् छन्दांसि । नन्दा शाकम्भरीभीमाः शक्तयः । रक्तदन्तिकादुर्गाभ्रामर्यो बीजानि । श्रीं ह्रीं क्लीं कीलकम् ।

End :

हेमप्रख्यामिन्दुखण्डान्तमौलिं
शङ्खारिष्टाभीतिहस्तां त्रिनेत्राम् ।
हेमाब्जस्थां पीतकौशेयवासां
देवीं दुर्गां दिव्यरूपां नमामि ॥
....विश्वेश्वरीं जगद्धात्रीं विश्वेश्वरीत्वम् नमो देव्यै ॥

Colophon :

इति श्री चण्डीपद्धतिः समाप्तः ।

254

Sl. No. 48700 चण्डिकासपर्याक्रमवल्ली Ms. No. C. 3912

Beginning :

अथ प्रयोगः । तत्र श्रीमान्साधको रजनी तुर्ययामे विबुध्यावश्यकं कृत्वा

हस्तौ पादौ प्रक्षाल्य धौतवाससी परिधायाचम्य स्वासने समुपविश्य स्वशिरसि श्वेतसहस्रारविन्दं गुरुचरणारविन्दं ध्यात्वा—
नमोस्तु गुरवे तस्मै इष्टदेविस्वरूपिणे ।
यस्य वागमृतं हन्ति विषं संसारसंज्ञकम् ॥ इति प्रणम्य मानसोपचारैः संपूज्य—

End :

यस्य स्मरणमात्रेण विघ्नानां जायते क्षयः ।
त्रिषु लोकेषु यत्किञ्चित् सुरासुरसुदुर्लभम् ॥

तत्सर्वं तत्समायाति महालक्ष्मी प्रसादतः ।
यो जयेत्परया भक्त्या महालक्ष्म्यास्तु पूजनम् ॥
स नरो लभते नित्यं पूजाफलमनुत्तमम् ।

Colophon :

इति श्रीमत्सपर्याक्रमवल्यां नित्यपूजाविधिप्रयोगः सम्पूर्णः ।

25८

Sl. No. 48716 **चतुरङ्गविधिः** **Ms. No. P· 4925-52**

Beginning :

अथ सर्वमन्त्रसाधारणचतुरङ्गविधिर्लिख्यते—

जपं च तर्पणं होमं ब्राह्मणाराधनं तथा ।
चतुरङ्गमिति ख्यातं तस्माद्यत्नेन कारयेत् ॥

स्वात्मनाथमुखान्मन्त्रं शुश्रुवे विधिवद्यथा ।
तदादिसिद्धिपर्यन्तं गर्भस्था मन्त्रदेवता: ॥

End :

विधिनोक्तेन होमेन मन्त्रदेवः प्रभुर्भवेत् ।
सर्वाधिकं प्रभुत्वं यत् तृतीयाङ्गमुदाहृतम् ॥

ब्राह्मणाराधनाद्देवो दयावान् वरदो भवेत् ।
तेन लब्धं प्रसादं यत्तच्चतुर्थाङ्गमुदाहृतम् ॥
मन्त्रिणा मन्त्रसिध्यर्थं चतुरङ्गमुदाहृतम् ।

Colophon :

256

Sl. No. 48718 चतुरासनन्यासः **Ms. No. B. 1110-9**

Beginning :

अथ चतुरासनन्यासः ।

ऐं ह्रीं श्रीं क्लीं साः देव्यात्म × नाय नमः । इति स्वस्य मूलाधारे न्यसेत् । ऐं ह्रीं श्रीं हक्लीं ह्रौं ह्रीं चक्रासनाय नमः ॥

End :

ऐं ह्रीं श्रीं हसौं (?) हक्लां ह्राः सर्वमन्त्रासनाय नमः । ऐं ह्रीं श्रीं क्लीं ब्लीं साध्यसिद्धासनाय नमः । इति त्रिभिर्मन्त्रैः मुहुः पुष्पाक्षतेन चक्रमन्त्रदेवतासनानि न्यसेत् ।

Colophon :

257

Sl. No. 48726 **चन्द्रज्ञानागमसङ्ग्रः** **Ms. No. P. 3902-1**

Beginning :

अथातः सम्प्रवक्ष्यामः त्रिपुराण्डस्य लक्षणम् ।
यदुक्तं पूर्वमस्तीति शाक्तमण्डं हिरण्मयम् ॥

अनेककोटिब्रह्माण्डकोटीनां बहिरुद्धतः ।
अस्ति बालकिकोस्याभं त्रिपुराण्डं हिरण्मयम् ॥

End :

तत्त्वमेव विजानीयात् साक्षात् सत्यं कुलेश्वरी ।
एवं विन्यस्य देहे तु ध्यात्वा पश्चान्महेश्वरीम् ॥

यथाशक्ति जपेन्मन्त्रं स्मरेच्छिरसि पादुकाम् ।

Colophon :

इति श्री चन्द्रज्ञानागमसङ्ग्रहे श्रीविद्यान्यासकलान्यासं
नाम सप्तमः पटलः । त्रिपुराण्डलक्षणं सम्पूर्णम् ।

258

Sl. No. 48727 **चन्द्रमालामन्त्रः** **Ms. No. C. 3582-3**

Beginning :

अस्य श्रीचन्द्रमालामन्त्रस्य अत्रिऋषिः । चन्द्रो देवता । सौं बीजम् ।
स्वाहेति कीलकम् । श्रीचन्द्रप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

मालामन्त्रमधीयानः श्रद्धाभक्तिसमन्वितः ।
सर्वान्कामानवाप्नोति शशाङ्कस्य प्रसादतः ॥

Colophon :

इति श्री ब्रह्माण्डपुराणे चन्द्रमालामन्त्रं सम्पूर्णम् ।

259

Sl. No. 48729 **चम्पकन्यासविधिः** **Ms. No. P. 5002–75**

Beginning :

मूलमन्त्रविधानं तु प्रवक्ष्याम्यनुपूर्वकम् ।
सर्वं सङ्कल्पसंसिद्धि स तथा ज्ञानतो भवेत् ॥
नवावरणदेवीनां ललितायां महौजसः ।
एकत्र गणना रूपा वेदवेदान्तगोचरः ॥

End :

तटिल्लेखा तन्वं ति ध्यात्वा ऐं ह्रीं श्रीं ओं नमस्त्रिपुरसुन्दरीहृदयदेवि शिरोदेवीत्यादि श्रीमहाचक्रनगरसाम्राज्ञि नमस्ते नमस्ते स्वाहेति पुनः ओं श्रीं ह्रीं ऐं एवं क्रमेण पञ्चदशमालां जपेत् ।

Colophon :

हरिः ओम् ।

260

Sl. No. 48739 चामुण्डीवज्रकवचमालामन्त्रः Ms. No. C. 4592-5

Beginning :

अस्य श्री वज्रकवचमालामन्त्रस्य ब्रह्मा ऋषिः । चामुण्डी देवता ।
अनुष्टुप् छन्दः । + − + + श्रीचामुण्डिकाप्रीत्यर्थं जपे विनियोगः ।

मार्कण्डेय उवाच :—

यद्गुह्य परमं लोके सर्वरक्षाकरं नृणाम् ।
यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥ १ ॥

End :

यावद्भूमण्डलं धत्ते सशैलवनकाननम् ॥ ५६ ॥
तावत्तिष्ठति मेदिन्यां सन्ततिः पुत्रपौत्रिकी ।
दाहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ॥ ५७ ॥
सम्प्राम्नोति मनुष्योऽसौ महामायाप्रसादतः ॥ ५८ ॥

Colophon :

इति श्री हरिहरब्रह्मविरचितं देव्याः कवचं सम्पूर्णम् ।
श्रीदेव्यार्पणमस्तु ।

261

Sl. No. 48741 चिन्तामणिगणपतिमहामन्त्रः Ms. No. B. 1122-11

Beginning :

अस्य श्री चिन्तामणिगणपतिमहामन्त्रस्य गणकऋषिः । तृचद्गायत्री
छन्दः । चिन्तामणिगणपतिः देवता । अं बीजम् । उं शक्तिः । मं कीलकम् ।
चिन्तामणिगणपतिप्रसादसिद्ध्यर्थे जपे विनियोगः । गमिति षडङ्गन्यासः ।

End :

ध्यानम् :—

रक्तो रक्ताङ्गरागो शुककुसुमयुतः तुण्डिलश्चन्द्रमौलिः
नेत्रैर्युक्तस्त्रिभिर्वामनकरचरणो(?) बीजपूरान्तनागः ।
हस्ताग्रन्यस्तपाशाङ्कुशरदनो नागवक्त्रोऽहिभूषो
देवः पद्मासनस्थो भवतु सुखकरो भूतये विघ्नराजः ॥
मनुः ओं गं गणपतये नमः । न्यासध्यानादिकं पूर्ववत् ।

Colophon :

262

Sl. No. 48742 चित्रसेनगन्धर्वमन्त्रः Ms. No. P. 4718–14

Beginning :

श्रीदत्त ॥ ?मोद्वाहप्रतिबन्धनिरसनेन अविलम्बितं विवाहयोगसिद्ध्यर्थं चित्रसेनगन्धर्वमन्त्रजपं करिष्ये ॥

अस्य श्री चित्रसेनमन्त्रस्य । ब्रह्मा ऋषिः । शिरसि । गायत्री छन्दः । मुखे ।

End :

ध्यानम् :—

तन्त्रीलयसमायुक्तं कन्याभिः परिवारितम् ।
चित्रसेनाख्यगन्धर्वं ध्यायाम्युद्वाहसिद्धये ॥

ओं श्रीं ह्रीं क्लीं राजनागानाश्रयचित्रसेन कन्यां प्रयच्छ स्वाहा । जपसंख्या १००००० ।

Colophon :

श्रीसद्गुरुवासुदेवानन्दमहाराजार्पणमस्तु ।

263

Sl. No. 48747 **चिद्गगनचन्द्रिका** **Ms. No. B. 368**

Beginning :

क्षीरोदं पौर्णमासी शशधर इ × यः प्रस्फुरन्निस्तरङ्गं
चिद्व्योमस्फारनादं रुचिविसरलसद्बिन्दुवृत्त्यूर्मिमूलम् ।
आद्यस्पन्दस्वरूपः प्रथयति सकृदोङ्कारशुण्डः क्रियाद-
ग्दन्तस्सोऽयं हराद्यः शमयतु दुरितं शक्तिजन्मा गणेशः ॥ १ ॥

End :

अम्बिसव × × × रुचिमिश्रणी समे
रक्तमुल्लसति तावकं वपुः ।
श्यामनीलतनुताञ्जनेऽधिके
पीतशुक्लतनुता च ते रुचौ ॥ १७७ ॥
भास्वरे वपुषि सर्वगे तव स्पष्टमण्डननिवहे निमज्जति ।
कालवह्यधिकृताशिवे यथा तत्समुल्लसति दीप्तिपञ्जरे ॥

Colophon :

गुरुदत्तात्रेयार्पणमस्तु ।

264

Sl. No. 48750 **जगत्क्षोभणमन्त्रविधिः** **Ms. No. P. 4252–29**

Beginning :

अथ शृणु कथयामः प्रार्थ्यमानं मुनीन्द्रैः

अधिगतरिपुलोकानद्दता नाद्दतास्त्रा ।
हरिविधिमुखवीरानप्रमेयानुसह्या-
नपि भुविमृतयो यान्(?) यत्करोति हुतं तत् ।।

End :

सर्वलोकाश्च कम्पन्ते किं पुनः शत्रुभाविनाम् ।
किमत्र बहुनोक्तेन वक्ष्याम्यद्य यथातथम् ॥
मन्त्रस्मरणमात्रेण शरभांशो भवेत् स्वयम् ।।

Colophon :

इति आकाशभैरवकल्पे जगत्क्षोभणमन्त्रं नाम द्वात्रिंशोऽध्यायः ।

265

Sl. No. 48756 **जपनैरन्तर्यविधिः** **Ms. No. P. 4925–12**

Beginning :

नैरन्तर्यविधिः प्रोक्तः न प्रतिलङ्घयेत् (?)।
दिवसातिक्रमात्पुंसो मन्त्रसिद्धिर्भवेन्न हि ॥
दिनमेकं परित्यज्य मन्त्रसिद्धिर्न जायते ।
यावत्सङ्ख्याविहीनोऽपि यथाशक्ति जपेन्मनुम् ॥

End :

तस्मात्सर्वप्रयत्नेन प्रत्यहं जपमाचरेत् ।
सूतके मृतके वापि मनसा संस्मरेन्मनुम् ॥
गुरुत्यागाद्भवेन्मृत्युर्मन्त्रत्यागाद्दरिद्रता ।
गुरुमन्त्रपरित्यागाद्रौरवं नरकं व्रजेत् ।।

तस्मान्नित्यं जपेन्मन्त्रं तर्पणं तु दिनत्रये ।
होमन्तु सप्तरात्रे तु दशमे विप्रभोजनम् ॥

Colophon

266

Sl. No. 48761 **जपविधिः** **Ms.No. P.4925-55**

Beginning :

श्रीनारदः—

जपेत्तु तुलसीकाष्ठैः फलमक्षयमुच्यते ।
अथाङ्गुलिभिरेवापि जपमन्वहमाचरेत् ॥

भारद्वाजः—

मण्यन्तरे ग्रन्थ्यभावान्मिथः सङ्कर्षणात्तयोः ।
तेनैव जपनाशस्स्याद्ग्रन्थिं कुर्यात्ततः शुभम् ॥
+ + + +

End :

ब्रह्मा—

तर्जन्या न स्पृशेत्तत्र कम्पयेन्न च धूनयेत् ।
अङ्गुलस्य तु मध्यस्थे परीवचनमाचरेत् ॥

मध्ययाकर्षणं तस्याः सर्वसिद्धिप्रदायकम् ।
नान्याङ्गुलिभिराकर्षेन्न नखैस्तु तथा स्पृशेत् ॥

उल्लङ्घिते तथा मेरौ पतिते चाक्षसूत्रके ।

प्राणायामशतं कृत्वा घृतप्राशनमाचरेत् ।।

Colophon :

इति सुधीविलोचने ।

267

Sl. No. 48769 जपासनविधिः **Ms. No. P. 4925-32**

Beginning :

आसनस्थो जपेत्सम्यक् मन्त्रार्थगतमानसः ।
कौशेयं चर्मवैय्याघ्रं चैलं नैलमथापि वा ।।
दारवं तालपत्रं वा काम्बलं दार्भमासनम् ।
शय्येष्टकाश्म धरणीतृणपल्लवनिर्मितम् ।।
वर्जयेदासनं मन्त्री दारिद्र्यव्याधिदुःखदम् ।।

\+ \+ \+ \+

End :

ऊर्वोरुपरि विप्रेन्द्र कृत्वा पादतले उभे ।
पद्मासनं भवेदेतत्सर्वेषामपि पूजितम् ।।
सम्पीड्य सीवनीं सूक्ष्मा गुल्फेनैव तु सव्यतः ।
सव्यं दक्षिणगुल्फेन मुक्तासनमुदीरितम् ।।
एवमासनयुक्तः सन् भूतशुद्धिं समाचरेत् ।।

Colophon :

268

Sl. No. 48770 **जपोच्चारणादिप्रायश्चित्तम्** **Ms. No. P. 4925-45**

Beginning :

स्मृतिसारे—

सकृदुच्चरिते शब्दे प्रणवं समुदीरयेत् ।
प्रोक्ते पामरवाक्ये तु प्राणायामान् समाचरेत् ॥
बहुप्रलापे चाचम्य न्यस्याङ्गानि ततो जपेत् ।

End :

उपानद्रूढपादो वा यानशय्यागतस्तथा ।
प्रसार्य न जपेत्पादौ विकटासन एव वा ॥
नादीक्षितो विशेज्जातु कृष्णसाराजिने गृही ।
विशेद्यतिर्वनस्थश्च ब्रह्मचारी च स्नातकः ॥
विक्षेपादथवालस्याज्जपहोमार्चनान्तरा ।
उ....तितदान्यासं षडङ्गं विन्यसेत्पुनः ॥

Colophon :

269

Sl. No. 48773 **जयदुर्गामन्त्रः** **Ms. No. P. 10739-2**

Beginning :

जयदुर्गामन्त्रः । स च तारादिसम्बुध्यन्तदुर्गापदद्वयपक्षरक्षतिपदद्वयोपेत-वन्हिजायान्तः । अस्य नारदऋषिः । विराट् छन्दः । जयदुर्गा देवता । प्रणवो बीजम् ।

End :

पूजाविधानं दुर्गाष्टाक्षरवत् । पञ्चलक्षजपः । पुरश्चरणम् । आज्येन × × स होमः ।

युद्धे वा व्यवहारे वा जपन्विजयमाप्नुयात् ।
एतन्मन्त्राभिजप्तैस्तु शस्त्रैर्विजयमाप्नुयात् ॥

Colophon :

श्रीगुरुप्रकाशः ।

270

Sl. No. 48775 **जलयन्त्रम्** **Ms. No. B. 1122–34**

Beginning :

आदौ त्रिकोणमालिख्य तन्मध्ये प्रणवं लिखेत् ।
कोणाग्रे प्रणवं लेख्यं दण्डेषु व्याहृतित्रयम् ॥
तत्पार्श्वे त्रिपदालिख्य प्रणवेन तु वेष्टयेत् ॥

End :

तत्पृष्ठा(?) वेदजननीं दशकृत्वा जपेद्बुधः ।
ततो मुद्रां प्रदर्श्याथ ततः सर्वं समाचरेत् ॥
अमृतचक्रयो(?) मुद्रां प्रदर्श्य ॥

Colophon :

इति जलयन्त्रम् ।

271

Sl. No. 48776 जयलक्ष्मीयन्त्रविधिः Ms. No. P. 2551-4

Beginning :

अथ वक्ष्ये महायन्त्रं महालक्ष्म्या शुभप्रदम् ।
त्रिकोणं चाथ षट्कोणं वृत्तमष्टदलं तथा ॥
त × × पदलं चैव द्वात्रिंशद्दलमेव च ।
चतुष्षष्टिदलं चैव मातृकापरिवेष्टितम् ॥

End :

अभिषेकं हरिद्रायाः ततः शुद्धाभिषेचनम् ।
ततः प्राणप्रतिष्ठां च यथोक्तविधिना चरेत् ॥
जलाधिवासरहितं नेत्रोन्मीलनवर्जितम् ।
सर्वं मूर्तिप्रतिष्ठाया विधिवत्समुदीरि— ॥

Colophon :

272

Sl. No. 48779 जातवेदसकल्पः Ms. No. B. 623-1

Beginning :

जातवेदसकल्पः— जमदग्निरुवाच—

अगस्त्यं परिपप्रच्छ जमदग्निः तपोनिधिः ।
जातवेदसमाहात्म्यं ब्रूहि मे मुनिसत्तम ॥

अगस्त्य उवाच—

जातवेदसनामाख्यं गायत्रीं च त्रियम्बकम् ।
एतत्त्रयं महामन्त्रं वेदमाता इति स्मृतम् ॥

End :

एकादशशक्तिभिः पञ्चमावृत्तिः । लोकपालैः षष्ठावृत्तिः । दशायुधैः सप्तमावृत्तिः । एवं सम्पूज्य उपपाद्य जपेत् । क्षीरेण तर्पणं कुर्यात् ।

Colophon :

इति जातवेदसकल्पः ।

2̄3

Sl. No. 48781 **जातवेदाग्निदुर्गामन्त्रविधिः** Ms. No. C. 3616-1

Beginning :

अस्य श्री जातवेदाग्निदुर्गामहामन्त्रस्य मरीचिपुत्रः कश्यप ऋषिः । त्रिष्टुप् छन्दः । जातवेदाग्निदुर्गा देवता । मन्त्रस्थाः हलौ बीजानि । स्वराः शक्तयः । बिन्दवः कीलकम् ।

End :

शङ्खं चर्मधनुश्च चारुदधतीं रज्वा लसत्तर्जनीं
वामैश्च क्रमसिञ्चशेषमितरैस्तिर्यक्त्रिशूलाम्बुजैः ।
सन्नद्धां विविधायुधैः परिवृतां मन्त्री कुमारीजनै-
र्ध्यायेदीप्सतसिद्धिदां त्रिनयनां सिंहाधिरूढां शिवाम् ॥
लमित्यादि पञ्चपूजा । मनुः । पुनर्न्यासादिकं कुर्यात् ।

Colophon :

274

Sl. No. 48782 जातवेदसकल्पः Ms. No. P. 8736-1

Beginning :

अगस्त्यं परिपप्रच्छ जमदग्निस्तपोनिधिः ।
जातवेदसमाहात्म्यं ब्रूहि मे मुनिसत्तम ॥

अगस्त्यः —

जातवेदसमाहात्म्यं गायत्र्या च त्रियम्बकम् ।
एतत्त्रयो महामंत्रा कथिता वेदमातरः ॥

End :

कचित्समृद्धयस्तस्य जायन्ते चण्डिकाज्ञया ।
नश्यन्ति दारुणाः शोकाः सत्यं सत्यं वदाम्यहम् ॥

Colophon :

इति जातवेदसकल्पं सम्पूर्णम् ।

275

Sl. No. 48783 जातवेदसदुर्गामहामन्त्रः Ms. No. C. 3505

Beginning :

अस्य श्रीजातवेदसदुर्गामहामन्त्रस्य मरीचिपुत्रः कश्यपऋषिः । त्रिष्टुप् छन्दः । श्रीजातवेदाग्निदुर्गा देवता ।

End :

कात्यायनाय विद्महे कन्यकुमारी च धीमहि । तन्नो दुर्गा प्रचोदयात् ।

न्यासादिकं पूर्ववत् । गुह्येति जपसमर्पणम् ।
गुह्यातिगुह्या गोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवी त्वत्प्रसादान्महेश्वरी ॥

Colophon :

276

Sl. No. 48787 **जातवेदसमन्त्रः** **Ms. No. P. 4449–33**

Beginning :

अस्य श्री जातवेदसमन्त्रस्य मरीचिपुत्रः कश्यपऋषिः । जातवेदा अग्नि-र्देवता । त्रिष्टुप् छन्दः । दुर्गारणास्थान(?)स्थितदुष्टशत्रुमारणार्थे जपे विनियोगः ।

End :

× ममां विष्णुभगिनीं तामिमां रुद्रसंयुताम् ।
एवं ध्यात्वा द्विजः सम्यक् ततो यजनमारभेत् ॥
आयातु × × × × × पा दधातु । स
भयं मे दुर्गा दुर्गारूपा दधातु ।
इति मूलमन्त्र × × अष्टोत्तरशतसहस्रं जपेत् ॥

Colophon :

—श्रीः—

277

Sl. No. 48792 जातवेदोविधानम् **Ms. No. P. 4461-26**

Beginning :

अस्य श्री कालीमन्त्रस्य प्रत्यङ्गिरा ऋषिः । अनुष्टुप् छन्दः । काली देवता । क्षं बीजम् । हुं शक्तिः । फट् कीलकम् । मम सर्वशत्रुसंहारे ध्यानम्—

ध्यायेत्समस्तशत्रुघ्नीं सर्वसौख्यदयालयाम् ।
कालीं कङ्कालवदनां सर्वजीमूतसन्निभाम् ॥

\+ + + +

एवं ध्यात्वा महादेवीं जपेन्मन्त्रं यथाविधि ॥

End :

ओ क्षं भक्ष क्षं ह्रीं हुं फट् इति सप्ताक्षरमूलमन्त्रः । ओं क्षं ह्रीं ज्वालाज्वालाजिह्वे करालदंष्ट्रे प्रत्यङ्गिरे सर्वशत्रून् हन हन क्षं भक्ष क्षं ह्रां हुं हु फडिति प्रयोगमन्त्रः + + भूतदिक्पालबीजानि च यथाक्रमं लिखित्वा चतुर्दिक्षु- चिन्तामणिं कोणेषु नृसिंहबीजेषु लिखित्वा जपित्वाभ्यर्चयेत् धारयेत् ।

Colophon :

इति जातवेदोविधानम् ।

278

Sl. No. 48793 जालन्धरतन्त्रम् **Ms. No. C. 739**

Beginning :

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ १ ॥

श्रीमेरुशिखरे रम्ये सभायां लोकपूजिते ।
रत्नस्तम्भसहस्रैश्च शोभितायां मनोहरैः ॥

End :

ततस्तु पञ्चमे वर्षे पूर्ववत्पालयिष्यति ।
तत्कुलीनाश्च राजानः स्वं स्वं राज्यमवाप्नुयुः ॥
ततः प्रजाः स्वधर्मस्था भविष्यन्ति तदा मुने ।
अतः परं प्रवक्ष्यामि राजवंशं निबोध मे ॥

Colophon :

इति श्रीमज्जालन्धतन्त्रे भविष्यत्कालनिर्णये अष्टादशः पटलः ।

279

Sl. No. 48796 जालन्धरपीठशक्तिस्तोत्रमन्त्रजपविधिः **Ms. No. P. 7538-13**

Beginning :

जालन्धरपीठशक्तिस्तोत्रमहामन्त्रस्य रुद्रऋषिः । अतिजगती छन्दः । जालन्धरपीठशक्तिर्गौरी देवता । सौः बीजम् । ऐं शक्तिः । श्रं कीलकम् । मम जालन्धरपीठशक्तिप्रसादसिद्ध्यर्थे जपे विनियोगः ।

\+ + + +

End :

एवं हृदयादिन्यासः, ध्यानम्—

आधारे तरुणार्कबिम्बरुचिरे हैमप्रभं वाक्प्रभं
बीजं मा — मिन्द्रजोपकनिभं हृत्पङ्कजे संस्थितम् ।
रन्ध्रे ब्रह्मपदे तु शाक्तमपरं चन्द्रप्रभाभासुरं
ये ध्यायन्ति पदत्रयं तव शिवे ते यान्ति सौख्यं परम् ॥

ऐं ह्रीं श्रीं ऐं क्लीं सौः मनुः ।

Colophon :

280

Sl. No. 48798 जीवचक्रार्चनविधिः **Ms. No. P. 8714–19**

Beginning :

ब्राह्मणीक्षत्रिया वैश्या शूद्रा वेश्या च नाविका ।
राजकि(?)कापालिनि च अष्टकन्यासु पूजिता ॥
तानि पूर्वपूर्वापेक्षया उत्तरोत्तरातीवप्रशस्ता: ॥

End :

हूं क्लीं रत्रीं क्लीं देवेशि श्रावय इति विन्यस्य तन्मथनाद्भुतं मूलेन ग्राहये इतरत्सर्वं गुरुमुखावगतसम्प्रदायानुसारेण विदध्यात् ॥

Colophon :

इति जीवचक्रार्चनविधिः ।

281

Sl. No. 48799 जीवरक्षामृतम् **Ms. No. P. 5010**

Beginning:

चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तःस्थितं
मुद्रापाशमृगाक्षसूत्रविलसत् पाणिं हिमांशुप्रभम् ।
कोटीरेन्दुगलत्सुधाप्लुततनुं हारादिभूषोज्वलं
कां × × × × × यनं पशुपतिं मृत्युञ्जयं भावये ॥

End :

पञ्चाशन्निष्कमात्रेण देहसिद्धिर्भविष्यति ।
पञ्चसप्ततिनिष्केण धातून् सर्वान् विवर्धयत् (न्) ।।
शतनिष्कैकमात्रेण रोगान्सर्वान् व्यपोह × ।
कायसिद्धिकरं पुण्यं देवि सत्यं म × × × ।।

Colophon :

इति श्री।.ण्ठविरचिते जीवरक्षामृते अभ्रकक्रान्तकल्पं
नाम षोडशोपदेशः ।

282

Sl. No. 48800 ज्ञाननिर्णयः Ms. No. C. 2522-1

Beginning :

ईश्वर उवाच—

कल्पकोटिप्रदानस्य हेमभारशतानि च ।
फलमाप्नोति देवेशि कालिके बिन्दुदानतः ।।
द्वितीयं प्रथमायुक्तं यो दद्यात्कुलयोगिने ।
तृप्यन्तु मातरस्सर्वान् योगिन्यो भैरवादिकाः ।।

End :

भागकुक्कुटवाराहशशबामृगसम्भवा ।
तव चक्रार्चने देवि शुद्धं पञ्चविधा स्मृताः ।।

Colophon :

इति श्रीरुद्रयामले ज्ञाननिर्णयः समाप्तः ।

283

Sl. No. 48801 ज्ञानसर्वस्वसङ्ग्रहः Ms. No. P. 7734-1

Beginning :

यस्यादिशेषार्यगुरोः प्रसादात्
अहं विमुक्तोऽस्मि शरीरबन्धात् ।
अखण्डसच्चित्सुखदायकस्य
तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यम् ॥

यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ ॥
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

End :

आगत्य श्रोत्रतां मूर्खव्यर्थोत्थानोपबृंहिताम् ।
धिया शब्दानुसारिण्या मृगवन्मा क्षयं व्रज ॥

त्यक्तामागत्यदुःखाय स्पर्शोन्मुखतया तया ।
मूढमाबद्धकामेहि गजीलुब्धगजेन्द्रवत् ॥

×× ×× ×× ××

Colophon :

284

Sl. No. 48802 ज्ञानसर्वस्वसङ्ग्रहव्याख्या (समूला) Ms. No. P. 7734-2

Beginning :

यस्य—आचार्यस्य प्रसादात् अनुग्रहात् शरीरबन्धात् संसारबन्धात् अहं-

विमुक्तोऽस्मि तस्य अखण्डसच्चित्सुखदायकस्य आदिशेषार्यगुरोः अङ्घ्रिपद्मं नित्यं प्रणतोस्मीत्यन्वयः ।

End :

स्पर्शसुखानुभवेच्छया दुःखाय केवलं त्यक्तं त्वगिन्द्रियत्वमागत्य करिणी-स्पर्शलुब्धगजेन्द्रवत् बद्धतां मामेहि ॥

×× ×× ××

Colophon :

285

Sl. No. 48804 **ज्ञानार्णवः** Ms. No. P. 1664-5

Beginning :

सहस्रदळभासुरं सरसिजे वसन्तं सदा
सुधाकरदिवाकरायुतसमानभाभिर्युतम् ।
(कळाधर)कळाधरकळाधरं दयितया सदा मोदिनं
वयं किमपि सुन्दरं मनसि निश्चलं कुर्महे ॥

+

ईश्वर उवाच—

कथयामि वरारोहे यन्मया जन्यते सदा ।
अकारादिक्षकारान्ता मामिका वर्णरूपिणी ॥

End :

दशाक्षरोक्तवत्कुर्यात् चापबाणधरं स्मरेत् ।

वामहस्तेन कोदण्डं दक्षिणेन शरं सितम् ॥
दधानोऽवतु मां रामस्सीतालक्ष्मणसंयुतः ।
एवं ध्यात्वा रामभद्रं जपेत्पूर्ववदद्रिजे ॥
शृणु देवि प्रवक्ष्यामि मन्त्रमेकादशाक्षरम् ।
+अगस्त्यो ऋषिराख्यातो छन्दोनुष्टुभुदाहृतम् । देवता × ×

Colophon :

इति ज्ञानार्णवाख्ये दशाक्षरमन्त्र × × × नाम एकनवतितमः पटलः ।

286

Sl. No. 48807 ज्ञानार्णवः **Ms. No. B. 267**

ज्ञानार्णवप्रारम्भः

Beginning :

सहस्रदलभासुरे (?) सरसिजे वसन्तं सदा
सुधाकरदिवाकरयुतसमानभाभिर्युतम् ।
कळाधरकलाधर कलाधरं दयिता सहामोदिनं
वयं कमपि सुन्दरं मनसि निश्चलं कुर्महे ॥ ॥ १ ॥

End :

दशाक्षरोक्तवत्कुर्यात् चापबाणधरं स्मरेत् ।
वामहस्तेन कोदण्डं दक्षिणेन शरं स्थितम् । ॥ १७ ॥

दधानोऽवतु मां रामः सीतालक्ष्मणसंयतः ।
एवं ध्यात्वा रामभद्रं जपेत्पूर्ववदाद्रिजे ॥ १८ ॥

Colophon :

इति श्रीज्ञानावर्णवाख्ये महातन्त्रे दशक्षरमन्त्रस्वरूपकथनं
नाम पञ्चत्रिंशत्पटलः । ॥ ज्ञानार्णवं सम्पूर्णम् ॥

87

Sl. No. 48809 ज्ञानार्णवसङ्ग्रहः **Ms. No. P. 1823-2**

Beginning :

श्रीशिवः—

शृणु देवि प्रवक्ष्यामि राममन्त्रमनुत्तमम् ।
एकाक्षरं महापुण्यं सर्वसम्पत्प्रदं नृणाम् ॥

महापातकदृसेभदर्पनिर्हरणक्षमम् ।
यन्मन्त्रं मुनयः प्राहुर्मृगेन्द्रं मृगलोचने ॥

End :

शृणु देवि प्रवक्ष्यामि × × × रामस्य भामिनि ।
एकविंशत्यक्षराढ्यं मन्त्रं परमपावनम् ॥

प्रणवं मान्मथं बीजं लक्ष्मीबीजं द्वयं ततः ।
षड्वर्णं राममन्त्रं च सीतामन्त्र × × × × ॥

× × ततः पश्चाद्रामबीजं च यत्नतः ।
कामबीजं ततः पश्चात्प्रणवं च पुनः पुनः ॥

सीतारामस्य मन्त्रोऽयं भजतां कामदो मणिः ।
× × × सीतारामो देवता स्याद्विनियोगो यथारुचि ॥

Colophon :

इति श्रीज्ञानार्णव × × × द्वादशार्णराममन्त्रस्वरूपकथनं
नाम पञ्चनतितमः पटलः ।

288

Sl. No. 48812 ज्योतिष्मतीकल्पः **Ms. No. B. 1140-1**

Beginning :

अथ ज्योतिष्मतीकल्पं वक्ष्यामि शृणु पार्वति ।
दिव्या ज्योतिष्मती वल्ली तप्तकाञ्चनसन्निभा ॥ १ ॥

बहुप्रताना स्वर्णाभफलजाता शुभप्रदा ।
आषाढे शुक्लपक्षे च शुभर्क्षे शुभवासरे ॥ २ ॥

End :

तत्त्रैव सर्वतीर्थाणि सिद्धयो विविधान्यपि ।
ज्योतिष्मतीफलभवं सेव्यं दिव्यं रसायनम् ॥

Colophon :

इति ज्योतिष्मतीकल्पः सम्पूर्णोऽभवत् ।

289

Sl. No. 48813 ज्योतिष्मतीकल्पव्याख्या **Ms. No. B. 1140-2**

Beginning :

ज्योतिष्मतीकल्पं व्याख्यास्यामः —

ज्योतिष्मत्यास्तु पञ्चाङ्गं सर्वसिद्धिप्रदं पुनः ।
वक्ष्ये लोकहितार्थाय महार्वीर्यं महागुणम् ।।
मूलं बीजं फलं चैव त्वक्पत्रं चापि साधनम् ।
ज्योतिष्मत्यास्तु बीजानि पुष्यार्के तु समाहरेत् ॥

End :

एषा ज्योतिष्मती पूर्वं भास्करस्य गभस्तिभिः ।
ज्योतिरूपेण भूलोके प्रभूता भूतये भुवः ।।

Colophon :

इति ज्योतिष्मतीकल्पव्याख्या सम्पूर्णा ।

290

Sl. No. 48816 ज्वरगायत्रीकल्पमन्त्रः **Ms. No. P. 5972-6**

Beginning :

अस्य श्रीज्वरगायत्रीमन्त्रस्य मौढ्याङ्गीरसऋषिः । गायत्री छन्दः । कालाग्निरुद्रो देवता । ज्वरनाशने विनियोगः । + +

ध्यानम्—

भस्मायुधं वरदमच्युतमेकदंष्ट्रं
सर्वज्वरं मुनिवरं भसितावभातम् ।
तावच्चतुर्भुजाजटामकुटं त्रिनेत्रं
देवज्वरं हितजगत्त्रितयं नमामि ।।

End :

भस्मायुधाय विद्महे वज्रदंष्ट्राय धीमहि । तन्नो ज्वरः प्रचोदयात् ।

Colophon :

291

Sl. No. 48817 ज्वरनाशमन्त्रविधिः **Ms. No. P. 4580–21**

Beginning :

कुजरं ते मुखं रौद्रं नन्दनं नन्दिमावहम् ।
ज्वरमृत्युभयं घोरं विषं नाशय मे ज्वरम् ।

ॐ नमो भगवते रुद्राय हृदये अमृत अमृताभिवर्षाय मम ज्वरद्रोगशान्तिं कुरु कुरु स्वाहा ।

End :

समुद्रस्योत्तरे पार्श्वे मारीचो नाम राक्षसः ।
तस्य मूत्रपुरीषाभ्यां हुताशन हुतशन ।।
शमय शमय स्वाहा ।

ಯೀ ಮಂತ್ರಂ ಮಂಚಿ ಏಳ್ಳಲತಿ ನೀಹ್ಲೋ ಮಂತ್ರಂಚಿ ಯಿಪ್ಪನು ಚಾತುರ್ಥಿಕಂ ಮಾನನ್ । ನಿಹ್ಲಾಡಪೆನಿವಾರ್ಕೆ ।

Colophon :

292

Sl. No. 48823 ज्वरनाशमन्त्रविधिः **Ms. No. P. 3063–83**

Beginning :

अष्टदलकर्णिकायां षट्कोणं कुबेरं ते मुखरौद्रं नन्दिमानन्दिमावह ।

ज्वरमृत्युभयं घोरं भय नाशाय मे ज्वर ॥
त्रिणोत्रिण्यष्टदलेषु ज्वर इत्येकैकं—

End :

योऽसौ स्मरति संवादं तस्य त्वन्न भवेद्भयम् ।
इत्युक्तोऽद्भूतमागम्य गरोमेहिशिरो ज्वरः ॥

Colophon :

इति ज्वरहरस्तोत्रं सम्पूर्णम् ।

293

Sl. No. 48826 **ज्वालानृसिंहमालामन्त्रः** **Ms. No. P. 6806-10**

Beginning :

अस्य श्रीज्वालानृसिंहमालामन्त्रस्य सङ्कर्षण ऋषिः । गायत्री छन्दः । ज्वालानृसिंह परमात्मा देवता । क्ष्रौं बीजं स्वाहा शक्तिः । फट् कीलकम् । श्री ज्वालानृसिंहप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

सहस्रार हुं फट् स्वाहा । साध्यनाम । इति मालामन्त्रः ।
साध्यनामगल लक्षणम् ।
आदौ देवं च संशोध्य चतुर्थ्यन्तं स्वनामकम् ।
द्वितीयान्तं फलं पश्चात् कुरु द्रव्यसमन्वितम् ॥
श्रीनृसिंहार्पणमस्तु ॥

Colophon :

294

Sl. No. 48829 **ज्वालाभिन्नभैरवीविधानम्** **Ms. No. P. 4461-8**

Beginning :

अथ ज्वालभैरवीमन्त्रस्य शक्तिसम्मोहनर्षिः । गायत्री छन्दः । ज्वालभिन्न-भैरवी देवता । रां बीजं । रीं शक्तिः । रूं कीलकम् । इष्टार्थे विनियोगः । रामित्याद्यङ्गानि ।

End :

अयं मन्त्रो विद्वेषणप्रधानः एकादशलक्षं जपः । अग्निदुर्गावन् पूजा । प्रयोगे तु नित्यं त्रिसहस्रं जप्त्वा सन्ध्याकाले रक्तोदकेन सहस्रैकं मण्डलमर्ध-मण्डलं वा तर्पयेदिति ।

Colophon

295

Sl. No. 48830 **ज्वालामालिनीमन्त्रविधिः** **Ms. No. P. 6915-10**

Beginning :

ओं नमो ज्वालामालिनि हुं फट् स्वाहा दण्डाग्रहपार्श्वनाथायविश्वाग्रह आकर्षणाय बन्ध बन्ध पूर्वद्वारबन्धनाय अग्निद्वारबन्धनाय । यमद्वारद्वारबन्धनाय । नैऋतिद्वारबन्धनाय—

End :

आकाशद्वारबन्धनाय पातालत्रिकोण गुंढमुकुलस्वाहा ओं नमाहों नमाहों यक्षरक्ष पुजिते यक्षममार्येनुलोचने स्वाहा ।। गुरुं ध्यात्वा ।। × ।।

Colophon :

शुभमस्तु ।

296

Sl. No. 48832 डामरकल्पः **Ms. No. P. 712**

Beginning :

श्रृणु राजन् प्रवक्ष्यामि चण्डिकापूजनं महत् ।
आश्विसन्यसिते पक्षे प्रतिपत्सु यथाक्रमम् ॥

नुन्मूतःस्तिलतैलेन पूर्वाह्ने च नृपोत्तम ।
पुण्याहवाचनं कृत्वा द्विजांश्चैव प्रपूजयेत् ॥

End :

ब्रह्मविष्णुमहेशानां कुमारि × × × × ला ।
तत्पू × × नेन राजेन्द्र त्रैलोक्यं न्यः स्तुपूजितम् ॥

नम्यक्र × × × × × वेंदफलं भवेत् ।
× र्वतीर्थफलं तस्य यः कु × × रि × पूजयेत् ॥

तस्मात् पूजय भूपालकुमारि × × × ।
राज्यं प्रा × से वश्यं मान × × संशयः ॥

Colophon :

इति श्री डामरकल्पे नवर्णवनित्यसारे ××××× रि पूजनं
नाम चतुर्दशोऽध्यायः ।

297

Sl. No. 48841 तन्त्रप्रकाशः Ms. No. B. 607-1

Beginning :

क्रान्तिसाम्यसमयःसमीरितः
सूर्यपर्वसदृशो मुनीश्वरैः ।
तत्र जप्तहुतदत्तं अक्षयं
कोटिकोटिगुणितं(?) हि भार्गवः ।।
रवीन्द्वोः तुल्यसंक्रान्तौ विषुवत्संनिधौ यदा ।
द्विर्भवेतू द्विस्सदापातः स्यादभावो विपर्ययः ।।

End :

प्रत्यङ्मुखं कोटिमतः प्रसार्य
संज्ञारवेः तिर्यगिव श्रुतिः स्यात् ।
तत्कोटियोगे विलिखेच्छाशाङ्क
ततश्च यत्रा × × युतं श्रवेण ।।
तन्मध्यमं कल्प्य यथाधनुः स्यात्
लिखेत्तदा तद्दिवसे शशाङ्कम् ।।

Colophon :

इति श्रीनाथाचार्यकृतौ तन्त्रप्रकाशे
चन्द्रशृङ्गोन्नत्यधिकारः अष्टमः
श्रीः

298

Sl. No. 48842 तन्त्रसारः Ms. No. C. 4061

Beginning :

नत्वा कृष्णपदद्वंद्वं ब्रह्मादिसुखन्दितम्(?) ।

गुरुं त्वज्ञानदातारं(?) कृष्णानन्देन धीमते ॥

तन्त्रग्रन्थे गताद्वाक्यान्नानार्थं प्रतिपद्य च ।
सौकर्यार्थं च संक्षेपात्तन्त्रसारः प्रतन्यते ॥

अथ गुरुलक्षणम्— शान्तो दान्ता— कुलीनश्च...

End :

वेदार्थसार्थविपरीतविलोकनेन
प्रापोऽ(?)नवद्यजनलोपमवेक्ष्य मातः ।
तद्रूढकूरविपदीकरणेन(?) जातान्
दोषान् क्षमस्व नवपादयुगाद्रयाचे(?) ॥

श्रीकृष्णानन्दवागीशभट्टाचार्याय संग्रहम् ।
दृष्ट्वाऽनधीतशास्त्राणि धीराध्याय सांप्रतम् ॥

Colophon :

इति श्री महामहोपाध्याय-श्रीकृष्णानन्दवागीशभट्टाचार्यकृतः
तन्त्रसारः सम्पूर्णः ।

299

Sl. No. 48846 **तर्पणविधिः** **Ms. No. P. 5022–24**

Beginning :

अथ तर्पणविधिः ।
तदुक्तं ज्ञानार्णवे—

इति सन्ध्याविधिं कृत्वा तपणं तु समाचरेत् ।
उपस्थाय ततो मौनी उपस्थानादिविद्यया ॥
मातृवंशे होमादेर्वा(?) पितृवंशे सदाशिवः ।
तृप्यतां मम हस्तेन सुपुष्पाक्षतवारिभिः ॥

End :

श्रीमहात्रिपुरसुन्दरीपादुकां तर्पयामि । नमः । इति समयविद्य चतुष्टयं तर्पयित्वा—सूर्यमण्डलमध्यस्थां देवीं संहारमुद्रया स्वहृदये विन्यस्या रविमण्डले जलं विसृज्य ॥

Colophon :

इति तर्पणविधिः ।

300

Sl. No. 48849 **तान्त्रिकतुरीयसन्ध्याविधिः** **Ms. No. P. 4449-17**

Beginning :

अथ नामपारायणम् ॥ अर्धरात्रिसन्ध्या ॥ प्राणायामादिन्यासत्रयं कृत्वा सहस्रदलपद्मे तुरीयकूटं मूलविद्यां त्रयोदशाक्षरीरूपां पद्मरागसमं ध्यात्वा । वं हं नासापुटेन तारकमण्डलाद्बहि .... ध्यायेत् ॥

End :

ततः मूलगायत्रीं दशधा जप्त्वा कालनित्याविद्यामूलं तुरीयकूटमष्टोत्तरवारं जपेत् । गुह्येति निवेद्य । योन्या प्रणम्य । कामकलारूपमात्मानं ध्यायेत् ॥

Colophon :

इति तुरीयसन्ध्याविधिः ।

301

Sl. No. 48860 **तान्त्रिकहोमपद्धतिः** **Ms. No. C. 2109-1**

Beginning :

श्रीमद्विट्ठलमानम्य गाम्भीराध्वरिसूनुना ।

क्रियते भास्करार्येण तान्त्रिकी होमपद्धतिः ॥
उक्तलक्षणं कुण्डं स्थण्डिलं वा गोमयेनोपलिप्य स्नातः शुक्लाम्बरधरः

End :

सप्तशतं ब्राह्मणा भोजनीयाः । + + अधमे दशाधिकशतम् । इति होमोपयुक्तस्मृत्युक्तपरिभाषा ।

Colophon :

इति भास्कररायेण गम्भीराध्वरिसूनुना ।
कृता लोकोपकाराय तान्त्रिकी होमपद्धतिः ॥

302

Sl. No. 48864 **ताराभक्ततरङ्गिणी** **Ms. No. B. 1104-3**

Beginning :

तारां नत्वा स्वेष्टदेवीं श्रीलक्ष्मीं कुलदेवताम् ।
नवार्णवस्य मन्त्रस्य पद्धतिर्लिख्यतेऽधुना ॥ ॥ १ ॥

....

कवचादिरहस्यानां विधिः सम्प्रोच्यते मया ।
नामूलं लिख्यते किञ्चित् सम्प्रदायगतं च यत् ॥ ४ ॥

End :

इति पञ्चमावर्णानि सम्पूज्य पुनः गन्धादिपूजां समर्प्य पश्चाद् घटं विधिना संस्थाप्य तदुपरि चण्डीयन्त्रं संस्थाप्य विधिना सम्पूज्य जपादिकं कुर्वन् उक्तसिद्धिदं(?) भवति ॥ ॥ इति घटार्गलयन्त्रलेखनविधिः ॥

Colophon :

इति विमलानन्दनाथविरचिततारा भक्ततरङ्गिण्यां
सप्तशतिकाविधानं समाप्तम् ॥

303

Sl. No. 48870 तिरस्करिणीमन्त्रः **Ms. No. P. 4922-32**

Beginning :

तिरस्करिणीमन्त्रस्य प्रजापति ऋषिः । महाबृहती छन्दः । तिरस्करिणी देवता ।

नील(लं?) कुरङ्गमधिरुह्य विराजमाना
नीलांशुकाभरणमाल्यविलेपनाढ्या ।
निद्रापदेन भुवनानि तिरोदधाना
खड्गायुधा भगवती परिपातु सा नः ॥

End :

ओं ह्रीं नमो भगवति महामाये मम सर्वपशुजनमनश्च सुस्तिरस्करणं(?) कुरु कुरु हूं फट् स्वाहा । इति मन्त्रः ।

एतन्मन्त्रजपेन चोरादीनां नेत्रतिरस्करणं भवति ।

Colophon :

304

Sl. No. 48877 **तुर्यगायत्रीकल्पः** **Ms. No. P. 8663**

Beginning :

अस्य श्री तुर्यगायत्रीमन्त्रस्य अथर्वणप्रोक्तो विमलऋषिः अव्यक्तगायत्रीछन्दः। तुर्यपरमात्मा देवता ओं ओं ओं अधों शक्तिः। सौं कीलकम्। गायत्री पूर्णार्थे जपे विनियोगः परः अङ्गुष्ठाभ्यां नमः।

End :

अष्टोत्तरशतसहस्रलक्षगायत्र्या पवित्राणि कुलानि भवन्ति। अष्टौ ब्राह्मणान् सम्यग्ग्राहयेत्। अथ सिद्धिर्भवति। षड्भि··र्सैः प्रलीयते इत्याह भगवान् महादेवो वसिष्ठः॥

Colophon :

हरिः ओम्

305

Sl. No. 48880 **त्वरितपार्वतीयन्त्रविधिः** **Ms. No. P. 4461–60**

Beginning :

आख्यां मध्ये सतारानुमथशतसंयुक्तविंशत्पुरेषु
प्रादक्षिण्येन शर्वादिकमनुविलिखेद् द्वादशावृत्तिमन्त्री।
विंशद्वन्द्वाष्टशूलाकलितविविरचितं(?) यन्त्रेमेतत्प्रजप्तं
बद्धक्ष्वेलग्रहार्तिं विजयलक्ष्मीप्रदं कीर्तितं च॥

End :

अस्यार्थः — तिर्यगूर्ध्वं द्वादशद्वादशरेखाः कृते एकविंशत्युत्तरशतकोष्ठानि स्युः तेषां

मध्ये कोष्ठे प्रण्वन्तरे(?) शक्ति तन्मध्ये प्रणवबीजं विलिख्य साध्यवर्णैर्वेष्टयेत् । ततो मध्यकोष्ठाद्बहिरीशान्यकोष्ठमारंभ्य प्रादक्षिण्येन विंशत्युत्तरशतकोष्ठेषु प्रतिकोष्ठमेकैकमक्षरं हुं खेचछक्षस्त्रीं हूं क्षे ह्रीं फडिति मन्त्रं द्वादशावृत्त्या विलिख्य सर्वशूलाग्रेषु साध्यं तद्बहिर्वृत्तं कृत्वा तत्र मातृकां वर्णयेदिति ॥

Colophon :

306

Sl. No. 48883 | त्रिकूटन्यासविधिः | **Ms. No. P. 5002-69**

Beginning :

नाभ्यादिपादपर्यन्तं गलादानादि चापरम् ।
मूर्धादिगलपर्यन्तं त्रिकूटं विन्यसेत् क्रमात् ।
दक्षपणितले चैकं वामपणितले तथा ।
दीपयोः सम्पुटं विद्यात् त्रिकूटं विन्यसेत्ततः ॥

En :

एवं जपान्ते जपादौ च प्राणायामं कुर्यात् । तदुक्तं अगस्त्यसंहितायाम्—
प्राणायामं विना यस्य कृतं कर्म निरर्थकम ।
अतो यत्नेन कर्तव्यं प्राणायामत्रयं शिवे ॥ इति ॥

Colophon :

हरिः ओम् ।

307

Sl. No. 48885 | त्रिकूटारहस्यम् | **Ms. No. B. 632**

Beginning:

श्री त्रिकूटारहस्यप्रारम्भः—

श्रीदेव्युवाच—

भगवन् सर्ववेत्ता त्वं त्रैलोक्यप्रभुरीश्वरः ।
त्रिगुणात्मा त्रिलोकेशः त्रिनेत्रः त्रिपुरान्तकः ॥
त्वमेव सृष्टिकृच्छम्भो त्वं रक्षाप्रलयक्षमः ।
त्वमेव तन्त्रसारज्ञः त्वं मन्त्राम्भोनिधिप्लवः ॥

End :

रेतसा तर्पयेद्देवीं महात्रिपुरसुन्दरीम् ।
सन्तर्प्य विविधैः पुष्पैः प्रणमेद्योनिमुद्रया ।
आत्मानं शिवरूपं च शक्तिं देवीस्वरूपिणीम् ।
विसर्जयेन्महामन्त्री नत्वा संहारमुद्रया ॥
इति श्रीशक्तिपूजायाः....गोपनीयं स्वयोनिवत् ॥

Colophon :

इति रुद्रयामळतन्त्रे शिवपार्वतीसंवादे त्रिकूटारहस्ये
श्रीशक्तिपूजाकथनं नाम षोडशोऽध्यायः ।

308

Sl. No. 48887 **त्रिचकल्पः** **Ms. No. P. 8724-1**

Beginning :

एवं गुणेत्यादितिथौ अस्माकं सहकुटुम्बानां क्षेमस्थैर्यविशेषेण श्रीसूर्यनारायणप्रसादेन सकलरोगनिवारणार्थं शीघ्रमेव सुपुत्रावाप्त्यर्थं + त्रिचकल्पोक्तप्रकारेण त्रिचन्यासपूर्वकमहागणपतिपूजारुणपूजाप्रसन्नार्घ्यपात्रपूजापीठद्वारप्राणप्रतिष्ठान—

End :

सनकसनन्दनदेवताभ्यो नमः । तीर्थस्नानम् । निर्माल्यगन्धम् ।

×××× शेषधूपम् । शेषदीपम् सनकादि भक्तेभ्यो नमः । बलिहरणं निवेदयामि । उत्तरनीराजनम् । सर्वोपचारपूजां समर्पयामि ।

Colophon :

309

Sl. No. 48894 त्रिपुरसुन्दरीकल्पः **Ms. No. P. 6272**

Beginning :

अथ पूजा उच्यते ।

विविक्त × पुष्पमालाऽलङ्कृतं सुधूपितम् ।
× × दिष्येतं पूजा × × द्रव्यमीरितम् ॥
× × × पन्नः यागगृहं गत्वा द्वारपूजां कुर्यात् । द्वारपार्श्वे ऐं ह्रीं श्रीं अप्रति × × स्तं पादुकां पूजयामि ।

End :

मूलमन्त्रः—

श्री महात्रिपुरसुन्दरीपादुकां तर्पयामि । इति त्रिसृक् तर्पयेत् । नमस्ते प्रकटगुप्तगुप्तवर सम्प्रदायकुलराल × गर्भरहस्यतिरलास्यपरापररहस्य श्रीमत् त्रिपुरसुन्दरीपादुकां तथा × × ततो मूलेन त्रिराचम्य निर्याणमुद्रया देवीं हृदि विवर्जयेत् ।

Colophon :

इति गुरुदेवतार्पणमस्तु ।

310

Sl. No. 48896 त्रिपुरसुन्दरीजपतर्पणविधिः Ms. No. P. 8728-2

Beginning :

अस्य श्रीगुरुमन्त्रस्य ब्रह्मा ऋषिः । गायत्रीच्छन्दः । श्रीगुरुर्देवता । हं बीजम् । सः शक्तिः । सोऽहं कीलकम् । मम मनसा ॥ हंसामित्यादि षडङ्गन्यासः ॥

End :

वन्दे गुरुपहं स शिवसोऽहं ऐं ह्रीं श्रीं ऐं क्लीं + + + + सौ प्रज्ञान ब्रह्म । अहं ब्रह्मास्मि । तत्त्वमसि । अयमात्मा ब्रह्म स्वच्छप्रकाश परिपूर्णपरात्परविमर्शात्मकस्वगुरुकामेश्वरानन्दनाथश्री । श्रीगुरुचरणारविन्दार्पणमस्तु ।

Colophon :

श्रीमत्त्रिपुरसुन्दरीचरणारविन्दार्पणमस्तु ।

श्री

311

Sl. No. 48905 त्रिपुरसुन्दरीमन्त्रतर्पणविधिः Ms. No. P. 8714-30

Beginning :

मायाकुण्डलिनी क्रिया मधुमती काली कलामालिनी
माताङ्गी विजया जया भगवती देवी शिवा शाम्भवी ।
शक्तिश्शङ्करवल्लभा त्रिनयना वाग्वादिनी भैरवी
ह्रीङ्कारी त्रिपुरे परापरमयी माता कुमारीत्यसि ॥

End :

विद्याभिस्सह मूलविद्यायाः षट्सप्तत्युत्तरपञ्चशतसंख्याजपे कृते षोडशदिनपूर्तौ अवान्तरमण्डलपूर्तिर्भवति ॥ वत्सरपूर्तौ पूर्णमण्डलपूर्तिः ॥

Colophon :

312

Sl. No. 48908 त्रिपुरसुन्दरीमालामन्त्रः **Ms. No. P. 7550-31**

Beginning :

शुद्धशक्तिविद्यात्रिपुरसुन्दरीमालामहामन्त्रस्य । उपस्थेन्द्रियाधिष्ठायी वरुणादित्यऋषिः । गायत्रीछन्दः । सविकककारभट्टारकपीठस्थितकामेश्वरांकनिलयश्रीकामेश्वरीललितामहाभट्टारिका देवता । + + + विनियोगः ।

End :

जयद्वन्द्वसमायुक्तं स्तुतिरुक्ता च पञ्चधा ।

शक्तिमाला पञ्चधास्याच्छिवमाला च तादृशी ॥

द्वन्द्वमाला पञ्चधास्यादेवं पञ्चदशीक्रमा ।

आपत्काले नित्यपूजां विस्तरात्कर्तुमक्षमः ॥

एकवारं जपेदेनं सर्वपूजाफलं लभेत् ।

Colophon :

इति श्रीरुद्रयामलतन्त्रे शतकोटिसहस्रविस्तारे पूर्वभागे महागमसारे गौरीशङ्करसंवादे दक्षिणामूर्तिसम्प्रदाये शुद्धशक्तिविद्यात्रिपुरसुन्दरीमालामन्त्र-स्तोत्रं सम्पूर्णम् ।

313

Sl. No. 48919 **त्रिपुरसुन्दरीयन्त्रविधानम्** **Ms. No. P. 3400-4**

Beginning :

बिन्दुमध्ये च ह्रींकारं त्रिधा पाशं त्रिकोणगे ।
पार्श्वे तु बालां विन्यस्य अष्टकोणे शिवं लिखेत् ॥
दशाक्षरी दशदळे अग्रे तु परमां लिखेत् ।
अष्टारे भैरवं लिख्य षोडशारे स्वरान् लिखेत् ॥

End :

परिवेष्यतरवर्णानां कादिक्षान्तं दिक्पालबीजमालिखेत् । भूपुरे श्रीं क्लीं ह्रीं ऐं परिवेषयेत् ॥

Colophon :

314

Sl. No. 48927 **त्रिपुरापूजाविधिः** **Ms. No. P. 5002-82**

Beginning :

पूजाविधिः—

अगजाननपद्मार्कं गजाननमहर्निशम्
अनेकदन्तं भक्तानामेकदन्तमुपास्महे ॥
गजाननं भूतगणधिसेवितं....विघ्नेश्वरपादपङ्कजम् ॥

श्रीमत्परंब्रह्मचक्रे ओड्याणपीठे चर्यानाथसमस्तचक्रपरिवारपरमतत्त्वसृष्टि-कृत्येच्छा—

End :

तन्महापरमं नौमि कृत्यैः पञ्चभिरङ्कितम् ।
अशेषविश्वभेदात्मापूर्णहंसात्मकं शिवम् ॥
त्रिधा विभक्तं यद्वस्तु स्तोतुं तद्वस्तु विक्रमात् ।
एकस्मै महते तस्मै नमस्ते चक्षुचक्षुषे ॥

Colophon :

॥ ओम् ॥

315

Sl. No. 48933 त्रिपुरासिद्धान्तम् **Ms. No. P. 4449–19**

Beginning :

दक्षिणामूर्तिरुवाच—

शृणु देवि प्रवक्ष्यामि गोप्यमन्यत्सुदुर्लभम् ।
कलञ्जचूर्णमहात्म्यं महापातकनाशनम् ॥

यस्य विज्ञानमात्रेण ब्रह्मज्ञानं प्रजायते ।
ततः पूर्वं मया नोक्तं यस्य कस्य तदुत्तमम् ॥

End :

फाल्गुने मासि सम्प्राप्ते महामाहेश्वरो जनः ।
कलञ्जभक्षणं कुर्यात् शुण्ठीचूर्णसमन्वितम् ।।

जपेदनन्तरं विद्यां सहस्रद्वय(मर्चयेत्) माचरेत् ।
आयान्ति क्रीडितुं वश्यं नार्यो मासान्न संशयः ।।

Colophon :

इति श्री त्रिपुरासिद्धान्ते संविन्माहात्म्ये रुद्रयामले संविन्माहात्म्ये
पञ्चदशः कल्पः ।।

316

Sl. No. 49938 **त्रियम्बककल्पः** **Ms. No. P. 4461-140**

Beginning :

+ ये ति मन्त्रो हृदि न्यसेत् । ओं बीजं । शिरसि विन्यस्य शिखायां शक्तिविन्यसेत् ।

कवचे ऋषि विन्यस्य त्रिषु नेत्रेषु देवता ।
अस्त्रारेत्यानुष्टुभं छन्दो न्यासोऽयं शास्त्रबोधितः ।।
प्रागादिषु चतुर्दिक्षु दिग्बन्धं कारयेद्बुधः ।

\+ \+ \+ \+

End :

हुत्वा तैरयुतं मन्त्री ततो होमं समापयेत् ।
दशभिर्दिवसैर्मन्त्रैर्होमं कुर्यादतन्द्रितः ।।

शान्ति कुर्यात्समाप्ते तु रोगिरोगविमुक्तये ।
प्रत्यहं ब्राह्मणान् भोज्य सर्वान् कामानवाप्नुयात् ॥

Colophon :

इति श्री वसिष्ठसंहितायां त्रियम्बककल्पे
त्रियम्बकपूजा नाम दशमोऽध्यायः ।

317

Sl. No. 43941 **त्रियम्बकमन्त्रः** **Ms. No. P. 8715-9**

Beginning :

अस्य श्री त्रियम्बकमन्त्रस्य । मैत्रावरुणपुत्रो वसिष्ठऋषिः । अनुष्टुप् छन्दः । मृत्युञ्जयत्रियम्बकरुद्रो देवता । देवदेव्यौ प्रणवौ बीजशक्तिः । ओं बीजम् । ह्रीं शक्तिः । मूलमन्त्रेण करशुद्धिं कृत्वा । प्रणवं करतलयोर्विन्यस्य—

End :

त्र्यम्बक महादेव त्राहि मां शरणं गतः ।
जन्ममृत्युजरारोगैः पीडितं कर्मबन्धनैः ॥

तावतस्त्वद्गतप्राणस्त्वच्चित्तोऽहं सदा मृड ।
इति विज्ञाप्य देवेश जपे × × न्त्रं × × त्र्यम्बकम् ॥

यथा × × जपः । उत्तरं न्यासः । ध्यानम् । पञ्चपूजा ॥

Colophon :

318

Sl. No. 48947 त्रियम्बकमन्त्रः Ms. No. P. 4580-10

Beginning :

अस्य श्रीत्रियम्बकमहामन्त्रस्य । मैत्रावरुणपुत्रो वशिष्ठऋषिः । अनुष्टुप् छन्दः । त्रियम्बकरुद्रो देवता । मम अपमृत्युपरिहारार्थं त्रियम्बकमहामन्त्रजपं करिष्ये ।

End :

त्रियम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् । मम अपमृत्यु × × आयुर्वर्धताम् । पुनः हृदयादिन्यासः । इतरदिग्विमोकः । पुनः ध्यानम् । ॐ नमो भगवते रुद्राय । पुनः पञ्च पूजा ।

Colophon :

319

Sl. No. 48956 त्रैपुरीस्तोत्रम् Ms. No. C. 3533

Beginning :

पार्वत्युवाच—

श्रुतानि देवदेवेश सर्वमन्त्रमहेश्वर ।
आगमं निगमं चैव बीजानां चोदयस्तथा ॥

समुदायेऽति त्रारङ्ग (?) सर्वमन्त्रस्य संहिता ।
छन्दो ऋषिः कल्पभेदो वैदिकोऽप्यत्र यामले ॥

धर्मधर्मास्तथा ज्ञानं विज्ञानं सविकल्पकम् ।

End :

ब्रह्माण्डं खण्डयन्ती विविधसुरनृणां तर्पयन्ती प्रमोदैः
प्रीत्या सन्दीपयन्ती निजजवितैतैयट्टदैः(?) प्रेरयन्ती ।
वर्णान् देवान् पजयन्ती दितिसुतदमनी साप्यहंकारकर्त्री
जेत्री तस्यैव जाप्यं स्वरचितमनुमोचयच्छापजातम् ॥
इदं त्रैपुरीस्तोत्रं पठेद् भक्त्याऽतुलो नरः ।
सर्वान् कामानवाप्नोति सर्वशापो विमुच्यताम् ॥

Colophon :

इति श्रीत्रैपुरीस्तोत्रं सम्पूर्णम् ।

320

Sl. No. 48957 त्रैलोक्यमोहनकवचम् Ms. No. P. 5834-6

Beginning :

श्रीमत्त्रिपुरसुन्दर्याः या या विद्यास्सुदुर्लभाः ।
कथिताः कृपया विद्याः श्रुत्वास्स्व गदता मया ॥
प्राणनाथ मम ब्रूहि कवचं मन्त्रविग्रहम् ।
त्रैलोक्यमोहनं चेति नामतः परिकीर्तितम् ॥

End :

तद्गात्रं प्राप्य शस्त्राणि ब्रह्मास्त्रादीनि पार्वति ।
वृन्तानि कुसुमानीव भूषणानि भवन्ति वै ॥
सत्कीर्तिर्भवने लक्ष्मीर्वाणि वक्त्रवशे ततः ।

इदं कवचमज्ञात्वा योजयेत् पुरसुन्दरि ।
नवलक्षं जपेद्वापि तस्य विद्या न सिद्ध्यति ॥

Colophon :

इति श्रीरुद्रयामले उमामहेश्वरसंवादे त्रैलोक्यमोहनकवचं सम्पूर्णम् ।

321

Sl. No. 48963 त्र्यम्बककल्पः **Ms. No. P. 3159-3**

Beginning :

आश्रमस्थं सुखासीनं व × ष्टं जपतां वरम् ।
ब्राह्मया लक्ष्म्या समायुक्तं योगैश्वर्यसमन्वितम् ॥

ज्वलन्तं तेजसा नित्यं सहस्रांशुसमप्रभम् ।
उपास्यमानं मुनिभिः ब्रह्माणमिव चापरम् ॥

कृपया परया युक्तं सर्वशास्त्रविशारदम् ।
प्रणम्य शिरसा भूयः तं शिष्यं पर्यपृष्टवान् ॥

+ + अहमस्य ऋषिः प्रोक्तो छन्दोऽनुष्टुबिहोच्यते ।
देवता त्र्यम्बको × द्वाङ्गानि श्रुणुष्व मुने ॥

End :

एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ।
नापुत्राय प्रवक्तव्यं न चाशुश्रूषवे तथा ॥ + +
शुश्रूषवे विनीताय वीतरागाय धीमते ।
धार्मिकाय प्रवक्तव्यं सर्वकामसमृद्धये ॥

Colophon :

इति वासिष्ठे त्र्यम्बककल्पे एकादशः पटलः ।
समाप्तश्च त्र्यम्बककल्पः ।

3.2

Sl. No. 48967 त्र्यक्षरविधानम् **Ms. No. B. 288–13**

Beginning :

त्र्यक्षरीविधानम् । भार्गव ऋषिः । विराट् छन्दः । श्रीमहागणपति देवता ।

End :

अचिन्त्यबलपराक्रम सर्वव्याधिं नाशय । सर्वग्रहांश्चूर्णय नागान्मोटय रुद्ररूपत्रिभुवनेश्वर सर्वतोमुख हुं फट् स्वाहा ।

Colophon :

त्र्यक्षरविधानं सम्पूर्णम् ।

323

Sl. No. 48972 त्वरितरुद्रविधानम् **Ms. No. C. 249**

Beginning :

अथ त्वरितरुद्रविधानम् ।
यस्य कुक्षौ जगत्सर्वं स्थावरं जङ्गमं तथा ।
(सर्व)दुःखच्छिदे तस्मै ब्रह्मविष्णुशिवात्मने ॥

अस्य त्वरितरुद्रस्य न्यासमुद्राक्रमेण तु जपहोमदिकं सर्वं कथ्यते सर्वसिद्धये ॥

End :

ओं नमो भगवते शक्तियुक्ताय अनन्ताय योगपीठात्मने नम इति मन्त्रेण पीठमध्ये पुष्पाञ्जलिं दद्यात् । षोडशोपचारपूजा । अथ स्तुतिः ओं नमश्शीवायेति पूर्वोक्ता ।

Colophon :

इति रुद्रयामले त्वरितरुद्रविधानम् ।

324

Sl. No. 48981 दक्षिणामूर्तिपञ्जरम् **Ms. No. P. 4461-40**

Beginning :

वटतरुतलवासबद्धतृष्णं
मुनिनिकराय विवेकमादिशन्तम् ।
पशुपतिमगराजकन्यकायै
स्मरहृदयाशुवितीर्णवामभागम् ॥
प्रणम्य साम्बमीशानं शिरसा वैणिको मुनिः ।
विनयावनतो भूत्वा पप्रच्छ स्कन्दमादरात् ॥

\+ \+ \+ \+ \+

तदास्मै निकटं प्राप्य दक्षिणामूर्तिरूपधृक् ।
पिता मे पञ्जरं स्वस्य सर्वविज्ञानदायकम् ॥

End :

नित्यपूजासमायुक्तः संवत्सरमतन्द्रितः ।

जपेत्त्रिसन्ध्ययोर्विद्वान् सर्वशास्त्रार्थपारगः ।
गद्यपद्यतथाचाटु नटकः स्वयमेव हि ।
निर्गच्छन्ति मुखाम्भोजात्स्वयमेव न संशयः ।। इति

अथ ध्यानम्—

व्याख्यामुद्राक्षमाले करकमलसुललिते बाहुभिर्बाहुमेकं
बिभ्राणो भानुपद्गोपदतलपिशितापस्मितिर्दुन्धुमारः ।
सौवर्णे योगपीठे लिपिमयकमले सूपविष्टस्त्रिणेत्रः ।
क्षीराभश्चन्द्रमौलिर्दिशतु पशुपतिः शुद्धबुद्धिं शिवो नः ।।
प्रणमेव यन्त्रं लेकनन्यायेनसम्पूज्य जपेत् ।

Colophon :

325

Sl. No. 48987 **दक्षिणमूर्तिमन्त्रः** **Ms. No. P. 6379-5**

Beginning :

अस्य श्रीदक्षिणामूर्तिमन्त्रस्य ब्रह्मा ऋषिः । गायत्री छन्दः । दक्षिणामूर्तिर्देवता । + + ध्यानम्—ततस्सुमेरु इत्यादि ।।

End :

भिक्षान्नं गोमूत्रपक्वान्नं भुञ्जानः विंशतिसहस्रजपात् अश्रुतवेदशास्त्रादिव्याख्याता स्यात् ।

Colophon :

326

Sl. No. 48995 दक्षिणामूर्तिमन्त्रकल्पः Ms No. P. 10053-52

Beginning :

ओं ऋषय ऊचु :-

संकल्पवेदशास्त्रार्थतत्त्वं येनैव जायते ।
येनैव श्रियमाप्नोति शाश्वतीमनपायिनीम् ॥
येनैव मोक्षं लभत वद सत्यं महामुने ।

अगस्त्य उवाच— +

अथ किं बहुनोक्तेन येन सर्वं लभेन्नरः ।
तन्मन्त्रमभिवक्ष्यामि सर्वमन्त्रोत्तमोत्तमम् ॥
दक्षिणामूर्तिमाश्रित्य लब्धवानब्जसम्भवः । +
तेन ब्रह्मा ऋषिः प्रोक्तः छन्दो गायत्रमुच्यते ।
देवता दक्षिणामूर्तिः मेधा बीजं प्रचक्षते ॥ + इत्यागस्त्यः ।
अथ वामदेव्यः । वामदेव उवाच— + इति प्रथमः पटलः ।
अथातः संप्रवक्ष्यामि पुनश्चरणमुत्तमम् । + +

End :

सर्वान् कामानयं प्राप्य सर्वविद्यानिधिर्भवेत् ।
न चाशुश्रूषवे दद्यादिमां विद्यां विचक्षणः ।
गोपनीयं प्रयत्नेन मदीयवचनं तथा ॥
परमानन्दतत्त्वात्मप्रज्ञानानन्दचिद्घनम् ।
आश्रयेद्दक्षिणामूर्तिमवाङ्मनसगोचरम् ॥

Colophon :

इति श्रीद्वितीयः पटलः ।

327

Sl. No. 49003 दक्षिणामूर्तिमन्त्रविधिः Ms. No. C. 3494-9

Beginning :

अस्य श्रीमेधादक्षिणामूर्तिमहामन्त्रस्य ब्रह्मा ऋषिः । ओं बीजम् । नमश्शक्तिः । स्वाहा कीलकम् । श्रीदक्षिणामूर्तिप्रसादसिद्ध्यर्थे जपे विनियोगः ॥ अं हृदयाय नमः ।

End :

लमित्यादिपञ्चपूजा ॥

ओं ऐं क्लीं सौः सौः क्लीं ऐं इति जपः ।

वागीश्वरी च विद्महे

कामेश्वरी च धीमहि ।

तन्नः शक्तिः प्रचोदयात् ॥

न्यासध्यानं पूर्ववत् । गुह्येति च समर्पणम् ॥

Colophon :

॥ श्रीः ॥

328

Sl. No. 49006 दक्षिणामूर्तिमन्त्रसन्ध्याविधिः Ms. No. C. 564-5

Beginning :

नित्यसन्ध्यानन्तरं मन्त्रसन्ध्यां करिष्ये ।

पूर्ववदाचम्य तत्पुरुषाय विद्महे विद्यागौराय धीमहि । तन्नो दक्षिणामूर्तिः प्रचोदयात् इति गायत्र्या प्राणानायम्य देशकालौ सङ्कीर्त्य दक्षिणामूर्तिमुद्दिश्य दक्षिणामूर्तिप्रीत्यर्थं तन्मन्त्रोपासनाङ्गसन्ध्यामुपासिष्ये ।

End :

मूलमन्त्रमुच्चरन् आत्मप्रदिक्षणपूर्वकं दक्षिणामूर्तिरहमस्मि इत्युपविश्य मूलमन्त्रेण सप्ततर्पणानि कृत्वा तीरे उपविश्य तद्गायत्रं दशवारं जप्त्वा गुर्वादीन् प्रणमेत् ।

Colophon :

इति सन्ध्याविधिः ।

329

Sl. No. 49009 **दक्षिणामूर्तिमालामन्त्रः** **Ms. No. P. 4195–5**

Beginning :

ओं नमो भगवते दक्षिणामूर्तये स्मरणमात्रसन्तुष्टाय महाभयनिवारणाय ज्ञानप्रदाय च चिदानन्दात्मने परब्रह्मस्वरूपिणे रजताद्रिनिवासाय—

End :

भस्मोध्दूळितविग्रहाय नागयज्ञोपवीताय जटामकुटालङ्कृताय गङ्गाचन्द्रसर्पभूषणाय सकलविद्यां मे झटिति कुरु कुरु स्वाहा ॥

Colophon :

इति श्रीदक्षिणामूर्तिमालामन्त्रं सम्पूर्णम् ।

330

Sl. No. 49014 **दक्षिणामूर्तिमेधामन्त्रकल्पः** **Ms. No. P. 114–1**

Beginning :

मूर्ध्नि पञ्चललाटे च चक्षुषोः श्रवणद्वये ।

नासापुटद्वये पश्चात् गण्डयोरुभयोरपि ॥
+ योगन्यासं कुर्यात् ।

End :

कैलासाद्रिनिभं शशाङ्ककलमास्फूर्जज्जटामण्डितं
नासालोकनतत्परं त्रिणयनं वीरासनाध्यासितम् ।
मुद्रालङ्ककरं गजानुविलसत्पाणिं प्रसन्नाननं
कट्या बद्धभुजङ्गमं मुनिवृतं वन्दे महेशं परम् ॥

अस्य पुरश्चरणजपः दशांशहोमतर्पणादि लं तर्पणं पूर्ववत् ।

Colophon :

इति नारदीयदक्षिणामूर्तिमेधामन्त्रकल्पे पञ्चमः पटलः ।

331

Sl. No. 49017 **दक्षिणामूर्त्यक्षरमालामन्त्रः** **Ms. No. C. 564-23**

Beginning :

देवर्षिब्रह्मर्षिराजर्षयः ऊचुः ।

देवदेव महेशान सर्वज्ञ करुणानिधे ।
वीणापुस्तकं चाक्षमालां भद्रां विज्ञानमुद्रिकां ॥
चतुर्भुजैर्दधानेश प्रसिद्ध करुणानिधे ।
अज्ञानं मामकं क्रूरं मूर्तं कृत्वा कृतादिताः ।

End :

इतीदं दक्षिणामूर्तिमन्त्रराजस्य संस्तवम् ।
गायन्ति ये शुद्धचित्तास्ते यान्ति परमं पदम् ॥

दक्षिणामूर्तिमन्त्रस्य जप्तारो ये मनीषिणः ।
पदवाच्यार्थसम्पन्ना ते यान्ति परमां गतिम् ।।

Colophon :

इति श्रीदक्षिणामूर्तिकल्पे प्रपञ्चसारे अक्षरमालिकामन्त्रः
सम्पूर्णः ।

332

Sl. No. 49027 दत्तात्रेयकल्पः Ms. No. C. 843-1

Beginning:

अस्य श्रीदत्तात्रेयमहामन्त्रस्य शबररुद्र ऋषिः । जगती छन्दः ।
दत्तात्रेयः परमात्मा देवता । + + +

व्याख्यामुद्रां करसरसिजे दक्षिणे सन्दधानो
जानुन्यस्तेतरवरकरो(?) जाततात्म्रो नभांसः ।।
ध्यानाधानात्सुखपरवशादर्धमामीलिताक्षः
दत्तात्रेयो भसितधवलः पातु नः कृत्तिवासाः ।

End :

मालामन्त्रं प्रवक्ष्यामि + ओं नमो भगवते दत्तात्रेयाय + सर्वयन्त्र-
स्वरूपाय सकलपल्लवस्वरूपाय ओं नमो महासिद्धाय स्वाहा ।
चतुश्चत्वारिंशदुत्तरद्विशताक्षरो मनुः ।

सकृदुच्चारमात्रेण सर्वसिद्धिर्भवेत् क्षणात् ।।
अनुष्टुप्मन्त्रवत्सर्वं विज्ञातव्यं गुरोर्मुखात् ।।

Colophon :

इति श्रीमहोड्डामरेश्वरतन्त्रे दत्तात्रेयकल्पस्समाप्तः ।

333

Sl. No. 49034 दत्तात्रेयपञ्चपक्षिप्रश्नावलिः Ms. No. C. 2014-3

Beginning :

श्रीगुरुदत्तात्रेयोक्तमन्त्राः ।

ओं ह्रां श्रीं वाग्वादिनि स्वाहा । ओं ऐं ह्रीं वदवदवाग्वादिनी स्वाहा ।

ओं सिद्धिः । ओं श्रीं गं इति मन्त्रेण पूगीफलमभिमन्त्र्य पृच्छकहस्ते दत्त्वा पश्चादिदं वदेत् ॥

End :

क्रयविक्रयो × ग्रामान्तरगतो मिलितस्य लाभः । गमनकार्यसिद्धिः । दिवादे जयः । समस्तकार्यसिद्धिः । भो पृच्छक कश्चित्कालं तव भाग्यदिवसाः आगताः । तथा धैर्यमवलंव्य साहसः कर्तव्यः ॥

Colophon :

इति श्रीदत्तात्रेयकृत पञ्चपक्षिप्रश्नावलिषु × पद्धतिः समाप्ता ।

334

Sl. No. 49042 दत्तात्रेयमन्त्रविधिः Ms. No. C. 2014-1

Beginning :

किरातरूपो भगवान् कदाचिद्गिरिजापतिः ।
कदाचिदिष्टालापेषु पार्वत्या पृष्ट ईश्वरः ॥

त्वत्तः श्रुतानि सर्वाणि मन्त्रजालानि कृत्स्नशः ।
× वा द्रवति मन्त्रं तु तत्पश्चा × द्रसागरे ॥

...अपेक्षावर्तते श्रोतुं दत्तात्रेयस्य योगिनः ॥

End :

एकवारोच्चरणमात्रेण मन्त्रस्याखिलसिद्धयः ।
न तपश्चरणक्लेशो नात्यन्तनियमोऽथवा ॥

अतिध्यानप्रयासो वा नान्यन्तहवनक्रिया ॥
प्रत्यहं दशधोच्चारात् दत्तात्रेयायते भुवि ॥

Colophon :

॥ श्री ॥

335

Sl. No. 49054 दत्तात्रेयषडक्षरीमन्त्रविधिः **Ms. No. C. 3494-5**

Beginning :

अस्य श्री दत्तात्रेयषडक्षरीमहामन्त्रस्य शबररूपी सदाशिव ऋषिः । गायत्री छन्दः । श्री दत्तात्रेयो देवता । ओं बीजं स्वाहा शक्तिः + दत्तात्रेयेति कीलकम् । मम —— —- गः ॥

End :

एतानि ते करतलेऽप्यपसव्यसव्ये
सोपानपर्वसदृशोऽप्युपरि स्वनाभेः ।
प्रस्तार्य चर्मवसनं भसिताङ्गरागं
अत्रेस्सुतं भजत रक्तजटाकलापम् ॥

पूजा ओं श्रीं ह्रीं क्लीं ग्लौं द्राम् ॥ शेषं पूर्ववत् ॥

Colophon :

॥ श्रीः ॥

336

Sl. No. 49055 **दत्तात्रेयषोडशाक्षरीमहामन्त्रविधिः** **Ms. No. C. 3494-2**

Beginning :

अस्य श्रीदत्तात्रेयषोडशाक्षरीमहामन्त्रस्य शबररूपी रुद्र ऋषिः । गायत्री-छन्दः । श्री दत्तात्रेयो देवता । ओं वीजं नमः शक्तिः । दत्तात्रेयायेति कीलकम् । मम दत्तात्रेयप्रसादसिद्ध्यर्थे जपे विनियोगः ॥

End :

मन्दारमूले मणिपीठसंस्थं
सुवर्णदानैकनिबद्धदीक्षम् ।
ध्यायेत् परीतं नवनाथसिद्धैः
दारिद्र्यदावानलकालमेघम् ॥

पूजा । ओं ऐं क्लां क्लीं क्लूं ह्रां ह्रीं ह्रूं सौः दत्तात्रेयाय स्वाहा । शेषं पूर्ववत् ॥

Colophon :

॥ श्रीः ॥

337

Sl. No. 49062 **दत्तात्रेयाष्टाक्षरीमन्त्रविधिः** **Ms. No. C. 3494-5**

Beginning :

अस्य श्री दत्तात्रेयाष्टाक्षरीमहामन्त्रस्य शबररूपी सदाशिवऋषिः । गायत्री

छन्दः । श्री दत्तात्रेयो देवता । ओं बीजम् । स्वाहा शक्तिः । दत्तात्रेयेति कीलकम् । मम दत्तात्रेयप्रसादसिद्ध्यर्थे जपे विनियोगः ॥

End :

योगारूढं योगपट्टेन वीतं
हस्तद्वन्द्व जानुयुग्मे प्रसार्य ।
अंसाग्रस्पृग्रक्तचञ्चञ्जटाकं
दत्तात्रेयं भावयेद्वीक्षमाणम् ॥

पूजा ॥ द्रां दत्तात्रेयाय नमः ॥ शेषं पूर्ववत् ॥

Colophon :

॥ श्री ॥

338

Sl. No. 49069 **दशसंस्कारः** **Ms. No. P. 5056-31**

Beginning :

शारदातिलके—

मन्त्राणां दश कथ्यन्ते संस्काराः सिद्धिदायिनः ।
जननं जीवनं पश्चात्ताडनं बोधनं तथा ॥

End :

प्रणवभुवनेश्वरीश्रीबीजान्ते साध्यमन्त्रं कृत्वाष्टोत्तरशतवारं जपेत्— इत्युद्दीपनम् । अधोर्ध्वं × × तार्धश्लोकस्यायमर्थः स्फुट एव ।

Colophon :

इति दशसंस्कारः समाप्तः ।

339

Sl. No. 49086 दीक्षातत्त्वप्रकाशिका **Ms. No. C. 4135-1**

Beginning :

तत्वोमेशपदं रामकिशोरेण विरच्यते ।
सारं निर्णीय तन्त्राणां दीक्षातत्त्वप्रकाशिका ।।

दिव्यज्ञानं यतो दद्यात्कुर्यात्पापस्य संक्षयम् ।
तस्माद्दीक्षेति सा प्रोक्ता मुनिभिस्तत्त्ववेदिभिः ।।

End :

महादीक्षा तथा दीक्षा उपदेशस्तदन्तरम् ।
युगे युगे च कर्तव्या उपदेशः कलौ युगे ।।

चन्द्रसूर्यग्रहे तीर्थे सिद्धिक्षेत्रे शिवालये ।
मन्त्रमात्रप्रकथनमुपदेशः स उच्यते ।।

Colophon :

इति रामकिशोरन्यायालङ्कारभट्टाचार्यकृतायां दीक्षातत्वप्रकाशिकायां षष्ठः परिच्छेदः ।।

समाप्तोऽयं ग्रन्थः ।।

340

Sl. No. 49088 दीक्षापटलः **Ms. No. P. 5002-15**

Beginning :

शृणु देवि प्रवक्ष्यामि दीक्षां स्वामिरसाज्ञया (= सामीरसंज्ञया)

गुह्याद्गुह्यतरं भर्तृ × × संध्यामुपास्य च। सुपूजामन्दिरं गत्वा द्वारपालान् समभ्यर्च्य च।
नवनाथांश्च सम्पूज्य प्राणायामं समाचरेत् ॥

End :

दीक्षितः सोऽधिकस्तस्मात् चण्डालो मुक्तिभाग्भवेत् ।
सङ्ग्रहेणैवमाचार्यदीक्षाकर्म मयोच्यते ।
भक्तसंरक्षणार्थाय त्वं भूयः श्रोतुमिच्छसि ॥

Colophon :

इति श्रीवामकेश्वरतन्त्रे दीक्षापटलः समाप्तः ।

341

Sl. No. 49089 **दीक्षाप्रकारः** **Ms. No. P. 8715-3**

Beginning :

देव्युवाच—

भगवन् श्रोतुमिच्छामि शिष्यस्य शुभलक्षणम् ।
उपदेशक्रमं तस्य दीक्षा भेदं च मे वद ॥

शिव उवाच—

दीक्षाविधिं प्रवक्ष्यामि येन शिष्यः सुधीर्भवेत् ।
दीव्यते सकलं तस्मै गुरवे प्राणसञ्चितम् ॥

End :

पूर्णदीक्षाक्रमो देवि यस्य कस्यपि नोच्यते ।
द्वादशाब्दक्रमात्तस्य परीक्ष्य विधिमुच्चरेत् ॥

पूर्णदीक्षाविधिस्सम्यग्मया किञ्चित्प्रकाशतः ।
समासीनकुलेशानि किं भूयः श्रोतुमिच्छसि ॥

Colophon :

इति श्रीपरानन्दतन्त्रे सपादलक्षग्रन्थे मन्त्रखण्डे द्वितीयपादे पूर्णदीक्षाक्रमो नाम षोडशोद्रेकः ।

312

Sl. No. 49095 दीपदुर्गाविधिः Ms. No. P. 548–2

Beginning :

पार्वत्युवाच—

देव देव महादेव करुणाकर शङ्कर ।
दीपदुर्गाविधानाख्यं अत्याश्चर्यकरं तथा ॥
आस्तिकेभ्यः(?) शिवं वद मे करुणाकर ।

ईश्वर उवाच—

अत्याश्चर्यकरं लोके मन्त्रमेतत्सुपावनम् ।
अतीतानागतं चैव अशरीरेण × च्यते ॥

End :

दीपस्तम्भावना(?)तं च दुर्गाध्यानपुरस्सरम् ।
त्रिशतं जपमात्रेण दीपं वदति निश्चयम् ॥

मन्त्रोच्चारणशीलस्तु द्विशतादेवमीश्वरी ।
नरवद्वद × सत्यं अत्याश्चर्यं कलौ युगे ॥

Colophon :

इति श्रीरहस्यपटले उमामहेश्वरसंवादे दीपदुर्गाविधिर्नाम अष्टमः पटलः ॥

343

Sl. No. 49102 दुर्गाकल्पः **Ms. No. A. 47-4**

Beginning :

अथ दुर्गाकल्पः ।

सर्वकामसमृद्धये प्रतिसंवत्सरं सर्वे सुकृतिनो दुर्गामावाहयेत् । जातवेदस इत्यादिना गौरीमावाहयामि । तामग्निवर्णामिति सम्पूज्य अग्नि त्वं पारयेति यज्ञोपवीतम्...

End :

तं वरुणा उताग्नाविष्णू इत्येकादशानुवाकाः । दुर्गागायत्र्या हरिरुद्वासयेत् । भगवत्यै दुर्गादेव्यै हविरुद्वासयामीति । शेषमन्नं ब्राह्मणेभ्यो दद्यात् ।

Colophon :

इति दुर्गाकल्पः ।

[कल्पचतुष्टयं सम्पूर्णम्]

344

Sl. No. 49104 दुर्गानवाक्षरीजपमन्त्रविधिः **Ms. No. P. 5292-2**

Beginning :

अस्य श्री दुर्गानवाक्षरीमहामन्त्रस्य ब्रह्मविष्णुमहेश्वराः ऋषयः । अनुजु-

स्सामाथर्वाणि । छन्दांसि सकलजगत्सृष्टिस्थितिसंहारकारिणी महाकाली महालक्ष्मी महासरस्वती देवता । ऐं बीजम् ।

End :

मातर्मे मधुकैठभघ्नि महिषप्राणापहारोद्यमे
हेलानिर्मितधूम्रलोचनपथे हे चण्डमुण्डार्दिनि ।
निश्शेषीकृतरक्तबीजदनुजे नित्ये निसुम्भापहे
सुम्भध्वंसिनि संहराशु दुरितं दुर्गेनमस्तेऽम्बिके ॥
लमित्यादि पञ्चपूजा .... वत्से ॥

Colophon :

॥ हरिः ओम् ॥

345

Sl. No. 49105 दुर्गापरमेश्वरीमन्त्रः **Ms. No. P. 4252-4**

Beginning :

अस्य श्री दुर्गापरमेश्वरीमहामन्त्रस्य ब्रह्माविष्णुमहेश्वराः ऋषयः । विराडन्तर्यामि नारायणकिरातरूपधरः । ईश्वरो देवता । दुं बीजं । स्वाहा शक्तिः । स्वाहा कीलकम् ।

End :

कालाम्बुदश्यामलमन्त्रकास्यां
कराळमव्याहतमप्रमेयाम् ।
लोलालकं लोकविनाशहेतुं
लुण्ठन्ति × नौमि धृताट्टहासम् ॥

मनुः – ओं नमो भगवते अत्युग्रवीरभैरवाय सर्वविघ्नविनाशनाय मं स्वाहा ॥

Colophon :

346

Sl. No. 49119 दुर्गामहाविद्यामहामन्त्रः **Ms. No. C. 3615**

Beginning :

उर्तुदशिमिजावरितल्पेजेतल्प उर्तुदा गिरीगँ् रनुप्रवेशय । मरीचीरुपसन्नुदा-यावदितः पुरस्तादुदयाभिसूर्यः भावदितोमुं नाशय योऽस्मा द्रेष्टि यं च वयं द्रिष्मः । खष्टउजहि । छिन्दि भिन्दि अन्धिखइ इति वाचः क्रूराणि परियाहिनि नमस्तेऽस्तु ममाहिगूँ श्रीः द्रिषन्तं मे भीतय । तं मृत्यो मृत्यवे नय अरिष्टं भञ्जय स्वाहा ।

End :

अनविद्यामहाविद्यां यः पठेत्प्रत्यहं निशि ।
सोऽचिराद्वत्सरेणैव सर्वविद्यां तमाप्नुयात् ।। +

पुरितमेघाद्गगनादावरसोदर्यसोदर्यवत् । ओं नमो भगवते रुद्राय सर्वदेवान्तकाय हंसस्सोऽहं स्वाहा ।।

Colophon :

347

Sl. No. 49129 दुर्गासप्तशतीव्याख्या **Ms. No. P. 7628-2**

Beginning :

।। स्वरोचिषे द्वितीयमन्वन्तर इति यावत् चैत्रो नाम स्वरोचिषमनोः सूनुः ।

स्फुटमन्यत् ।

End :

पाठेऽर्थे च विवेकशून्यहृदयाः पश्यन्ति नानात्मतां
शास्त्रे दोषमुदाहरन्ति कविकालेपा वृथाऽज्ञानतः ।
एतन्मन्त्र(?) चन्द्रिकाप्रकटितं श्रीसप्तशत्याः परं
सारं साध्ववधार्य साधयति चेत्सिद्धं न किं स्यात्फलम् ॥

Colophon :

इति श्री दीक्षितभीमसेनविरचितायां सप्तशतीव्याख्यायां मन्त्रचन्द्रिका-समाख्यायां टीकायास्समाप्तिमगमत् ॥

348

Sl. No. 49130 **दुर्गाहृदयमन्त्रः** **Ms. No. P. 10739-4**

Beginning :

अथ दुर्गाहृदयमन्त्रः । स च महिषपदादिमर्दिन्युपयेतस्वाहान्तः ॥
दुर्गाहृदयमन्त्रस्य मार्कण्डेयऋषिः । गायत्री छन्दः । महिषमर्दिनी दुर्गा देवता । निं बीजम् । स्वाहा शक्तिः । महिंषहिंस्तके नमः ॥

End :

त्रिमधुरयुक्ततिलैर्दशा....होमः । गोर चा....हुता होमनाशः नः । पच्यहुताज्ञयः । दूर्वाभिः शान्तिकृत् । आज्यैः पलाशैः शुद्धिकृध्द्रुतम् । परममुतसंख्ययात....जुहुयात् ॥

Colophon :

श्रीगुरुप्रकाशः ।

349

Sl. No. 49138 दूतीयागकल्पः **Ms. No. C. 2568-3b**

Beginning :

देवीयामले— ईश्वर उवाच....
दूतीयागविधिं वक्ष्ये कालधर्मोत्तमोत्तमम् ।
तस्यानुष्ठानमात्रेण स्वयं ब्रह्मात्मतां व्रजेत् ॥

सन्ति नानाविधा धर्माः ऐहिकामुष्मिकप्रदाः ।
तस्यागन्तुकमालोक्य तथान्यं मन्त्रसङ्ग्रहम् ।।

End :

ततो दद्यान्मुखं दिव्यं तस्याः पुण्यं न गण्यते ।
आलिङ्गने हरेद्रोगान् धनधान्यादिचुम्बने ॥
नखदन्तकृताद्यैश्च
तथा मोक्षः प्रजायते ।
सायुज्यं सङ्गमेन स्यात्
तथ्यमेव न संशयः ॥
इति पञ्चमयागप्रशंसा ॥

Colophon :

हरिः ओम् ।

350

Sl. No. 49148 देवतान्यासविधिः **Ms. No. P. 5002-60**

Beginning :

अथदेवतान्यासमाह—

ओं ऐं ह्रीं श्रीं ह्सौः अं आं सहस्रकोटियोगिनीकुलसेवितायै निवृत्त्यम्बा-देव्यै नमः दक्षपादाङ्गुष्ठे । इं ईं साहस्रकोटियोगिनीकुलसेवितायै योगि-प्रतिष्ठाम्बादेव्यै नमः । दक्षगुल्फे ॥

End :

अकारादिक्षकारान्तमुच्चार्य सर्वदेवतात्मिकायै श्रीपराम्बादेव्यै नमः इति शर्वाङ्गव्यापकं इति कुर्यात् । इति देवता न्यासविधिः ॥ श्रीगुरुदेवतार्पणमस्तु ॥ शिवम् ॥

Colophon :

॥ श्रीः ॥

351

Sl. No. 49151 देवतामूर्तिप्रमाणनिर्णयः **Ms. No. P. 4212-52**

Beginning :

तन्त्रसारे—

सुवृत्तत्र्यङ्गुलग्रीवां आस्तनाच्च षडङ्गुलाम् । इति ग्रीवापरिमाणं त्र्यङ्गुल-परिमितिः इति तन्त्रसारे उक्तम् । बृहदारण्यकभाष्ये...

नवाङ्गुलमुखो यस्तु
गले तु चतुरङ्गुलम् ।

End :

षडङ्गुलं तु ह्यधरात्
कण्ठकूपं तथैव च ।

इति । तत् स्तनात् हृदयस्य एकाङ्गुलेन न्यूनत्वात् । अत्र कण्ठकूपेन सह कथनात् कण्ठकूपस्य अङ्गुलमात्रत्वं न विरुद्धमिति भावः ॥

Colophon :

352

Sl. No. 49158 देवीकवचस्तोत्रमहामन्त्रः **Ms. No. P. 1019-7**

Beginning :

अस्य श्री देवीकवचस्तोत्रमहामन्त्रस्य । ब्रह्मा ऋषिः । अनुष्टुप् छन्दः । श्रीमहालक्ष्मीर्देवता । श्रीं बीजम् । ह्रीं शक्तिः । स्वाहा कीलकम् । श्रीमहालक्ष्मीप्रसादसिध्यर्थे जपे विनियोगः ॥

End :

नश्यन्ति दर्शनात्तस्याः कवचं हृदि यस्य वै ।
मनोन्नतिर्भवेत्तस्य तेजोवृद्धिः प्रजायते ।
यशोवृद्धिर्भवेत्पुंसां कीर्तिर्भूतलमण्डले ।
तस्माज्जपेत्सदा भक्त्या कवचं मा × दं मुने ॥
जपेत्स— ॥

Colophon :

353

Sl. No. 49160 देवानवाक्षरमन्त्रः **Ms. No. C. 2093-3**

Beginning :

अथ सप्तशती पाठाङ्गत्वे ननवार्णमन्त्रमाह—वागिति वाक् । माया ह्रीं

मदनः क्लीं दीर्घलक्ष्मीं चां तन्द्रियः श्रुतिं दुयुक्तू उं बिन्दुयुक्तामुं—डायै स्वरूपं सद्दक्जलं वि कुर्मद्वयं च द्वयम् ।(??)

End :

सहस्रं × शतं कृत्वा कार्यसिद्धिर्भविष्यति ।
जपाद्दशांशं शतैर्होमैः सर्षपैस्तण्डुलैर्धृतैः ॥

पञ्चखाद्ययुतैर्जप्त्वा स्वमिवश्यकरी तथा ।
ब्राह्मणान्भोजयेत्पश्चात् आत्माभीष्टफलप्रदम् ।।

४ पक्ष २ इषु ४ अब्धी ४ अंक ९ यम २ एतेषु षडङ्के षंडङ्गमन्त्रार्णः ।

Colophon :

श्री

354

Sl. No. 49165 देवीप्राणप्रतिष्ठामन्त्रः **Ms. No. P. 4999–12**

Beginning :

प्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुस्सामाथर्वणं च्छन्दांसि सकलजगत्सृष्टिकारिणी प्राणशक्तिः परा देवता—

End :

महापद्मवनान्तस्थे परमानन्दविग्रहे ।
सर्वभूतहिते मातः एह्येहि परमेश्वरि ॥

अस्मिन् देहे सान्निध्यं कुरु कुरु इति मूलमन्त्रः ॥

Colophon :

श्री

355

Sl. No. 49172 देवीमाहात्म्यम् Ms. No. P. 7982-80

Beginning :

ऋषिः ॥ अन्तर्गोप्यं ततो मन्त्राः ग्रन्थमध्ये प्रकीर्तिताः ।
सन्तो विदन्तु गुरुतो मन्त्रग्रामं तथार्चनम् ॥

त्वं स्वाहा त्वं स्वधेत्युक्त्वा बिन्दुगं बिन्दुना दशाम् ॥

End :

महालक्ष्मीं प्रतिदिनं आश्विने तु विशेषतः ।
जपं जपित्वा सन्तर्प्य युवतीश्च द्विजानपि ॥

सिंहासनाग्रतः शक्तः प्राप्तवांस्त्रिदशेशताम् ।
अन्येऽपि भुवि राजानः तत्तत्पदमवाप्नुयुः ॥

Colophon :

इति श्री मार्कण्डेयपुराणे सूर्यसावर्णिकमन्वन्तरे श्रीदेवीमाहात्म्ये समिष्टिपूजाप्रकाररहस्यं नाम एकविंशोऽध्यायः ॥

356

Sl. No. 49179 देवीरहस्यनिधितन्त्रम् Ms. No. C. 2543

Beginning :

श्रीभैरव उवाच—

अधुना देवि वक्ष्यामि रहस्यं परमाद्भुतम् ।
यन्न सर्वेषु तन्त्रेषु यामलादिषु भाषितम् ॥

परादेवीरहस्याख्यं तन्त्रमन्त्रोच्च(?)विग्रहम् ॥

End :

स्वपुत्रेभ्योऽप्यशिष्येभ्यः न देयं तु मुमुक्षुभिः ।
इदं हि सारं तन्त्राणां तत्त्वे सर्वस्वमुत्तमम् ॥

रहस्यं देवि दुर्गायाः गोपनीयं स्वयोनिवत् ॥

Colophon :

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्यं षष्ठितमपटलः ।
समाप्तोऽयं देवीरहस्यनिधिस्तन्त्रः परामार्थप्रदीपिकापरनामा तन्त्रराजः ।

357

Sl. No. 49180 **देवीसप्तशती** **Ms. No. C. 3882–1**

Beginning :

मार्कण्डेय उवाच—

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ।
निशामय तदुत्पत्तिं विस्तराद् गदतो मम ॥

महामायानुभावेन यथा मन्वन्तराधिपः ।
स बभूव महाभागः सावर्णिस्तनयो रवेः ॥

End :

इति दत्वा तयोर्देवी यथाभिलषितं वरम् ।
बभूवान्तर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता ।।

एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ।
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ।।

Colophon :

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमहात्म्ये सुरथवैश्ययोर्वर-प्रदानं नाम त्रयोदशोऽध्यायः ।

358

Sl. No. 49183 **देवीसप्तशतीव्याख्या** **Ms. No. C. 3882-2**

Beginning :

मार्कण्डेयेन क्रोष्टुकिं भागुरिं प्रति उक्तं स्तोत्रं जैमिनिं प्रति पक्षरूपैर्मुनि-पुत्रैरुक्तं मार्कण्डेयपुराणे । तद्यथामति व्याचक्ष्महे । तत्रादौ व्याख्यास्यमान-स्तोत्रे स्तूयमानदेवतास्वरूपं प्राधानिकरहस्याख्ये ग्रन्थविशेषे उक्तं विविच्य दर्श्यते ।

End :

भीमा शक्तिः । भ्रामरी बीजम् । सूर्यस्तत्त्वम् । उच्चाटनादौ विशेषतो विनियोग इति । तत्तु कात्यायनीतन्त्रोक्तमन्त्रविभागेन विरोधात् निर्मूलमिति ध्येयम् ।

Colophon :

इति श्रीमदुपाध्यायोपानामकशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते-

मार्कण्डेयपुराणान्तर्गतसप्तशत्याख्यचण्डीस्तोत्रस्य व्याख्याने चण्डीस्तोत्र-प्रयोगविधिः समाप्तः ।

359

Sl. No. 49184 **देवीसप्तशतीव्याख्या** **Ms. No. B. 710–2**

(कात्यायनीतन्त्रसम्बन्धिनी)

Beginning :

अथ तौ गिरीशगिरिशौ
मातामहतां च ताततां यातौ ।
सर्वस्य यत्प्रभावात्
वन्दे वीणां लतां तु गिरिजाताम् ॥

\+ + + + +

शैवोऽपि नामको वित्तो नीलकण्ठोऽभिधानतः ।
सप्तशती सप्तशतमन्त्रव्याख्या विभाजके ॥ ५ ॥

कात्यायनीतन्त्रमध्ये पटलानां विबोधिनीम् ।
व्याख्यां करोति शिवयोस्तोषाय जनतामुदे ॥

End :

+इति सप्तमी—उपतेगा इति-हे रात्रि चिद्घने भुवनेश्वरि ते त्वां गा इव पयसा दोग्ध्री धेनुरिव + + + इति सप्तमी ।

Colophon :

(इति रात्रिसूक्तस्य द्वितीयव्याख्या समाप्ता)
विकृतौ वत्सरे मासे आश्विने कृष्णपक्षके ।
प्रतिपद्भौमदिवसे [illegible]चण्डीस्तुतिर्मुदा ॥

लिखिता साम्बतुष्ट्यर्थं सतां सम्मोदसिद्धये ।
नारायणेन विप्रेण प्रवाहपुरवासिना ॥

360

Sl. No. 49190 देशिकमन्त्रः Ms. No. P. 6128-33

Beginning:

अस्य श्रीदेशिकमन्त्ररत्नस्य श्रीरङ्गराज ऋषिः । गायत्री छन्दः । श्रीवेदान्तदेशिको देवता । वं बीजम् । नमः शक्तिः । वेदान्तगुरवे कीलकम्---

End :

रविसदृशतनुः श्रीवेंकटाचार्यवर्यः
करकलितपवित्रः सोत्तरीयस्वभावः ।
सरसिजमणिमालामूर्ध्वपुण्ड्रं दधानः
मम मनसि विभाते सन्ततं सन्निधत्ताम् ॥

Colophon :

361

Sl. No. 49195 द्रव्याकर्षणविधिः Ms. No. P. 8106-8

Beginning :

अथ द्रव्याकर्षणविधिः—

शक्तिहस्ते द्रव्यं स्वाहा—ईशान्यभागे आकर्षणं कृत्वा शक्तिपादे गन्धपुष्पाक्षतैरलङ्कृत्य शङ्खमुद्रां प्रदर्श्य शक्तिमुद्रां स्वाहानमस्कारं भावयेत् ।

End :

त्रिवारं ईक्षणैर्वीक्ष्य—

त्रिपूर्णकुम्भस्फटिकाक्षमालां
श्रीपुस्तकाभीतिवरप्रदं च ।
करोतु धानं कमलायताक्षी
श्रीबालदेवीं मनसां स्मरामि ॥
इति पूर्णकुम्भध्यानम् ॥

Colophon :

॥ श्रीः ॥

362

Sl. No. 49196 द्रुयमन्त्रकल्पः **Ms. No. P. 4396–29**

Beginning :

ओंकारपूर्वाय नमो वदामो
नारायणायामितवीर्यदाय ।
वयं न जानीमहि तत्प्रभावं
तत्पादपद्मं शरणं व्रजामः ॥

श्रीपराशर उवाच—

श्रीनारदं मुनिश्रेष्ठं सर्वलोकेश्वरं गुरुम् ।
प्रणम्य शिरसा देवं ऋषीणामुत्तमं गुरुम् ॥

End :

क्षत्रियो वाऽथ वैश्यो वा गुरुत्वं चैव गच्छति ।

सर्वेषां च गुरुर्ज्ञेयः ब्राह्मणो वैष्णवस्सदा ॥

एवं ज्ञात्वा मुनिश्रेष्ठ द्वयं नित्यमतन्द्रितः ।
श्रीमन्नारायणं ध्यात्वा जपेत्तं पुरुषोत्तमम् ॥

Colophon :

इति श्रीनारदीये पाद्मपुराणे परमरहस्यमन्त्रोपनिषदध्याये
परमरहस्यद्वयमन्त्रकल्पं नाम द्वात्रिंशोऽध्यायः

363

Sl. No. 49199 द्वात्रिंशद्बाहुनृसिंहस्वरूपम् **Ms. No. P. 4925-81**

Beginning :

ध्येयो महत्तमे कार्ये षोडशद्वयहस्तवान् ।
नृहरिः सर्वभूताद्यं सर्वसिद्धिकरः प्रभुः ॥
दक्षिणे चक्रपद्मे च परशुं पाशमेव च ।
हलं च मुसलं चैवाभयं चाङ्कुशं तथा ॥

End :

कार्मुकं तर्जनीमुद्रां गदां डमरुसर्पकौ ।
द्वाभ्यां कराभ्यां च रिपोर्जान(?)मन्तक पीडनम् ॥

ततोर्ध्वकृतहस्ताभ्यां मन्त्रमालाधरं हरिम् ।
अधः स्थिताभ्यां हस्ताभ्यां हिरण्यकविदारणम् ॥

प्रियङ्करं च भक्तानां दैत्यानां च भयङ्करम् ।
नृसिंहं संस्मरेदित्थं महामृत्युभयापहम् ॥

Colophon :

इति मन्त्रदेवताप्रकाशिकायाम् ।

364

Sl. No. 49201 **द्वादशलिङ्गतोभद्रम्** **Ms. No. C. 4254-8**

Beginning :

रुद्रयामले—

प्रागुदीच्या गता रेखाः षट्त्रिंशद्भिः प्रकल्पयेत् । पदानि द्वादशशतं पञ्चविंशतिरेव च ।

End :

य इदं लिङ्गितं गेहे स्थापयित्वा नरोत्तमः ।
मामर्चयति तस्याशु मोक्षः करतले भवेत् ।। १४ ।।

Colophon :

365

Sl. No. 49202 **द्वादशविद्योद्धारः** **Ms. No. P. 8714-18**

Beginning :

अथ प्रसिद्धपञ्चदशाक्षरीमन्त्रप्रसङ्गा उपासकभेदेन द्वादशविध श्रीविद्या-मन्त्राश्च शास्त्रोद्धारकोक्त[illegible]प्रकारेण लिख्यन्ते ।। प्रथमं तदुपा-

सकानां नामानि लिख्यन्ते ।।

End :

शक्त्यादिबीजानि विलोमितानि
श्रीषोडशार्णी त्रिपुराम्बिकायाः ।।

अयं मन्त्रराजः द्विविधः बीजषोडशीवर्णषोडशीति एतदुभयस्वरूपं श्रीगुरुमुखाद् ज्ञातव्यम् ।।

Colophon :

366

Sl. No. 49213 **धन्वन्तरिमन्त्रजपविधिः** **Ms. No. P. 3023-95**

Beginning :

अस्य श्रीधन्वन्तरिमन्त्रस्य ब्रह्मा ऋषिः । अनुष्टुप् छन्दः । परमात्मा श्रीधन्वन्तरिर्देवता । अनन्तरोगशान्त्यर्थे विनियोगः । पूर्णज्ञानात्मने हृदयाय नमः—

End :

मूर्तिस्थितादमृत एव सुधा द्रवन्ति
भ्रूमध्यगाच्च तत एव च तालुसंस्थात् ।
आर्द्रा(?)च्च नाभिसदनात् अधरस्थिताच्च
ध्यात्वाऽभिपूरिततनुद्युति तन्न हन्यात् ।। मन्त्रः ।।

Colophon :

।। श्रीः ।।

367

Sl. No. 49218 धन्वन्तरिमन्त्रविधिः **Ms. No. C. 1980-3**

Beginning :

अस्य श्री धन्वन्तरिमहामन्त्रस्य अपान्तरतमा ऋषिः । अनुष्टुप् छन्दः । धन्वन्तरिर्देवता । ओं बीजम् । ह्रीं शक्तिः । क्लीं कीलकम् । मम धन्वन्तरिप्रसादसिध्यर्थे जपे विनियोगः ॥

End :

इत्यादि पञ्चपूजाः । ओं नमो भगवते धन्वन्तरये अमृतकलशहस्ताय त्रिलोकनाथाय विष्णवे स्वाहा ॥

Colophon :

368

Sl. No. 49226 धारणासरस्वतीमहामन्त्रः **Ms. No. C. 4686-20**

Beginning :

अस्य श्री धारणासरस्वतीमहामन्त्रस्य । ब्रह्मा ऋषिः । गायत्रीछन्दः । ब्रह्मा सरस्वती देवता । ऐं बीजम् । क्लीं शक्तिः । सौः कीलकम् । मम विद्याधारणसिध्यर्थे सरस्वतीमन्त्रजपे विनियोगः ॥

End :

यथाशक्ति जपः । पूर्ववत् हृदयन्यासः । पञ्चोपचारकल्पनम् । गुह्याति-गुह्यगोप्त्रीत्वं पं । सिध्यर्थं देवीत्यप्र + +श्वरी ॥

यस्य स्मृत्या ॥

अनेन यथाशक्ति धारणासरस्वतीजपेन भगवान् धारणासरस्वती प्रीयताम् ॥

Colophon :

- श्रीः -

369

Sl. No. 49230 धूम्रवाराहीमन्त्रविधिः **Ms. No. P. 4868-20**

Beginning :

अस्य श्री धूम्रवाराहीमन्त्रस्य कालमृत्युः ऋषिः। बृहतीछन्दः। श्री-
धूम्रवाराही देवता। धूं बीजं म्रं शक्तिः। धूम्रवाराहीमन्त्रोद्धारं।
नररक्तप्रिये देवि नानालङ्कारभूषिणि।
नमामि शत्रुनाशार्थं वैरिमारणकारणम्॥

End :

काकोलूक × × रज्जुना प्रेतवेष्टितम्।
त्रिः सप्तमूलमन्त्रेण मत्रं जप्त्वा निरामयः।
स्नापयेच्छत्रुगेहे तु जपेदष्टसहस्रकम्।
काकवद्भ्रमते शत्रुः अभस्मारणसंयुतः(?)।

Colophon :

इति कालमृत्युतन्त्रे कालाराम्यागमे उत्तरास्त्रविद्या नाम
विंशतिपटलः।

370

Sl. No. 49235 नन्दिकेश्वरकाशिका **Ms. No. C. 1528-1**

Beginning :

नृत्तावसाने नटराजराजः

ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्तुकामः सनकादिसिद्धान्
एतद्विमर्शे शिवसूत्रजालम् ॥

अइउण् ॥—हल् ॥

अत्र सर्वत्र सूत्रेषु अन्त्यं वर्णचतुर्दशम् ।
धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये ॥

End :

वर्गाणां तुर्यवर्णा ये कर्मेन्द्रियगुणा हि ते ।
घढधष्सर्ववर्णानां पादपायू उपस्थकाः ॥
कर्मेन्द्रियगुणा ह्येते
जाता हि परमात्मनः ॥
श्रोत्रत्वङ्नयनघ्राणा
जिह्वा धीन्द्रियपञ्चकम् ॥

×× ×× ×× ××

Colophon :

371

Sl. No. 49236 **नन्दिकेश्वरकाशिकाव्याख्या (समूला)** **Ms. No. C. 1528-2**

Beginning :

नमश्शिवाय देवाय सर्वज्ञपरमात्मने ।

यस्योन्मेषनिमेषाभ्यां व्यक्ताव्यक्तमिदं जगत् ॥

काशिकामादिसूत्राणां
नन्दिकेशकृतां शुभाम् ।
लोकोपकारिणीं दिव्यां
व्याकरोमि यथामति ॥

End :

वाक्पाणिपादपायूपस्थाः वर्गाणां तुर्यवर्णाः ये झ भ घ ढधवर्णाः ते जाता इत्यर्थः । तैजसात्परमात्मनः इत्यपि पाठान्तरम् । क्रमप्राप्तं ज्ञानेन्द्रिय-सम्भवमाह—श्रोत्रेति ॥ × ॥

×× ×× ×× ××

Colophon :

372

Sl. No. 49237 नक्षत्रन्यासविधिः **Ms. No. P. 5002–2**

Beginning :

अथ नक्षत्रवृन्दस्य न्यासं कुर्यात् सुखप्रदम् ।
ज्वलत्कालाग्निसङ्काशः सर्वाभरणभूषितः ॥
सतीवाण्योऽश्विनीमुख्याः वरदाभयकरप्रदाः ॥

अस्य श्री नक्षत्रन्यासस्य ब्रह्मा ऋषिः । गायत्रीछन्दः । नक्षत्रस्वरूपी परमात्मा देवता ॥

End :

दाक्षायणीषु न्यासेन न्यसेद्यः स्वां तनुं पुमान् ।

प्राप्ता दाक्षायणीरूप: सविश्वम्भरतां त्यजेत् ।
अहमेकोऽद्वितीयोऽसौ
सृष्टिस्थित्यन्तकारिणी: ।।
इत्येतस्य महेशानि
महात्मान्यस्तदेहिन: ।।

Colophon :

।। श्रीः ।।

373

Sl. No. 49472 **नरसिंहमन्त्रः** **Ms. No. P. 6915–16**

Beginning :

ओं नमो नरसिंहाय रुद्ररूपाय भीषणशङ्कराय महारौद्रनारसिंहाय प्रलयाग्निरूपाय भक्तवत्सलाय आग्रहचटुलमन्दविस्फूर्तिविखण्डनाय अहोबल-नारसिंहाय प्रचण्डकोदण्डधराय दारुयन्त्र—

End :

दिशां बन्धां बन्ध सुदर्शन नारसिंहाय आकाशदिशां बन्धां बन्ध कपिल-नारसिंहाय दशदिशां बन्धां बन्ध कुहकुह कम्पय कम्पय आवेशय आवेशय अवतारय अवतारय सिध्र सिध्र ओं वटु वटु स्वाहा ।।

Colophon :

शुभमस्तु ।

374

Sl. No. 49246 नरसिंहवज्रपञ्जरकवचविधिः Ms. No. P. 4922-43

Beginning :

अस्य श्री नृसिंहवज्रपञ्जरकवचमहामन्त्रस्य ब्रह्मा ऋषिः । अनुष्टुप् छन्दः । बडवानलज्वालामुखनरसिंहो देवता । म्रं बीजम् । फट् शक्तिः । स्वाहा कीलकम् बडवानलज्वालामुखनरसिंहप्रसादसिध्यर्थे जपे विनियोगः । म्रामित्यादि न्यासः । + +

End :

सहस्रदशकं यस्तु पठेद्यो भक्तिमान्नरः ।
स तस्य जगतां नाथः प्रत्यक्षो भवति ध्रुवम् ॥

पूर्णलक्षं जयेद्देवि पञ्जरं जपयेन्नरः ।
शस्त्रघाता न बाधन्ते सङ्ग्रामे शत्रुसङ्कटे ॥

य इदं पञ्जरं दिव्यं सर्वमन्त्रमयं शुभम् ।
सर्वरक्षाकरं देवो नृणां देवाभिवन्दितः ॥

Colophon :

इत्यथर्वणरहस्ये ब्रह्मसरस्वतीसंवादे
नरसिंहकवचं सम्पूर्णम् ।

375

Sl. No. 49251 नवग्रहचक्रकल्पः Ms. No. P. 4335-60

Beginning :

वसिष्ठ उवाच—

श‍ृणु राम प्रवक्ष्यामि इक्ष्वाकुकुलनन्दन ।
मार्कण्डेयप्रसादेन तस्य चक्रं च निर्मितम् ॥

त्वमेव कार्यमुद्दिश्य व्याजयेच्चक्रमुत्तमम् ।
त्रैलोक्याद्भुतं चक्रं सर्वकामफलप्रदम् ।
नवग्रहप्रसादेन सर्वत्र विजयी भवेत् ॥

End :

आचार्यपूजितं राम वस्त्राभरणभूषितम् ।
गन्धपुष्पादि धूपं च दीपं ताम्बूलमेव च ॥

प्रदक्षिणनमस्कारं गुरूणां पूजितं लभेत् ।
इति ते कथितं किञ्चित्किं भूयः श्रोतुमिच्छसि ॥

Colophon :

इति श्रीहरगौरीसंवादे मार्कण्डेयविरचिते रामस्य वसिष्ठोपदेशं नाम निर्वेद-
नवग्रहचक्रकल्पं सम्पूर्णम् ॥

376

Sl. No. 49254 नवग्रहदिग्बन्धनम् **Ms. No. P. 4335-63**

Beginning :

पूर्वोक्त एवंगुणविशेषणविशिष्टायां शुभतिथौ मम शरीरे वर्तमानवर्तिष्यमाण-
सर्वरोगनिवृत्त्यर्थं + + + + आवरणदेवतासहितं नक्षत्रादिदेवता उद्दिश्य
एतत्प्रीत्यर्थं दिग्बन्धनपारायणं करिष्ये इति सङ्कल्प्य ।

End :

ॐ नमो भगवते ससर्वशक्तिसमेतायै परब्रह्ममहिषी मम सर्वाङ्गं रक्ष रक्ष स्वाहा इति लोकत्रयेण दिग्बन्धः समाप्तः ।

ॐ नमः सूर्याय सोमाय मङ्गलाय बुधाय च ।
गुरुशुक्रशनिभ्यश्च राहवे केतवे नमः ॥

Colophon :

377

Sl. No. 49257 नवग्रहन्यासविधिः **Ms. No. P. 8032–25**

Beginning :

अस्य श्रीनवग्रहन्यासस्य अज ऋषिः । गायत्री छन्दः । मेषादिराशयो देवताः । श्रीविद्याङ्गत्वेन न्यासे विनियोगः । + +

End :

शं हं गोमेदात्मने राहवे भगवते कृष्णाम्बायै नमः । मुखे । ळं क्षं हं सः । वैडूर्यात्मने भगवते धूम्राम्बायै नमः पादयोः । अं क्षं सौः क्लीं ओं सूर्यरेणु-काम्बादि नवग्रहमिथुनरूपिण्यै महात्रिपुरसुन्दर्यै नमः । सर्वाङ्गे व्याप्य । श्रीदेव्यै नमः ।

नवग्रहात्मकं न्यासं न्यस्तगः सुसमाहितः ।
वज्रकायो नरो भूत्वा स...त्कालवञ्चकः ॥
नवग्रहकृता पीडा न कदाचिद्भविष्यति ।
दुर्ग्रहाः सुग्रहास्सर्वे दशैकफलदायकाः ।

Colophon

378

Sl. No. 49259 **नवग्रहपूजाचक्रम्** **Ms. No. P. 5951-47**

Beginning :

—म्यश्च संलेख्य
पश्चिमे शनिमण्डले ॥ ७ ॥
तमः शुक्रो रविर्जीवः
कुजः केतुर्बुधः शशी ।
शुक्रश्चक्रमयोल्लिख्य
नैर्ऋत्यां राहुमण्डले ॥

End :

सुदृढं वेष्टयेद्यन्त्रं
पूजयेच्च प्रयत्नतः ।
धारयेत्सर्वदा भक्त्या
धातुगर्भान्तरे स्थितम् ॥

Colophon :

इति पूजाचक्रम्

379

Sl. No. 49262 **नवग्रहमन्त्रजपविधिः** **Ms. No. P. 10812-4**

Beginning :

आकृष्णेनेत्यस्य मन्त्रस्य । हिरण्यस्तूप ऋषिः । सविता देवता । त्रिष्टुप् छन्दः । मम रविप्रसादसिद्ध्यर्थे जपे विनियोगः ।
ॐ आकृष्णेन रजसा इति अङ्गुष्ठिकाभ्यां नमः ।

End :

अथ ध्यानम् ।

गृध्रस्थितं जलजयोनिसमानवक्त्रं
धूम्रान् गदाभयकरान् विधिजान् कुमारान् ।
वैडूर्यभूषिततनून्वरजैमिनीयान्
केतून् भयानकमुखान् द्विभुजान् नमामि ॥ श्री ॥

Colophon :

380

Sl. No. 49264 **नवग्रहमन्त्रजपविधिः** **Ms. No. P. 6806-5**

Beginning :

आकृष्णेन हिरण्यस्तूपः । सविता । त्रिष्टुप् । आदित्यप्रसादसिध्यर्थे जपे विनियोगः । आकृष्णेन अङ्गुष्ठा । रजसा तर्ज । वर्तमानोनिवेशयंन । मध्य ।

End :

एवं नैमदिनरियन्तं जपं कृत्वा नन्तरं स्वशाखोक्तविधिना समिच्चर्वाज्यैः प्रत्येकं अष्टोत्तराहुतिं हुत्वा अनन्तरं वित्तानुसारेण ब्राह्मणभोजनं कुर्युः ॥ एवं कृते सकलकार्याणि सिद्धिंर्भवति ॥

Colophon :

381

Sl. No. 49268 नवग्रहयन्त्रम् Ms. No. P. 6124-2

Beginning :

अथ वेधालक्षणम्—

तिर्यगूर्ध्वमधःपङ्क्तौ
मध्यदेशत्रिकेऽपि वा ।
स ××× नवकोष्ठस्तु
वेधस्तु कथितो बुधैः ॥
सौवर्णे राजते ताम्रे—

End :

कृत्वा शुभदिने सम्यक् बध्नीयाद्दक्षिणे करे ।
ग्रहोत्थां हन्ति पीडां च सर्वत्र विजयो भवेत् ॥

Colophon :

इति गुरुप्रोक्तनवग्रहयन्त्रं संपूर्णम् ।

382

Sl. No. 49271 नवग्रहयन्त्रम् Ms. No. P. 9657-2

Beginning :

नवग्रहमिदं यन्त्रं ब्रह्मणा निर्मितं पुरा ।
तत्तद्ग्रहाणां सर्वेषां तत्तदासनमालिखेत् ॥
रेखाग्रे शूलमालिख्य शूलाग्रेषु समालिखेत् ।
पाशाङ्कुशौ च मायां च लिखेद्भूरि विचक्षणः ॥

End :

पृथ्वी बीजम् । आप् बीज । रं तेजो बीजा । यं वायुबीजा । हं
आकाशबीजा ।

Colophon :

इति श्रीमहाभारते आरण्यपर्वणि ईश्वरपार्वतीसंवादे
नवग्रहयन्त्रं सम्पूर्णम् ।

383

Sl. No. 49272 नवग्रहयन्त्रलक्षणम् **Ms. No. P. 6124-1**

Beginning :

नवग्रहयन्त्रलक्षणम्—

कदाचिद्वनमासीनं पाण्डुपुत्रं सुलक्षणम् ।
आगत्य कृष्णनामस्य? कृत्वा पूजां यथाविधि ॥
देव देव जगन्नाथ उपायं ब्रूहि तत्त्वतः ॥

End :

मारणे तु तथा होसे बीजं जनकसं × × ।
× ज्ये शान्तिहोमे तु ततस्सिद्धिमवाप्नुयात् ॥

Colophon :

इति श्री[illegible]संवादे नवग्रहयन्त्रं नाम प्रथमोऽध्यायः ।

384

Sl. No. 49276 **नवग्रहयन्त्रविधिः** Ms. No. P. 3897-7

Beginning :

अथ प्राथमिकं मन्त्रं वक्ष्ये चैव यथाक्रमम् ।
अन्तर्भूमन्दिरं लिख्य तद्बाह्ये भूग्रहं लिखेत् ॥
अन्तस्थकोणकोणे च
बाह्यकोणादिके क्रमात् ।
विदिक्षु विलिखेद्रेखा-
चतुष्कं मध्यमे लिखेत् ।।

End :

तद्बहिर्भूग्रहं कृत्वा शिरसा धारयेद्बुधः ।
विष्णुमन्दिरमाश्रित्य जपेदष्टोत्तरं शतम् ॥
यत्कार्यं मनसा ध्यायन्
गच्छेदस्तमवाप्नुयात् ।।

Colophon :

हरिः ओम् ।

385

Sl. No. 49279 **नवग्रहयन्त्रोद्धारविधिः** Ms. No. P. 5951-48

Beginning :

सूर्यस्य पूर्वदिग्भागे गुरुं तद्दक्षिणे बुधम् ।
बुधस्य पश्चिमे शुक्रम् तत्पश्चाच्चन्द्रमुद्धरेत् ॥

उत्तरे मङ्गलं चैव राहुं चोत्तरतो लिखेत् ॥

End :

वायव्ये तु शनिश्चैव ईशान्ये राहुमालिखेत् ।
केतुमुत्तरदेशे तु गुरुयन्त्रं समुद्धरेत् ॥

Colophon :

386

Sl. No. 49283 नवग्रहव्यष्टिसमष्टियन्त्रोद्धारः **Ms. No. C. 600**

Beginning :

चक्रोद्धारस्तु संक्षेपात् ज्ञातस्त्वत्तो जगत्पते ।
वक्तुमर्हस्यशेषेण यद्यहं तव वल्लभा ॥
एतद्वाक्यं हरः श्रुत्वा हसन् प्रोवाच पार्वतीम् ।
ऊर्ध्वरेखास्तथा प्रोक्ता स्तिर्यग्रेखास्तथा दश ॥

End :

तेन ग्रहाश्च सन्तुष्टास्सर्वाभीष्टप्रदास्सदा ॥
नित्यं समर्चयेद्भक्त्या यन्त्राङ्कान् ग्रहरूपिणः ।
लक्ष्म्या श्रितं तद्गृहं स्यात्पुत्रपौत्रादिवृद्धियुक् ।
अपुत्रो लभते पुत्रान् निर्धनो धनवान् भवेत् ॥

Colophon :

इति श्रीविद्याविलासे उमामहेश्वरसंवादे नवग्रहव्यष्टिसमष्टियन्त्रोद्धारविवरणं नाम द्वितीयः पटलः ।

387

Sl. No. 49287 नवदुर्गामन्त्रः Ms. No. B. 658/20

B eginning :

अस्य श्रीनवदुर्गामन्त्रस्य ईश्वर ऋषिः । + + + एवं हृदयादि ।।

असिशङ्खचक्रपाणखेटवाणं
सधनुः शूलकतर्जनीं दधानम् ।
मम सा महिषोत्तमाङ्गसंस्था
नवदुर्गा सदृशी श्रियैस्तु दुर्गा ।।

End :

सौवार्णाम्बुजमध्यगां त्रिनयनां सौदामिनीसन्निभां
शङ्खं चक्रवराभयैश्च दधतीं इन्दोः कलां बिभ्रतीम् ।
ग्रैवेयाङ्गदहारकुण्डलधरां आखण्डलाद्यैस्स्तुतां
ध्यायेद्विन्ध्यनिवासिनीं शशिमुखां पार्श्वस्थपञ्चाननाम् ।।

पञ्चपूजा ।। ओं उत्तिष्ठ पुरुजकिं स्वपिहि भयं मे समुपस्थितम् । यदि शक्यमशक्यं वा दुर्गे भगवति शमय स्वाहा ।।

Colophon :

इति मनुः ।।

388

Sl. No. 49291 नवदूतीमन्त्रजपविधिः Ms. No. P. 7538/32

Beginning :

अस्य श्रीनवदूतीमन्त्रस्य भगमथ ऋषिः । गायत्री छन्दः । नवदूत्यो

देवताः । ऐं बीजं क्लीं शक्तिः, सौः कीलकम् । मम नवदूतीप्रसादसिद्ध्यर्थे जपे विनियोगः । अं आं सौः अं आं सौः इति न्यासः । + +

End :

ध्यानम्—

दूत्यस्तु मां सदा पान्तु वरदाभयहस्तकाः ।
योनिमुद्रां शये सव्ये पानपात्रं तु दक्षिणे ।।
ध्येयास्सर्वाश्च कार्यार्थे नवयो....यथा क्रमम् ।

मनुः—-अं आं सौः ह्रीं श्रीं सौः । योन्यम्बादूति श्री = मः १ + पद्मयोनि सिद्धनाथाभादूति श्री-९.

Colophon :

389

Sl. No. 49293 **नवनीतगणपतिमन्त्रः** **Ms. No. P. 10766/6**

Beginning :

अस्य श्रीनवनीतगणपतिमहामन्त्रस्य परमात्मा शम्भुऋषिः । गायत्री छन्दः + + + +

श्रीनवनीतगणपतिकृपाकटाक्षसिद्ध्यर्थे इष्टकाम्यार्थसिद्ध्यर्थे जपे विनियोगः ।।

End :

आदिवारेण नवनीतविनायकं कृत्वा विनायकस्य हृदये साध्यनाम लिखित्वा

दूर्वाक्षतैः सम्पूज्य नित्यं सहस्रं जपेत् । पुनः पूजां कृत्वा भक्षयेत् । सप्तदिवसपर्यन्तं रात्रौ सम्पूज्य इष्टसिद्धिर्भवेत् ।

श्रीसिद्धिविनायकप्रसादसिद्धिरस्तु ॥

Colophon :

390

Sl. No. 49298 **नवमुद्रालक्षणम्** **Ms. No.P . 7982/46**

Beginning :

शुभमस्तु ॥ द्रां सर्वसङ्क्षोभिणी ।
अनामिकाकनिष्ठाभ्यां मध्यमौ रोधयेत्ततः ।

अङ्गुष्ठावनुजालग्नौ दण्डवत्तर्जनीद्वयम् ।
क्षोभिणीयं महामुद्रा प्रथमा परिकीर्तिता ॥ १ ॥

End :

ऐं सर्वयोनिमुद्रा ॥

संयोज्य हस्तौ देवेशि तर्जन्यानामिकायुजेत् ।
तत्तद्वामे च संसृज्य योन्याकारेण योजयेत् ॥

उपर्यङ्गुष्ठयोगेन योनिमुद्रेयमीर्यते ॥ १० ॥
अनया मुद्रया देवि त्रैलोक्यं वशमानयेत् ॥

Colophon :

391

Sl. No. 49302 नवाक्षरमन्त्रविधानम् **Ms. No. B. 706**

Beginning :

तारां नत्वा स्त्रेष्टदेवीं श्रीलक्ष्मीं कुल × वताम् ।
नवार्णवस्य मन्त्रस्य × × × लिख्यतेऽधुना ॥ १ ॥

....

अथो नवाक्षरं मन्त्रं वक्ष्ये चण्डीप्रसक्तये ।
वाङ्मायामदनो दीर्घलक्ष्मीन्तन्द्री श्रुतेन्दुयुक् ॥ १ ॥

End :

देव्युवाच पुनश्चैव स्वयं श्लोकत्रयेण वै ।
ततो मार्कण्डेयचोक्तिरिति दत्वा तयोश्शिव ॥ १९ ॥

अन्ते मन्त्रद्वयं चोक्तासावर्णिर्भविता मनुः ।
मन्त्रान्ते हवनं देवि कुर्यात्सिद्धिमपेक्षिताम् ॥ १० ॥

Colophon :

॥ इति कात्यायनीतन्त्रे द्वाविंशः पटलः ॥

392

Sl. No. 49303 नवाक्षरीदुर्गामहामन्त्रः **Ms. No. P. 5764/30**

Beginning :

अस्य श्रीनवाक्षरीदुर्गामहामन्त्रस्य मार्कण्डेयमहर्षिः । देवीगायत्री छन्दः ।
दुर्गा देवता । + +

ध्यानं—

हृत्पुण्डरीकमध्यस्थां प्रातस्सूर्यसमप्रभाम् ।
पाशाङ्कुशधरां सौम्यां वरदाभयपुस्तकाम् ॥

End :

पाशाङ्कुशवरदाभयकिरीटमकरकुण्डलमुद्रा ॥ पञ्चपूजा ॥ शेषं पूर्ववत् ।

Colophon :

393

Sl. No. 49305 नवाक्षरीमन्त्रः **Ms. No. P. 8428**

Beginning :

आपादशुभजां मधुदैत्यादिमर्दिनीम् ।
नवार्ण × × र्णीं दुर्गीं सिंहारूढां नतोऽस्म्यहम् ।

अस्य श्री नवाक्षरमन्त्रस्य ब्रह्माविष्णुमहेश्वर × यः । गायत्र्यु × × दांसि । महाकालीमहालक्ष्मीमहासरस्वतीदेवताः । ....

End :

घण्टाशूलहलानि शङ्खमुसले चक्रं धनुस्सायकं
हस्ताब्जैर्दधतीं धनान्तविलसच्छीतांशुतु × प्रभाम् ।
गौरीदेहसमुद्भवां त्रिपगदामाधारभूतां महा-
पूर्वमन्त्रसरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम् ।
पञ्च पूजां कुर्यात् । नवार्णमष्टोत्तरशतं जपेत् ।

Colophon :

394

Sl. No. 49310 **नवाक्षरीमन्त्रजपविधिः** **Ms. No. C. 3494/23**

Beginning :

अस्य श्री नवाक्षरीमहामन्त्रस्य ब्रह्मविष्णुमहेश्वराः ऋषयः। गायत्र्युष्णिगनुष्टुप्छन्दांसि। महाकाली महालक्ष्मी महासरस्वत्यः प्रधानदेवताः। ऐं बीजम्। ह्रीं शक्तिः। क्लीं कीलकम्। वेदत्रयपठनफलसिद्ध्यर्थे जपे विनियोगः ॥

End :

लमित्यादिपञ्चपूजा। ओं ऐं ह्रीं क्लीं चामुण्डायै विच्चे इति जपः। महालक्ष्म्यै च विद्महे सर्वशक्त्यै च धीमहि। तन्नो लक्ष्मीः प्रचोदयात्। न्यासध्यानं पूर्ववत्। गुह्येति च समर्पणम् ॥

Colophon :

इति नवाक्षरीमन्त्रविधिः।

395

Sl. No. 49319 **नवावरणकल्पः** **Ms. No. P. 6128/52**

Beginning :

गं गणपतये नमः ॥
गुं गुरुभ्यो नमः ॥
क्षं क्षेत्रपालकाय नमः ॥
आदिकर्माय नमः ॥
अनन्ताय नमः ॥ —

End :

ओं उग्रस्य देवस्य पत्न्यै नमः ।।
ओं भीमस्य देवस्य पत्न्यै नमः ।।
महतो देवस्य पत्न्यै नमः ।।
नानाविधमन्त्रपुष्पाणि समर्पयामि—

Colophon :

396

Sl. No. 49323 **नाडीचक्रम्** **Ms. No. P. 6734**

Beginning :

अथातस्सम्प्रवक्ष्यामि नाडीचक्रं समासतः ।
श्रद्धया गुरुभक्त्या च विद्धि वाचस्पतेऽधुना ॥

End :

तस्माद्भवद्भिर्मुनयः सन्ध्ययोरुभयोरपि ।
जप्यं स्तोत्रमिदं पुण्यं देवदेवस्य भक्तितः ॥

Colophon :

इति श्रीसूतसंहितायां ज्ञानयोगकाण्डे माधवीये नाडिचक्रविधिरेकादशोऽध्यायः ।

397

Sl. No. 49326 नाथनवरत्नमाला (सव्याख्या) **Ms. No. C. 2512/10A**

Beginning :

हंसस्सोऽहं मन्त्रमयश्वासनिकायै
र्या गायत्री जन्तषु सर्वेषु पिनद्धा ।
तद्रूपः सन्नाविरभूद्भासनया य
स्तं सन्मार्गं मत्तमयूरं गुरुमीळे ।। २ ।।

End :

इत्यग्रध्नाद्भास्कररायो नवरत्नै
र्मालामग्र्याम् । नाथरहस्यं यमयन्तीम् ।
येषामेषा कण्ठगता ते जगदम्बा
विद्याभ्यासादत्र जनुष्येव महेशः ।। १० ।।

Colophon :

इति श्रीभास्कररायकृतं नाथरत्नमालाभिधं पुस्तकम् ।

398

Sl. No. 49327 नाथनवरत्नमालाव्याख्या **Ms. No. C. 2512/10**

Beginning :

श्रीनाथादित्रितयं नत्वा गम्भीररायसूरिसुतः ।
नाथनवरत्नमालागूढार्थं व्याकृतिं तनुते ।। १ ।।
इह खलु निखिलोपासया गुरुप्रसादलभ्यः । + + + + उपासकानु-
जिघृक्षया विवृणोति ।। हंस इति ।।

End :

इति श्रीमन्नाथनवरत्नमालाभिधस्तुतेः ।
मञ्जूषा भासुरानन्दनाथेनाकारि गुप्तये ॥

Colophon :

399

Sl. No. 49332 नामत्रयमन्त्रः **Ms. No. P. 10384–16**

Beginning :

अस्य श्रीनामत्रयमन्त्रस्य पराशरव्यासनारदा ऋषयः विराट् परब्रह्म देवता । अच्युताय नम इति बीजम् । अनन्ताय नम इति शक्तिः । गोविन्दाय नम इति कीलकं । मम परमेश्वरप्रसादसिध्यर्थे जपे विनियोगः ।

End :

अच्युतानन्तगोविन्दनामोच्चारणभेषजम् ।
नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम् ।
पूर्ववत् न्यासं कृत्वा निर्याणमुद्रां प्रदर्श्य ।

Colophon :

400

Sl. No. 49338 नामत्रयमन्त्रराजजपविधिः **Ms. No. P. 8451–3**

Beginning :

अस्य श्रीनामत्रयमन्त्रस्य पराशरव्यासनारदा ऋषयः । विराट् छन्दः ।

श्रीमहाविष्णुश्रीमहावराहनारसिंहाः देवताः । अच्युत इति बीजं । अनन्त इति शक्तिः । गोविन्देति कीलकम् । मम पापक्षयार्थे जपे विनियोगः ॥ + +

End :

एवं ध्यात्वा हरिं देवं परब्रह्मस्वरूपिणम् ।
तत्पादपङ्कजद्वन्द्वं प्रपद्ये चरणं परम् ॥
लक्ष्म्या च हेमाम्बुजचारुकान्त्या
भूम्या च दूर्वादळनीलकान्त्या ।
संशोभिपार्श्वं × × × गाख्यं
नमामि नामत्रयमन्त्रराजम् ॥
अच्युतः कल्पवृक्षः स्यादनन्तः कामधेनवः ।
चिन्तामणिस्तु गोविन्दो नामत्रयमुदाहृतम् ॥

Colophon :

401

Sl. No. 49340 **नामपारायणविधिः** **Ms. No. C. 218**

Beginning:

अथ नामपारायणम् ।

आसने सम्यगासीनः प्राणानायम्य संक्षेपतः भूतशुद्धिं प्राणप्रतिष्ठां मातृकान्यासं कृत्वा मस्तकदक्षबाहुमूलादिषट्त्रिंशत्स्थानेषु प्रतिस्थानं षोडशदलं विभाव्य—

End :

अष्टाभिस्तु शतैस्तासां नृपाः सर्वेऽस्य किङ्कराः

नवभिस्तु शतैरेवं कन्दर्पो वनिताजने ।
एवं नवशतं जप्यात् सर्वान् कामान् अवाप्नुयात् ।
समस्तं भजनं तासां मुक्तिसर्वार्थसिद्धिदम् ॥

Colophon :

इति नामपारायणविधिः ॥
(गाम्भीरे)

402

Sl. No. 49343 **नारसिंहमहामन्त्रः** **Ms. No. P. 4525/19**

Beginning :

अस्य श्रीनारसिंहमहामन्त्रस्य प्रह्लादाय ऋषये नमः। गायत्र्यै छन्दसे नमः। नृसिंहाय देवतायै नमः।

End :

त्रैलोक्यं कम्पयन्तं रविनिकरनिभं गर्जितैरुग्रवेगैः
दैत्येन्द्रं दारयन्तं नखरमुखचयैरान्त्रमालां तदीयाम् ।
वक्षोदेशे वसत्या जलनिधिमदुहितुः कण्ठदेशे दधानं
प्रह्लादं तोषयन्तं नरहरिमनिशं चिन्तयाम्यन्तरङ्गे ॥
ॐ नमो नारसिंहाय इति मनुः । सर्वं पूर्ववत् ।

Colophon :

403

Sl. No. 49344 **नारसिंहमानसपूजाविधिः** **Ms. No. P. 4925/82**

Beginning :

लक्ष्मीरुवाच—

नारसिंह महादेव महाबलपराक्रम ।
हृदये मानसीं पूजां कथं कुर्वन्ति मे वद ॥

श्रीनृसिंह उवाच—

शृणु देवि प्रवक्ष्यामि मम पूजां सुभक्तिमान् ।
हृत्पद्मकर्णिकामध्ये उपचारान् प्रकल्पयेत् ॥

End :

भगवन् सर्वलोकेश नारसिंह नमोऽस्तु ते ।
एवं यः कुरुते पूजां मानसे बहिरेव वा ॥

स तु पूजनमात्रेण नारसिंहो भवेन्नरः ।
इत्येवं नारसिंहेन रमायाः कथितं पुरा ।
एतत्समस्तं सङ्गृह्य आत्मपूजा यथाविधि ॥

Colophon :

इत्यथर्वणसारे नृसिंहस्तम्भोद्भवे मार्कण्डेयनारदसंवादे अष्टमोऽध्यायः ।

404

Sl. No. 49346 **नारायणकवचम्** **Ms. No. P. 7526/20**

Beginning :

ब्रह्मोवाच—

भगवन् योगिनां श्रेष्ठ शुक भागवतोत्तम ।
शृणु पुण्यं पुरावृत्तं सर्वार्थौघसुसिद्धिदम् ॥

इन्द्रादयः सुरगणाः सर्वे राक्षसपीडिताः ।
बृहस्पतिं देवगुरुं उपसेदुस्तपस्विनम् ॥

End :

शृङ्खलाबन्धसमये मार्गे भूतभये निशि ।
युद्धे राजभये चोरभीत्यां सर्पभयेषु च ।

व्याघ्रसिंहगजाश्वानां सर्पाणां च भये नरः ।
पठनादभयो भूत्वा तुष्टाः सिद्धिं लभन्ति ते ॥

Colophon :

नारायणकवचं सम्पूर्णम् ।

405

Sl. No. 49347 नारायणहृदयम् **Ms. No. P. 8100/1**

Beginning :

एवंगुणेत्यादिशुभतिथौ श्रीलक्ष्मीनारायणमुद्दिश्य लक्ष्मीनारायणप्रीत्यर्थं आद्यादिश्रीमहालक्ष्मीमुद्दिश्य आद्यादिश्रीमहालक्ष्मीप्रीत्यर्थं न्यासध्यानपूर्वकं लक्ष्मीनारायणहृदयसङ्कलीकरणपारायणं करिष्ये—

End :

लक्ष्मीहृदयकं प्रोक्तं विधिना साधयेत्सुधीः ।
भृगुवारेऽपि रात्रौ च पूजयेत्पुस्तकद्वयम् ॥

सर्वदा सर्वथा सत्यं गोपयेत् साधयेत् सुधीः ।।
गोपनात् साधनाल्लोके धन्यो भवति तत्त्वतः ।।

Colophon :

इति श्रीआथर्वणरहस्ये नारायणहृदयस्तोत्रं सम्पूर्णम् ।

406

Sl. No. 49348 नारायणहृदयम् **Ms. No. P. 4461/138**

Beginning :

अस्य श्रीनारायणहृदयस्तोत्रमन्त्रस्य ब्रह्मा ऋषिः । अनुष्टुप् छन्दः । परमात्मा श्रीलक्ष्मीनारायणो देवता । श्रीलक्ष्मीनारायणप्रसादसिद्ध्यर्थे जपे विनियोगः । ओं भूः अग्न्यात्मने अनिरुद्धाय हृदयाय नमः । वाय्वात्मने प्रद्युम्नाय शिरसे स्वाहा । + +

भृगुवारे तथा रात्रौ पूजयेत्पुस्तकद्वयम् ।
सर्वथा सर्वदा सत्यं गोपनादेव साधयेत् ॥

End :

तस्मात्सर्वप्रयत्नेन गोपनात्साधयेत्सुधीः ।
गोपनात्साधनाल्लोके धन्यो भवति तत्त्वतः ॥

Colophon :

इत्याथर्वणे रहस्ये उत्तरकाण्डे नारायणहृदयस्तोत्रं सम्पूर्णम् ।

407

Sl. No. 49356 **नारायणाष्टाक्षरमन्त्रः** **Ms. No. P. 4862/20**

Beginning :

अस्य श्रीनारयणाष्टाक्षरीमन्त्रस्य साध्यनारायणऋषिः। अनुष्टुप् छन्दः। श्रीलक्ष्मीनारायणो देवता। ओं बीजम्। अं इति शक्तिः। नारायणायेति कीलकम्। श्रीलक्ष्मीनारायणप्रीत्यर्थे जपे विनियोगः।

End :

अथ मनुः। यथाशक्ति जपं कुर्यात्। ओं नमो नारायणाय ऐं सर्वज्ञशक्त्यात्मक क्लीं नित्यतृप्तशक्त्यात्मक। सौः स्वतन्त्रशक्त्यात्मक। श्रीपादुकां पूजायामि। तर्पयामि। नमः।

Colophon :

शुभं भूयात्।

408

Sl. No. 49358 **नारायणाष्टाक्षरीमन्त्रजपविधिः** **Ms. No. C. 1078/2**

Beginning :

× अथ—अष्टाक्षरमन्त्रजपं करिष्ये। अथ गुरुनमस्कारः। मूलमन्त्र-॥ प्राणायामः। कृत्थोल्कायादिपञ्चाङ्गन्यासः। कृत्थोल्काय अङ्गुष्ठाभ्यां नमः। महोल्काय तर्जनीभ्यां नमः। वीरोल्काय मध्यमाभ्यां नमः। द्युल्काय ॥ अनामिकाभ्यां नमः॥

End :

लक्ष्मीनारायणप्रीत्यर्थं श्रीमन्नारायणाष्टाक्षरमन्त्रजपं करिष्ये॥ ओं नमो

नारायणाय ॥ १०८ ॥ ५४ ॥ २२ ॥ १२ ॥ यथाशक्ति ॥ पुनः मूलमन्त्रेण प्राणायामः । पुनः पूर्ववत् । अष्टाङ्गुलीन्यासः । अष्टाङ्गन्यासः । पञ्चाङ्गुलीन्यासः । पञ्चाङ्गन्यासः । ध्यानश्लोकादि ॥

Colophon :

नारायणाष्टाक्षरमन्त्रजपं सम्पूर्णम् ॥

409

Sl. No. 49367 निग्रहक्रियाभेदनविधानम् Ms. No. P. 4252/16

Beginning :

निग्रह सम्प्रवक्ष्यामि वैरिणां कुलनाशनम् ।
समाहितेन मनसा शृणुष्व परमेश्वरि ॥
शिखिपुरयुगमध्ये शक्तिबीजं त्रिणेत्रं
प्रतिगृहमथ मन्त्रं सप्तवर्णं लिखित्वा ।
इषुमनुमथ बाह्ये षोडशारे त्रिवर्णं
अभियुगयुगमेतत् साळ्ववेशस्य यन्त्रम् ।

End :

गृह्णीयात्तां प्रसूत्यै पुनरपि नयनान्मारणाय प्रताडेत्
गर्भस्थं मर्तुमेतत् शिथिलितमकरोत् स्त्रावितं धारयेत्ताम् ॥
एतन्मन्त्रक्रियाणां क्षितिमकलयतस्त्वात्मदास्य प्रभावैः
निश्शङ्कं क्ष्मासुदेशो शरभशिवबलात् सर्वदा सिद्धिमेति ॥

Colophon :

इति निग्रहक्रियाभेदनविधानम् ।

410

Sl. No. 49369 **निग्रहोच्चाटनविधिः** **Ms. No. P. 4252/22**

Beginning :

निग्रहोच्चाटने वक्ष्ये नितरां परिपन्थिनाम् ।
महाक्रूरतरं गुह्यं शृणु गुह्यं वरानने ॥

करालमुग्रदंष्ट्रं च कालानलसमप्रभम् ।
अनेककोटिब्रह्माण्डखण्डमालाविभूषितम् ॥

End :

अनेनैव तु मन्त्रेण साक्षात् शिवसमो भवेत् ।
षट्सप्तकोष्ठेषु विलिख्य शारभं
रेखाग्रशूलं च तदग्रसाध्यकम् ।
बाह्ये तु मायावृततारवेष्टितं
जयादिकं साध्यतु माशुचक्रम् ॥

Colophon :

इति उच्चाटननिग्रहं नाम प्रकरणं समाप्तम् ।

411

Sl. No. 49370 **नित्यक्रमविधिः** **Ms. No. P. 8714/36**

Beginning :

नित्या मन्त्राः । अं ऐं क्लीं सौः ओं नमः कामेश्वरी कामफलप्रदे सर्वसत्त्ववशंकरी सर्वजगजक्षोभणकरी हुं हुं हुं प्रां द्रीं क्लीं ब्लूं सः सौः क्लीं ऐं कामेश्वरी नित्याश्रीपादुकां पूजयामि ॥

End :

अङ्गदेवता । ९१ । नित्या । ९६ । प्रकृतिरहस्यसङ्ख्या । ७६ ।
नामपारायण । २७३६ । आहत्य एकादशपारायणसंख्या । २९६ ॥

Colophon :

इति नित्यक्रमविधिस्सम्पूर्ण ।

412

Sl. No. 49372 **नित्यविधिः** **Ms. No. P. 5002/22**

Beginning :

अथ प्रातस्समुत्थाय गुरुं स्मृत्वा स्वनामभिः ।
ब्रह्मरन्ध्रे सहस्रारे कर्पूरधवल गुरुम् ।
वराभयकरं नित्यं ब्रह्मरूपं सदानघम् ।
इति ध्यात्वा, पञ्चोपचारं कृत्वा-
इति ध्यात्वा यथाशक्ति जप्त्वा हंसमनु प्रिये ॥

End :

मृद्वारिचन्दनो भस्म वामहस्ते निधापयेत् ।
अग्निमण्डलमालिख्य मध्ये मायानबिन्दुरम् ॥
कोणाग्रे हेमसंयुक्तम् दण्डेषु व्यूह्यतित्रयम् ।
ललाटे तिलकं कुर्यात् गुरुपूजापुरस्सरम् ॥

Colophon :

॥ हरिः ओम् ॥

413

Sl. No. 49373 नित्यानुष्ठानविधिः **Ms. No.P . 2350/9**

Beginning :

गुरुं गणपतिं दुर्गां वटुकं शिवमच्युतम् ।
ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वन्दे विभूतये ॥

अस्य श्रीभस्मधारणमन्त्रस्य पिप्पलाद ऋषिः । गायत्रीच्छन्दः । कालाग्निरुद्रो देवता । रं बीजम् । भस्म शक्तिः ।

End :

त्रिकोणं षट्कोणं अष्टदलं चतुर्दलं अष्टकोणं वृत्तत्रयम् × पुरं × पुरावृत्ति दीपपूजायन्त्रं बिन्दुत्रिकोणं वृत्तं अष्टदलं भवेत् । चतुर्वृत्तं × पुरं च दुर्गायन्त्रं प्रकीर्तितम् ॥ शिवमयम् ॥

Colophon :

॥ श्रीः ॥

414

Sl. No. 49374 नित्यामन्त्रोद्धारविधिः **Ms. No. C. 2111/6**

Beginning :

नित्यातन्त्रे—

हृत्प्राणेळाहंसदावह्निस्वैलीलितेरिता ।
त्रिविधा हंसभेदेन शृणु ताश्च यथाक्रमम् ॥
हंसाद्ययाद्यमध्यास्यादादिमध्यस्थहंसया ।
तृतीया प्रकृतिः ह (१५) स्यैव तुर्यातैरन्त्यमायया ॥

End :

ओं नमो भगवति ज्वालामालिनि देवदेवि सर्वभूतसंहारकारके जातवेदसि ज्वलन्ति ज्वलज्वलप्रज्वल ह्रां ह्रीं ह्रूं र (७) ज्वालामालिनि हुं फट् स्वाहा । वायुप्राण .... धनधान्यात्मनिधिलाभाय कल्पते ॥

Colophon :

इति नित्यामन्त्रोद्धारः ॥

415

Sl. No. 49380 नित्याषोडशिकार्णवव्याख्या **Ms. No. A. 266/2**

Beginning :

एवं सार्धत्रिंशदधिकचतुश्शतैः श्लोकैर्बाह्यमेव यागं प्रपञ्च्यान्तर्यागं प्रपञ्चेनोपदेष्टुं परशिवस्तद्विषकं देवीप्रश्नमवतारयति ।
द्योतत इति देवः । ...

End :

....शैवशास्त्रान्तिमसूत्रार्थमर्थेन सङ्क्षिप्याह—यतोऽपीति । सर्वत्र स्वयमेव दृश्यते । अतस्स्वापेक्षयाभिन्नं किमपि न चिन्तयेदित्येतदुपासनासारमिति सर्वं शिवम् ।

इति श्री भास्करोन्नीते नित्याषोडशिकाम्बुधेः ।
व्याख्याते सेतुबन्धाख्ये विश्रामोऽभवदष्टमः ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीण निखिलतन्त्रस्वतन्त्र श्रीमद्गम्भीरराय भारतीदीक्षितसूरिसूनुना भासुरानन्दनाथदीक्षाभिधानेन भास्कररायेण प्रणीतो नित्याषोडशिकार्णवव्याख्यात्मा सेतुबन्धः सम्पूर्णः ।

416

Sl. No. 49381 नित्याषोडशिकार्णवव्याख्या **Ms. No. B. 889**

Beginning :

श्रीगम्भीरविपश्चितः पितुरभूत् यः कोनमाम्बोदरे
पीडाष्टादशकस्य मर्मभिदभूत् यः श्रीनृसिंहाद्गुरोः ।
यश्च श्रीशिवदत्तशुक्लचरणैः पूर्णाभिषिक्तोऽभवत्
तन्त्रे ता त्रिपुरा त्रयीति मनुते तामेव नाथत्रयीम् ॥
वामकेश्वरतन्त्रस्थे नित्याषोडशिकार्णवे ।
पूर्वोत्तरचतुश्शुक्लौ व्याचष्टे भास्करस्सुधीः ॥

End :

अद्याप्यस्ति विपश्चितामपि महत्सन्देहकोटिद्वयं
श्रुत्या जगदीश्वरो निगदितस्सप्तः किमसोऽथ सः ।
तत्रेशः प्रथमैव कोटिरिति किन्निश्चायनाय स्फुटं
नाम्नैव प्रथितोऽभवत् परशिवश्श्रीसप्तकोटीश्वरः ॥
॥ प्सा इत्येकाक्षरं जटावाचकं ता भिस्सहितस्सप्तश्शिवः—आप्तो हरिरित्यर्थः ।

Colophon :

इति श्रीमत्पादवाक्यप्रमाणपारावारपरीणधुरीणनिखिलतन्त्रस्वतन्त्रश्रीमद्गम्भीर-रायभानिति दीक्षितसूरिसूनुना भासुरानन्दनाथदीक्षाभिधानेन भास्कररायेण प्रणीतो नित्याषोडशार्णवव्याख्यात्मा सेतुबन्धस्सम्पूर्णः ।

417

Sl. No. 49382 नित्योत्सवः **Ms. No. P. 4445/1**

Beginning :

नत्वा नाथपरम्परां गुरूंश्च विघ्नेश्वरं
श्रीमहाराज्ञीं तत्सचिवां तदीयपृतनानाथां तदन्तः पराम् ।
एषामावृतदेवताः परिचितान्रश्मिस्रजान्निर्जरान्
वीरांश्च प्रणये निबन्धनमिदं नाम्नापि नित्योत्सवः ॥

End :

आम्नायतन्त्रजाता
लोकपरेणार्यसम्प्रदायजुषा ।
ललितापदकञ्जरोलम्बेन
जगन्नाथपण्डितवरेण ॥ ६ ॥
कल्यब्देषु रसार्णव × × × व्यतीतेषु ।
नव्यः क्रोधनशरदि न्यबन्धि नित्योत्सवः शिवप्रीत्यै ॥

Colophon :

इति श्रीमत्सुरानन्दनाथचरणद्वन्द्वमिलिन्दायमानेनोमानन्दनाथेन निर्मितेऽभिनवे कल्पसूत्रानुसारिणि नित्योत्सवे निबन्धे धाराक्रमनिरूपणो नामा नवस्थोल्लासस्सप्तमरस × ×

418

Sl. No. 49385 **निधिप्रदीपः** **Ms. No. B. 802**

Beginning :

भक्तिप्रज्ञार्थकारी ५लयविघटनब्रह्मकंकाळधारी
स्वेच्छाक्रीडानुकारी त्रिगुणमयमहा × ब्रह्मचारी ।
दृश्यद्भिः सान्द्रकारी रणभटवियुजद्वन्द्वदैत्यप्रहारी
पायान्नो नीलकण्ठः कुपितमनसि च प्राण × कारी ॥
... निधिप्रदीपनामायं ग्रन्थः श्रीकण्ठशंभुना ।
क्रियते सारमादाय सिद्धशाबरतन्त्रकात् ॥

End :

पार्श्वे पिप्पलजे मूलं पुष्यार्ते विधिनोद्यतम् ।
अनेनाञ्चितनेत्रस्तु पातालाशोधनं विना ॥
निधिं पश्यति मेदिन्यां आचार्ये पार्श्वतः स्थिते ।
सुतैककरवीरस्य पुष्यार्के मूलमुध्दृतम ।
पातालमञ्जयेत्तेन घृष्टेन मधुना सह ॥

×× ×× ×× ××

Colophon :

419

Sl. No. 49387 **निर्वाणतन्त्रम्** **Ms. No. C. 3586**

Beginning :

कैलासपर्वते रम्ये नानाशास्त्रोपशोभिते ।

विपरीतरताशक्त्या चण्डी पप्रच्छ शङ्करम् ॥

निराकारं निर्गुणं च स्तुतिनिन्दाविवर्जितम् ।
सुनित्यं सर्वकर्तारं गुणातीतं सुनिश्चितम् ॥

End :

स मुक्तः सर्वपापेभ्यः सैव साक्षान्महेश्वरः ।
अन्नदानेन यत्पुण्यं तोयदानेन यत्फलम् ॥

तत्र सर्वं गृहस्थस्य नान्यस्य सुरवन्दिते ।
इति ते कथितं कान्ते चतुराश्रमलक्षणम् ॥

Colophon :

इति श्रीनिर्वाणतन्त्रे ईश्वरपार्वतीसंवादे चतुर्दशः पटलः ।

420

Sl. No. 49389 **नीलकण्ठत्र्यक्षरकल्पः** **Ms. No. P. 4461/136**

(शिवरहस्यान्तर्गतः)

Beginning :

वसिष्ठ उवाच—

देवदेव महाप्राज्ञ शिवसर्वज्ञ शङ्कर ।
केनोपयेन वै जन्तुर्मुच्येत मृत्युसङ्कटात् ॥

\+ + + +

ईश्वर उवाच—

शृणु गुह्यतमं विप्र शुचिराचम्य वाग्यतः ।

\+ + + +

ममात्मकं महामन्त्रं सर्वोपद्रवनाशनम् ।
त्र्यक्षरं विवृतान्तस्य त्रिकालज्ञानहेतुकम् ॥

End :

तोषयेत्स्वगुरुं भक्त्या सर्वस्वेनापि भक्तितः ।
तुष्टे गुरौ भविष्यन्ति देवास्तुष्टा न संशयः ॥
\+ + + +

एवं स्तुते भवेत्सिद्धिर्वसिष्ठ जपतां वर ।
किं पुनस्तनाध्येयं तत्पृच्छस्व वदाम्यहम् ॥

Coloph on :

इति शिवरहस्ये × × प्रोक्ते नीलकण्ठत्र्यक्षरकल्पे गुरुस्वा × × न्नाम दशमोऽध्यायः ।

421

Sl. No. 49394 **नीलकण्ठमन्त्रः** **Ms. No. P. 2355/3**

Beginning :

ओं नमो नीलकण्ठाय जगत्त्राणैकहेतवे ।
मामुद्धराशु महतः मृत्युपाशान्महेश्वर ॥ १ ॥
श्रियं देहि यशो देहि दीर्घमायुश्च देहि मे ।
वाचं देहि सुमेधां च नीलकण्ठ दयानिधे ॥ २ ॥

End :

चन्द्रार्धचूडाय त्रिणेत्राय महाविभूतये नमः ।
महाप्रसन्नवदनाय अभीष्टफलदाय रक्ष रक्ष मामजस्रं मृत्युं निवारय अरिष्टं

क्षिप्रं नश्यतु ओं नमः ॥

Colophon :

422

Sl. No. 49395 नीलकण्ठस्तोत्रमालामन्त्रः Ms. No. C. 3866/3

Beginning :

अस्य श्रीनीलकण्ठस्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः । अनुष्टुप् छन्दः + + + प्रणवं कीलकम् । श्रीसाम्बप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

नित्यं जपं कुर्यात् । राजभयचोरभयमारीभयमृगभयव्याघ्रभय फणिभयदेशभयविनाशनाय मोहनमन्त्राणां आकर्षणमन्त्राणां परिवार्याच्छेदनं भवेत् ।

Colophon :

इति श्रीरुद्रयामले वीरभद्रविरचितायां नीलकण्ठमालामन्त्रः प्रकीर्तितः ॥
समाप्तोऽयं मालामन्त्रः ॥

423

Sl. No. 49397 नीळामन्त्रः Ms. No. P. 827/32

Beginning :

नीळामन्त्रस्य—शुकब्रह्मा ऋषिः । गायत्री छन्दः । नीळादेवी देवता ।

भूसिध्यै विनियोगः ॥

End :

ओं नमो भगवत्यै हरिप्रियायै हरिवल्लभायै नीळादेव्यै स्वाहा—इति चतुर्विंशत्यक्षरमन्त्रवर्णैस्तारपूर्वकसबिन्दुनमोन्तैर्व्यापकन्यासः ॥

इन्दीवरदलश्यामां पङ्कजद्वयधारिणीम् ।
वरदाभयहस्ताब्जां नीळादेवीं सदा भजे ॥

Colophon :

424

Sl. No. 49398 नूतनचक्रविधिः Ms. No. C. 2569/6

Beginning :

अथ नूतनचक्रविधिः । तत्र यथोक्तमानेन निर्मितं चक्रं स्वर्णादि धातुनिर्मितं चाम्लरसेन प्रक्षालितं वेदोक्तविधिना कृताधिवासं क्वचित् पात्रे संस्थाप्य तत्राग्रे शुभमासपक्षतिथ्यृक्षवारयोगकरणमुहूर्तान्—

End :

ततो गुरुं दक्षिणादिभिः परितोषयेत् । इति प्राणप्रतिष्ठाविधिः ।

रत्नसागरे—

यावज्जीवं सुवर्णे स्यात्
रौप्ये द्वाविंशति प्रिये ।
ताम्रे द्वादशवर्षाणि
तदर्धं भूर्जपत्रके ॥

Colophon :

हरिः ओम्

425

Sl. No. 49399 नृसिंहकल्पः **Ms. No. B. 647**

Beginning :

श्रीमन्नृकेसरितनो जगदेकबन्धो
श्रीनीलकण्ठ करुणाकर सोमराज ।
वह्नीन्दुतीव्रकरनेत्रपिनाकपाणे
शीतांशुशेखर रमेश्वर पाहि विष्णो ॥

नारद उवाच—

मार्कण्डेय महायोगिन् मन्त्रं सर्वोत्तमोत्तमम् ।
ज्वालानृसिंहमन्त्रं च वदस्व मुनिसत्तम ॥

End :

महद्भिः पातकैर्देवि नात्र कार्या विचारणा ।
इत्येवं ते समाख्याता नृसिंहस्य महात्मनः ॥
गायत्रीसौख्यसौभाग्यविजयारोग्यभाग्यदः ।
श्रीमन्नृसिंहविभवे गरुडध्वजाय
तापत्रयोपशमनाय बलौषधाय ।
घोरारिवृश्चिकभुजङ्गविषाग्निरोग-
क्लेशव्ययाय हरये गुरवे नमस्ते ॥

Colophon :

इति ज्ञानार्णवे वैष्णवपीठप्रकारणे नृसिंहगायत्रीस्वरूपकथनं नाम सप्ततिः पटलः ।

426

Sl. No. 49407 **नृसिंहमन्त्रः** **Ms. No. P. 6128/27**

Beginning :

ओं नमो नारसिंहाय ज्वालानारसिंहायाग्निनेत्राय शङ्खचक्रगदापद्महस्ताय हिरण्यकशिपुवक्षोविदारणजनितान्त्रमालाविभूषिताय—

End :

भय × × × × चासस्कलास उद्धासयोद्धासय हन हन भञ्ज भञ्ज रक्ष रक्ष मां रक्ष रक्ष हुं फट् स्वाहा ।।

Colophon :

427

Sl. No. 49410 **नृसिंहमन्त्रविधिः** **Ms. No. P. 8121-3**

Beginning :

अस्य श्री नारसिंहमन्त्रस्य ब्रह्मा ऋषिः । गायत्री छन्दः । कराळनारसिंहो देवता इति । उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम् । शिरसि— ओं नृसिंहं भीषणं भद्रम् ।

End :

नारसिंहाय विद्महे महाबलाय धीमहि । तन्नोऽनन्तः प्रचोदयात् ।
वज्रनखाय विद्महे महादंष्ट्राय धीमहि ।
तन्नो नारसिंहः प्रचोदयात् ॥
पुनर्न्यासः । ध्यानम् । पञ्चमुखिसकलभूतदमनाय स्वाहा ॥

Colophon :

हरिः ओम्

428

Sl. No. 49418 नृसिंहमालामन्त्रः **Ms. No. P. 6128/24**

Beginning :

ओं नमो भगवते नारसिंहाय स्व × × × मालिने दीप्तदंष्ट्राय सर्वक्रोधनाय भूतप्रेतविनाशनाय सर्वविघ्नविनाशनाय—

End :

विनाशय सर्वदुःखम् । विनाशय दह पच भक्षय हुं फट् स्वाहा ॥

Colophon :

—इति नृसिंहमालामन्त्रः—

429

Sl. No. 49422 नृसिंहयन्त्रम् **Ms. No. P. 6128/25**

Beginning :

वज्रनखाय विद्महे....नारसिंहः प्रचोदयात् ॥

आलिख्याग्निपुरद्वयं तमुदरे
ह्रीं वाम्यनामापि च
षट्कोणेषु षडक्षराण्यथ मनोः....
वक्त्रेष्वष्टसु मन्त्रराजसहितान्
वर्णान् क्रमाद्द्वादश ॥

End :

तत्कोणेषु चिन्तामणिं विलिख्य इदं वि × × नारसिंहयन्त्रं भूर्जपत्रे विलिखेत् । सर्वभूतप्रेतपिशाचान्नाशयति । सर्वाभीष्टं ददातीत्यर्थः ॥—

Colophon :

॥ इति नारसिंहयन्त्रम् ॥

430

Sl. No. 49423 नारसिंहवज्रपञ्जररक्षाबन्धनस्तोत्रमन्त्रः **Ms. No. B. 679/21**

Beginning :

ब्रह्मोवाच—

अनेककोटिकोटीशं नृसिंहध्यानमाचरेत् ।
अन्योपि विविधं रक्षाविषरोगविदारणम् ॥ १ ॥
सर्वरक्षा नृणां देहे सर्वोपद्रवनाशनम् ।
सर्वशान्तिकरं गेहे पञ्जरं वज्रसम्मितम् ॥ २ ॥

अस्य श्री लक्ष्मीनृसिंहवज्ररक्षाबन्धनस्तोत्रमन्त्रस्य । ब्रह्मा ऋषिः । अनुष्टुप् छन्दः ॥

End :

भूर्जपत्रे लिखित्वा तु शिरसा धारयेत्सुधीः ।
शस्त्रघाता न बाध्यन्ते सङ्ग्रामे शत्रुसङ्कटे ॥
इदं तु पञ्जरं दिव्यं सर्वमन्त्रमयं शुभम् ।
सर्वरक्षाकरं नृणां सर्वदेवाभिवन्दितम् ।

Colophon :

इत्यथर्वणरहस्ये ब्रह्मसावित्रीसंवादे श्रीनृसिंहवज्रपञ्जररक्षाबन्धनस्तोत्रं सम्पूर्णम् ॥

॥ श्रीरस्तु ॥

431

Sl. No. 49424 नृसिंहविधानम् **Ms. No. P. 4461/20**

Beginning :

अस्य श्रीनृसिंहैकाक्षरमन्त्रस्य ब्रह्मा ऋषिः । गायत्री छन्दः । श्रीनृसिंहो देवता । क्षं बीजम् । ग्लौं शक्तिः । गं कीलकम् । क्षामित्यायङ्गानि । ध्यानम् ।

किरीटकौस्तुभोत्तुङ्गहारकेयूरनूपुरैः ।
भूषितं पुण्डरीकाक्षं प्रसन्नवदनं हरिम् ॥

भुजद्वयेनाधस्थेन वैरिवक्षोविदारणम् ।
भुजद्वयेन चोर्ध्वेन दैत्येन्द्राकर्षणे रतम् ॥

\+ \+ \+ \+

End :

कटुकालाबुका तिक्तालाबूः चतुर्जातिकम् ।
एलालवङ्गतत्पत्रं पञ्चमूलं पञ्चमल्लिकाः ॥

भृङ्गराजं सहदेवी भूतग्रामणि वसा शोण्ठी पूतिफली शिवा हरितकी निशाला
तिक्तो प्रोतकी मधुकं अतिमधुरं वजा च गन्धमांसी ।

Colophon :

इति नृसिंहविधानम्

432

Sl. No. 49425 नृसिंहस्तवराजः Ms. No. P. 4925/65

Beginning :

शृणुध्वमृषयः सर्वे नृसिंहस्याशुतोषकम् ।
प्रह्लादेनोदितं पुण्यं स्तवराजं ब्रवीमि वः ॥
नृसिंहं स्तुवतां नृणां नाधिव्याधिभयं क्वचित् ।
सिद्ध्यन्ति सर्वश्रेयांसि मनसा चिन्तितान्यपि ॥
+ + + +

End :

नृसिंहस्तवराजोऽयं भवद्भ्यः कथितो मया ।
शृण्वतां पठतां वापि सर्वाभीष्टफलप्रदः ॥
पठंस्तवमिदं मर्त्यः सायं प्रातः समाहितः ।
सर्वापद्भ्यमुक्तोऽन्ते विष्णुसायुज्यमाप्नुयात् ॥

Colophon :

इति नृसिंहपुराणे प्रह्लादप्रोक्तं इदं सम्पूर्णम्

433

Sl. No. 49427 नृसिंहस्तोत्रम् **Ms. No. P. 6915/5**

Beginning :

अस्य श्री सिंहस्तोत्रमहामन्त्रस्य नारदभगवानृषिः। अनुष्टुप् छन्दः श्रीनृसिंहो देवता। अं बीजम्। लं शक्तिः। गं कीलकम्। मम दुरितोपशान्त्यर्थे सर्वपीडापरिहरणेऽर्थे नृसिंहस्तोत्रजपे विनियोगः।

End :

उग्राय उग्राय ज्वालाय ज्वालाय नाशय नाशय जंभाय जंभाय स्तंभाय स्तंभाय मारय मारय शोषय शोषय योगाय योगाय वारय वरहाय लक्ष्मीनारसिंहाय —हुं फट् स्वाहा ॥

Colophon :

नारसिंहस्तोत्रं सम्पूर्णम्

434

Sl. No. 49428 नृसिंहानुष्टुभमन्त्रः **Ms. No. P. 10264/10**

Beginning :

अस्य नृसिंहानुष्टुभमहामन्त्रस्य ब्रह्मा ऋषिः। अनुष्टुप् छन्दः।

श्रीनृसिंहो देवता । + + +

सत्यज्ञानसुखस्वरूपममलं क्षीराब्धिमध्यस्थितं
योगारूढमतिप्रसन्नवदनं भूषासहस्तोज्ज्वलम् ।
त्र्यक्षं चक्रपिनाकसाभयवरान् बिभ्राणमर्कच्छविं
छत्रीभूतफणीन्द्रमिन्दुधवलं लक्ष्मीनृसिंहं भजे ।।

इति ध्यानम् ।।

End :

उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम् ।
नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम् ।।

Colophon :

इत्ययमानुष्टुभो मन्त्रः ।।

435

Sl. No. 49434 न्यासप्रकरणम् **Ms. No. B. 682**

Beginning :

अथ मातृकान्यासः ।
आदौ मातृकान्यासः ।

अस्य श्रीमातृकान्यासस्य ब्रह्मणे ऋषये नमः । शिरसा गायत्र्यै छन्दसे नमः । मुखे अन्तर्मातृका बहिर्मातृका सरस्वत्यै देवतायै नमः ।

End :

कण्ठादि नाभ्यन्तं स ४ कामकलासपरार्धात्मने श्रीमहात्रिपुरसुन्दर्याः

ऊरुद्वययुताय योनये नमः ।

नाभ्यदि पादान्तं ॥ १५ ॥ कामकलात्मने श्रीमहात्रिपुरसुन्दर्याः सर्वाङ्गाय नमः । सर्वाङ्गे । इति कामलान्यासः । (?)

Colophon :

इति न्यासप्रकरणं सम्पूर्णम्

436

Sl. No. 49436 न्यासविधिः Ms. No. C. 2548/2

Beginning :

न्यासालु ॥ तिथ्यादि संकीर्त्य श्रीमत्सौभाग्यविद्येश्वरी महात्रिपुरसुन्दरी प्रसादसिद्ध्यर्थे मन्त्रपारायणजपाराधनं करिष्ये । आसनस्थापनविघ्नोत्सारणादि भूतशुद्धिप्राणप्रतिष्ठा....

End :

ओं सिद्ध्यै नमः । जपेत् गुह्येन जपं निवेद्य ।

त्वं मूले सर्वदेवानां
प्रीतिदा शुभदा मम ।
शुभं कुरुष्व भद्रं ते
यशो वीर्यं च वर्धनम् ॥

इति मालां प्रार्थ्य स्थापयेत् । इति पूर्णाभिषेकेऽस्तु नित्यविधिकृत्यम् ॥

Colophon :

शुभं भवतु हरिः ओम्

437

Sl. No. 49439 पक्षिदुर्गाविधमन्त्रः Ms. No. P. 4461/6

Beginning :

अथ पक्षिदुर्गा ।

अस्य श्रीपक्षिदुर्गामन्त्रस्य काश्यपर्षिः । गायत्री छन्दः । पक्षि दुर्गा देवता । धूं बीजं । स्वाहा शक्तिः । पक्षिरूपिणीति कीलकम् । इष्टार्थे विनियोगः + +

End :

कटुत्रयकृतं चूर्णं जस्वा चाष्टोत्तरं शतम् ।
उच्चाटनाय विकिरेन्मर्कटीचूर्णमेव वा ।। मर्कटी = मार्जालपादलता
प्रयोगान्तरम् ।
उच्चाटयन्ति तुण्डेन विद्विषः प्रसभं दृशा ।।
स्मृत्वा जपेन्मन्त्रममुं मन्थं कर्तुं क्षणाद्रिपून् ।।

Colophon :

438

Sl. No. 49443 पञ्चगव्यविधिः Ms. No. P. 4925/51

Beginning :

प्रस्थपादं घृतं चैव प्रस्थार्थं दधि चोच्यते ।
त्रिपादं क्षीरमित्युक्तं गोमयं तु चतुष्पदम् ।।
गोमूत्रं षट्पदं चैव पञ्चगव्यमिति स्मृतम् ।

End :

गुरुणा विधिवत्प्रसादितं
मनुमष्टोर्ध्वशतं प्रजप्य भूपः ।
अभिवन्द्य ततः शृणोतु सम्यक्
यजनविधीरष्टोत्तरं सहस्रम् ॥
स्वशक्तिहानानवाप्तये जप्यात्

Colophon :

39

Sl. No. 49446 **पञ्चचक्रविधानम्** **Ms. No. C. 2522/1**

Beginning :

श्रीदेव्युवाच—

देव देव जगन्नाथ सर्वविद्याविशारद ।
कालिकानां हितार्थाय चक्रमेकं वदस्व मे ॥

चक्रं पञ्चविधं प्रोक्तं श्रीतन्त्रे रुद्रयामले ।
विधिना पूजयेच्चक्रं सौख्यमोक्षफलाप्तये ॥

End :

नोपवासं प्रकुर्वीत व्रतं नान्यत्समाचरेत् ।
एवं यो भक्तिसंयुक्तो जीवन्मुक्तस्स एव तः(?) ॥

तुलसीबिल्वपत्राणि धात्रीपत्राणि पार्वति ।

अर्चने यन्त्रराजश्च × र्वथा नोचितं प्रिये ।।

Colophon :

इति श्रीरुद्रयामले ईशपार्वतीसंवादे महाकुलाचारक्रमे पञ्चचक्रविधि-निरूपणम् ।।

440

Sl. No. 49448 पञ्चतत्त्वप्रकाशः **Ms. No.C . 1437**

Beginning :

अद्वयं द्वयमायाति लक्ष्मीनारायणात्मकम् ।
अपूर्वं तन्महःपूरं कोटिसूरमहर्नुमः ।।

भूर्भूमिः? पृथिवीः पृथ्वी मेदिनी काश्यपी मही ।
धरा वसुमती धात्री × मा विश्वंभरावनिः ।।

End :

इति निगदित एषः शाष्टिकानन्दकारी
रुचिरुचिरसुवर्णोच्चा समानप्रकाशः ।
क्षितिगगनतुरंगक्षोणि संख्योऽर्कवर्षे
शुचिश्रवलसुषष्टान्तानुवारेवहस्ते ।।

ं चतत्त्वप्रकाशोऽयं वेणीधत्तेन धीमता ।
प्रकाशितः प्रकाशार्थे श्रीविश्वेशकृपाज्ञया ।।

Colophon :

इति याज्ञिकवंशावतंसनीलकण्ठात्मजयाज्ञिकजगज्जीवनस्तनुवेणीदत्तविरचिते

पंचतत्त्वप्रकाशे आकाशजानुः प्रस्फूर्तिमनमित् समाप्तश्चायं पंचतत्त्वप्रकाशः ।

441

Sl. No. 49449 पञ्चतारकपरमरहस्यम् Ms. No. B. 950/2

Beginning :

गुरुलक्षणोपदेशप्रारम्भः—

श्रीमत्सुराराध्यदिव्यपादसरोरुहम् ।
जगन्मयं परानन्दं संस्मरेद् भुवनेश्वरम् ॥

षट्त्रिंशत्तत्त्वपीठस्थतारकब्रह्मरूपिणे ।
पूर्णानन्दावधूताय नमो वेदान्तवेदिने ॥

End :

दैवकं तं समाश्रित्य ज्ञानमन्त्रस्य बुद्धिमान् ।
गुरुयोगं समाश्रित्य ब्रह्मसायुज्यमाप्नुयात् ॥

उपदेशक्रमं वक्ष्ये सर्वसाधननिर्णयम् ।
सिद्धासनं प्रथमता ब्रह्मासायुज्यमाप्नुयात् ॥

Colophon :

इति श्रीमत्पञ्चतारकपरहंसरहस्यग्रन्थमध्ये उमामहेश्वरसंवादे गुरुलक्षणोपदेशो नाम तृतीयः पटलः ।

442

Sl. No. 49450 पञ्चदशमालोद्धारः Ms. No. B. 664/2a

Beginning :

ललितापरिशिष्टोक्त पञ्चदशमालोद्धारः प्रारम्भः ॥

देव्युवाच ॥

भगवन् देव देवेश सर्वज्ञ करुणानिधे ।
मालामन्त्रान् समाचक्ष्व कादिविद्यासमुद्भवान् ॥ १ ॥

श्री शिवः ॥

मालामन्त्रान् प्रवक्ष्यामि महाराज्ञा महोदयात् ।
एषां स्मरणमात्रेण करस्थाः सर्वसिद्धयः ॥ २ ॥

End :

श्रीविद्योपासको मालामन्त्रानेतान्न वेत्ति यः ।
न तस्य फलदोपास्तः भस्मनीव हुताशनः ॥ ७६ ॥

तस्मादवश्यं विज्ञेयाः एताः पञ्चदश प्रजाः ।
अप्रकाश्या अपि शिवे तत्प्रीत्यैव मयोदिताः ॥ ७७ ॥

Colophon :

इति श्री ललितापरिशिष्टतन्त्रे उमामहेश्वरसंवादे खड्गमालामन्त्रोद्धारे द्वितीयः पटलः ॥

443

Sl. No. 49452 **पञ्चदशविधखड्गमालामन्त्रः** **Ms. No. B. 664/13**

Beginning :

पञ्चदशविधखड्गमालाप्रारम्भः ॥

ईश्वर उवाच—

मालामन्त्रविधानन्तु प्रवक्ष्याम्यनुपूर्वशः(?) ।

सर्वसङ्कल्पसंसिद्धेः एतज्ज्ञात्वा नरो भवेत् ॥ १ ॥

नवावरणदेवीनां ललिताया महौजसः ।
एकत्र गणनारूपा वेदवेदान्तगोचरा ॥ २ ॥

End :

असाध्यरोगग्रस्तानां रोगा यान्ति रिपुक्षयः ।
एतन्मन्त्रिततोयेन भस्मना वा सपुत्क्षणात् ॥ ४५ ॥
पठित्वा हस्तस्पर्शाद्वा नात्र कार्या विचारणा ।
सप्ताष्टमालासंख्याभिः मन्त्रयित्वा घटोदकम् ॥ ४६ ॥
सप्ताहसेवनं कृत्वा वन्ध्या पुत्रवती भवेत् ॥

Colophon :

इति श्रीसौभाग्यललिताहृदयाख्यायां ललितापरिशिष्टोक्तप्रमेयन्यक्तायां पञ्चदशमालामन्त्रस्योद्धारक्रमः ॥

444

Sl. No. 49459 **पञ्चदशीमन्त्रजपविधिः** **Ms. No. P. 9708/4**

Beginning :

अथ पञ्चदशीजपविधिः -

मूलेन प्राणायामत्रयं कृत्वा एवं गुणेति तिथौ पञ्चदशाक्षरीमहात्रिपुरसुन्दरीप्रीत्यर्थं पञ्चदशीमूलमन्त्रजपं करिष्ये ।

श्रीनाथादिगुरुत्रय गणपतिं पीठत्रयं भैरवं
सिद्धौघं वटुकत्रयं पदयुगं दूतिक्रमं मण्डलम् ।
वीराद्यष्टचतुष्कषष्टिनवकं वीरावलीपञ्चकं
श्रीमन्मालिनिमन्त्रराज सहितं वन्दे गुरोर्मण्डलम् ॥

\+ \+ \+ \+

End :

उत्तरन्यासः—भूर्भुवः स्वरोमिति दिग्विमोकः । यस्य स्मृत्येति पञ्चदशी जपेन भगवान्? सर्वात्मका श्रीमत्त्रिपुरसुन्दरी प्रीयताम् । ओं तत्सत् ॥ ॥ ॥

Colophon :

इति पञ्चदशीजपविधिः

445

Sl. No. 49465 **पञ्चदशाक्षरीमहामन्त्रः** **Ms. No. P. 4868/7**

Beginning :

अस्य श्री पञ्चदशाक्षरी महामन्त्रस्य वशिष्टऋषिः । साम्राज्यश्रीपट्टाभिराम-चन्द्रो देवता । श्रीरामजयेति बीजम् । जयजयेति शक्तिः । रामरामेति कीलकम् । श्रीपट्टाभिरामचन्द्रप्रसादसिद्ध्यर्थे जपे विनियोगः ॥

End :

वैदेहीसहितं सुलक्षणयुतं राकासुतं सानुजं ।
सुग्रीवं च विभीषणानिलसुतं नीलं नलं साङ्गदम् ।
विश्वामित्रवसिष्ठगौतमभरद्वाजादिसंसेवितं
रामो मारुत × × साम्राज्यासिंहासने ॥

इति ध्यात्वा पञ्चपूजां करिष्ये

मनुः - श्रीराम...रामा इति ध्यात्वा पुनः पञ्चपूजा ।

Colophon :

हरिः ओम्

446

Sl. No. 49467 पञ्चदशिविधानम् Ms. No. C. 3594

Beginning :

कैलासशिखरासीनं गौरी पप्रच्छ शङ्करम् ।
पन्चदशि विचित्कृत्वा भक्तानां हितकारणे ।

ईश्वर उवाच :-

शृणु देवि प्रवक्ष्यामि पञ्चदशिविधानकम् ।
पन्चदशिमहायन्त्रं कलौ सिद्धिप्रदायकम् ।

End :

नवग्रहात्मकं यन्त्रं योगध्यानधनाद्ययोः ।
वद खण्डं × × × क्षेया विषमाङ्क शिवोदितः ।

Colophon :

इति श्री शिवभाषितं पन्चदशिकयन्त्रं समाप्तम् ।

447

Sl. No. 49468 पञ्चन्यासविधिः Ms. No. P. 8714/33

Beginning :

मूलेनाचम्य प्राणानायम्य एवंगुणेत्यादिशुभतिथौ श्रीमहात्रिपुरसुन्दरीप्रीत्यर्थं जपं करिष्ये ॥ ऋष्यादिकीलकान्तं विन्यस्य करशुद्धिं कुर्यात् ॥

अं आं सौः मध्यमाभ्यां । ७ । २ ॥अनामिकाभ्यां नमः ॥ २ ॥ ३ ॥

End :

श्रीम् । ० । ललाटे । २ । ह्रीम् । ० । कण्ठे । २ ॥ क्लीम् । ० । हृदि । २ । ऐम् । ० । नाभौ । २ । सौः । ० । मूलाधारे । २ । ओम् । ० । ब्रह्मरन्ध्रे । २ । ह्रीम् । ० । मुखे । २ । श्रीम् । गुदे । २ । क ५ । ० । आधारे । २ । ह ६ । ० । हृदि । २ । स ४ । ० । ब्रह्मरन्ध्रे । २ । सौः । ० । दक्षहस्ते । २ । ऐम् । ० । वामहस्ते । २ । क्लीम् । ० । दक्षपादे । २ । ह्रीम् । ० । वामपादे । २ । श्रीम् । ० । हृदये ॥ ५ ॥

Colophon :

इति पञ्चविधन्यासः ।

448

Sl. No. 49469 **पञ्चपञ्चिकोद्धारः** **Ms. No. C. 2111/10**

Beginning :

अथ पञ्चपञ्चिकोद्धारः ।

मन्त्रमहोदधौ—

केशवो वह्निमारूढो वामनेत्रेन्दुसंयुतः ।
लक्ष्मीमन्त्रोऽयमेकार्णः तेन लक्ष्मीं प्रपूजयेत् ॥ श्रीं ॥

तारपद्मा शक्तिपद्मा कमले कमलालये—
प्रसादयुगलं लक्ष्मीर्मायापद्मा ध्रुवो महा ॥

End :

जम्भे जम्भिनि नमः । मोहे मोहिनि नमः । स्तम्भे स्तम्भिनि नमः ।

ऐं ग्लौं ऐं सर्वदुष्टप्रदुष्टानां सर्वेषां सर्ववाक्चित्तचक्षुर्मुखगतिजिह्वास्तम्भं कुरु कुरु शीघ्रं वश्यं कुरु कुरु ऐं ग्लौं ... स्वाहा ॥

Colophon :

इति पञ्चपञ्चिकाः ॥

449

Sl. No. 49473 **पञ्चमकारसंस्कारविधिः** **Ms. No. P. 8106/4**

Beginning :

अथ पञ्चमकारसंस्कारविधिः—

अस्य श्री प्रथमाकारमन्त्रस्य सौभाग्यकर अर्धनारीश्वरऋषिः । अनुष्टुप् छन्दः । प्रप्रथममकाराम्बिका देवता । मां बीजम् । मीं शक्तिः । मः कीलकम् ।

End :

शिवमाचरणं सर्वान्तकार्यैर्युगपत्युक्तिनाथानाम् । इतिपञ्चमकार प्रत्येक-प्रत्येकसंस्कारजपं कुर्यात् ॥

मज्जा मांसं तथा मीनं
मुद्रा मैथुनमेव च ।
इति पञ्च मकारं स्यात्
× × राजनाः ॥(?)

Colophon :

इति पञ्च मकारसंस्कारविधिः

450

Sl. No. 49474 पञ्चमवासनाकथनम् Ms. No. C. 2522/3B

Beginning :

श्रीदेव्युवाच—

कुलेश श्रोतुमिच्छामि गुरुनामादिवासना ।
तत्त्वं कुलपदार्थानां वद मे परमेश्वर ॥ १ ॥

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि ।
तस्य श्रवणमात्रेण कुलज्ञानं प्रजायते ॥ २ ॥

End :

यस्तूर्ध्वाम्ना यस्य माहात्म्यं पठच्छ्रीचक्रसन्निधौ ।
भक्त्या परमया देवि यः शृणोतीह कालिकः ॥
व्रतदानतपस्तीर्थयज्ञदेवार्चनादिषु ।
यत्फलं कोटिगुणितं लभते तन्न संशयः ॥

Colophon :

इति श्रीकुलार्णवे महारहस्ये सपादलक्षग्रन्थे महातन्त्रे पञ्चमवासनाकथनं नाम सप्तदशोल्लासः ।

451

Sl. No. 49476 पञ्चमीयागक्रमः Ms. No. C. 2568/3a

Beginning :

॥ अथ प.मी.ागक्रमः । तत्र साधकः कृताञ्जलिः, स्वशिरसि गुरुपादुकां

ध्यात्वा, सम्पूज्य, प्रणम्य, वक्ष्यमाणप्रकारेण श्रीगुर्वाज्ञामादाय, सर्वलक्षण-सम्पन्नां ब्रह्मविद्यादीक्षितां दूतीं प्रातर्निमन्त्रितां साधकः स्वयं गत्वा प्रणम्य ।

End :

स्वात्मानमलङ्कृतं मत्वा श्रीगुरुं प्रणम्य पीठपूजायोगपीठंपूजामारभेत् । तत्र तन्त्रस्योत्तममेव च ।

उत्तमं रजवीर्याणि मध्यमं केवलं रजम् ।
अधमं पौरुषं वीर्यं तथान्यच्चाधमाधमम् ॥
इति ॥

Colophon :

हरिः ओम्

452

Sl. No. 49477 **पञ्चमीस्तवराजः** **Ms. No. C. 565**

Beginning :

नमामि सद्गुरुं शान्तं प्रत्यक्षं शिवरूपिणम् ।
शिरसा योगपीठस्थं मुक्तिकामार्थसिद्धिदम् ॥

End :

आकाशे सुप्रकाशे सकलगुणमयीं सुन्दरीं रक्तनेत्रां
नित्यां पद्मासनस्थां तरुणरविनिभां रक्तचन्द्रप्रभाभाम् ।
ध्यायेत्तां सर्वभावैः सकलसुरनुतां सुन्दरीं यो हि पश्येत्
साक्षाद्देवः शिवो वा मदनजकृते खेचरे जायते वा ॥

Colophon :

इति श्रीवामकेश्वरतन्त्रोत्तमे महातन्त्रे पञ्चमस्तवराजः संपूर्णः

453

Sl. No. 49478 पञ्चमुखरुद्रध्यानम् **Ms. No. P. 5657/67**

Beginning :

अथातः पञ्चाङ्गरुद्राणां नमस्ते रुद्र—उत ते नमः ।

संवर्ताग्नितटित्प्रदीप्तकनकप्रस्पर्धितेजोऽरुणं
गम्भीरध्वनिमिश्रितोग्रदशनः प्रोद्भासिताम्राधरम् ।
सूर्येन्दुद्युतिलोलपिङ्गलजटाभारप्रबद्धोरगं
वन्दे सिद्धसुरासुरेन्द्रनमितं पूर्वं मुखं शूलिनः ॥

End :

नमो अस्तु ।

व्यक्ताव्यक्तगुणेतरं प्रविमलं षट्त्रिंशतत्वाधिकं
तस्मादुत्तरतत्वमक्षरमिति ध्येयं सदा योगिभिः ।
वन्दे तामसवर्जितेन मनसा सूक्ष्मातिसूक्ष्मात्परं
शान्तं पञ्चममीश्वरस्य वदनं खव्यापितेजोमयम् ।

ॐ नमो भगवते रुद्राय ॐ नम ऊर्ध्वाङ्गरुद्राय नमः । न्यासपूर्वकजप-होमार्चनाभिषेकविधिं व्याख्यास्यामः ।

Colophon :

454

Sl. No. 49479 पञ्चमुखविराड्रूपहनुमन्मन्त्रविधिः Ms. No. P. 4868/9

Beginning :

अस्य श्री पञ्चमुखीहनुमन्महामन्त्रस्य श्रीरामचन्द्रऋषिः अनुष्टुप् छन्दः । श्री सीतारामो देवता । हुं हनुमानिति बीजम् । ह्रीं वायुदेवेति शक्तिः । यं आंजनीसूनुरिति कीलकम् । श्रीमत्पञ्चमुखी हनुमत्प्रादसिद्ध्यर्थे जपे विनियोगः ।

End :

ध्यात्वा लमिति पञ्चपूजां कुर्यात् । अथ मनुः । ओं ह्रीं पाशहरिमर्कट मर्कटाय स्वाहा । इदं? मनुं कल्पोक्तनियमप्रकारेण अयुतपुरश्चर्यां कुर्यात् पुनः हृदयादिन्यासः । पुनः पञ्चपूजा

॥ कवचम् ॥

Colophon :

455

Sl. No 49481 पञ्चमुखहनुमन्मालामन्त्रः Ms. No. P. 9019/40

Beginning :

हरिः ओम् । अस्य श्रीपञ्चमुखहनुमन्मालामन्त्रस्य ब्रह्मा ऋषिः । गायत्री छन्दः । पञ्चमुखविराट्पुरुषरूपी परमात्मा देवता । + +

अथ ध्यानं प्रवक्ष्यामि शृणु सर्वाङ्गसुन्दरि ।
मन्त्रं + देवदेवेश ध्यानं हनुमतः परम् ॥

पञ्चवक्त्रं महाभीमं त्रिपञ्चनयनैर्युतम् ।
पूर्ववराहवक्त्र तु कोटिसूर्यसमप्रभम् ॥

End :

कपिमुखमपि पूर्वे दक्षिणे नारसिंहं
खगमुखमपि पश्चादुत्तरे सूकरस्य ।
हयमुखमपि चोर्ध्वं चिन्तयेद्वायुसूनुं
सकलदुरितशत्रून् ब्रह्मरक्षोपहन्त्रीम् ॥

श्रीहनुमते नमः । ओम् ॥

Colophon :

पञ्चमुखहनुमन्मालामन्त्रः सम्पूर्णः ।

456

Sl. No. 49486 पञ्चमुखहनुमत्कवचम् **Ms. No. P. 6915/3**

Beginning :

पञ्चमुखहनुमत्कवचम्—

अस्य श्रीहनुमत्कवचस्तोत्रमन्त्रस्य रामचन्द्रभगवान् ऋषिः । अनुष्टुप् छन्दः । मारुतात्मज इति बीजम् । अञ्जनासूनुरिति शक्तिः । वायुपुत्र इति कीलकम् । मनोरथसिद्ध्यर्थे जपे विनियोगः ॥

End :

अष्टवारं पठेन्नित्यं सर्वसौभाग्यसिद्धिदम् ।
नववारं पठेन्नित्यं त्रैलोक्यज्ञानदं फलम् ॥

दशवारं पठेन्नित्यं ब्रह्मादीनां वशङ्करम् ।
एकादश पठेन्नित्यं सद्यःसिद्धिं लभेन्नरः ॥

Colophon :

इति सुदर्शन × पञ्चमुखी हनुमत्कवचं सम्पूर्णम् ।

456

Sl. No. 49494 पञ्चमुखहनूमन्मन्त्रकल्पः **Ms. No. C. 2663/4**

Beginning :

श्रीरामदूताय हनुमते नमः ॥ अस्य श्री पञ्चवक्त्रहनुमन्मालामन्त्रस्य श्रीशौनको ऋषिः । अनुष्टुप् छन्दः । हनूमान् देवता । रं बीजम् । हुं शक्तिः । फं कीलकम् । रोगकृत्रिमज्वरादिसर्वज्वरभूतवेतालादि-सर्वग्रहोच्चाटनार्थे— जपे विनियोगः ॥

End :

अं आं इं ईं उं ऊं ऋं ॠं लं ॡं एं ऐं ओं औं अं अः ॥

कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं— फट् स्वाहा—

इदं रहस्यं परमं भूतक्षुद्रादिरोगहृत् ।
सर्वरक्षाकरं चैव सर्वकार्यार्थसाधनम् ॥

Colophon :

इति श्रीलक्ष्मीसंहितायां पञ्चमुखहनुमत्कल्पः समाप्तः ।

458

Sl. No. 49498 **पञ्चमुखिहयग्रीवमन्त्रविधिः** **Ms. No. P. 8321/6**

Beginning :

अस्य श्री पञ्चमुखिहयग्रीवमहामन्त्रस्य रामचन्द्रऋषिः गायत्री छन्दः। महाप्रचण्डवायुकपिपञ्चमुखिहनुमान् देवता। मम कार्यसिद्ध्यर्थे जपे विनियोगः॥

End :

ओं नमो भगवते सर्वज्ञाय सर्वविद्याप्रदात्रे महाहयग्रीवाय। ऊर्ध्वकपिमुख हयग्रीव ओं रं रं रं रं रं मन्त्रमूर्तये सकलवशीकरणाय स्वाहा। ओं ह्रीं.... फट् स्वाहा॥

Colophon :

हरिः ओम्

459

Sl. No. 49999 **पञ्जरस्तोत्रीयद्वादशमन्त्रपुरश्चर्याविधिः** **Ms. No. P. 4922/7**

Beginning :

जपेद्द्वादशमन्त्राणां पुरश्चर्यां मुनीश्वराः।
लक्षसंख्या भवेत्सापि आद्यन्ते पञ्जरं न्यसेत्॥
किं वा द्वादशसाहस्रं सर्वस्य जप इष्यते।
ऊरुघ्नोदके स्थित्वा भ‍ःमालोक्य बुद्धिमान्॥
जपेद्द्वादशकं मन्त्रं मण्डलान्तं दृढव्रतः।

\+ \+ \+ \+

नासाध्यं विद्यते तस्य हयग्रीवप्रसादतः ।
यं यं कामयते कामं तं तमाप्नोति मानवः ॥
वेदनादमिदं प्राहुर्मुनयश्च सितव्रताः ।
आनन्दसान्द्रममलात्मकमद्वितीयं
विद्यानिधिं विमलशोभहेतुभूतम् ।
आराधये ध्रुवममयङ्कजमध्यसस्थं
अश्वोत्तमाङ्गमखिलैरभिवन्द्यमानम् ॥

Colophon :

इति नारदीये हयग्रीवकल्पोक्तहयग्रीवपञ्जरं समाप्तम् ।

460

Sl. No. 49503 **पञ्चवक्त्रहनुमन्मन्त्रदिग्बन्धनप्रयोगः** **Ms. No. P. 4525/43**

Beginning :

अथ दिग्बन्धनप्रयोगः । पञ्चावरणदिग्बन्धनमालामन्त्रस्य शौनकऋषिः अनुष्टुप् छन्दः । पञ्चवक्त्रहनुमान् देवता ।

End :

विष्ण्वात्मकाय पञ्चवक्त्रहनुमते श्रीरामदूताय नमः ।
वामे करे वैरिमिदं वहन्तं शैलं परे शृङ्खलहारि टङ्कम् ।
दधानमच्छाच्छसुवर्णकान्तिं भजे लसत्कुण्डलमाञ्जनेयम् ॥

Colophon :

श्रीः

461

Sl. No. 49511 पञ्चवक्त्रहनुमन्मालामन्त्रः Ms. No. C· 2663/3

Beginning :

अस्य श्री पञ्चवक्त्रहनुमन्मालामन्त्रस्य श्रीरामचन्द्रो भगवानृषिः । त्रिष्टुप् छन्दः । श्री हनुमान् देवता । अञ्जनासूनुरिति शक्तिः । वायुपुत्रेति कीलकम् । मम श्री पञ्चमुखीहनुमत्प्रसादसिद्ध्यर्थे मनोरथसिद्ध्यथ....विनियोगः ॥

End :

ओं नमो भगवते श्रीरामदूतहनुमते हुं फट् स्वाहा इति मालामन्त्रः ॥

दशदिग्बन्धनसहितो राक्षसेन महामनुः ।
सकृदुच्चारणादस्य सर्वग्रहविमोक्षणम् ॥

Colophon :

हरिः ओम् । शुभमस्तु

462

Sl. No. 49517 पञ्चशुद्धिविधिः Ms. No. P· 8106/2

Beginning :

उत्पतन्ति हि भूतानि पृथिव्यन्तरवासिनः ।
आसनादौ नमस्कृत्य ब्रह्मकर्म समारभेत् ॥

अपक्रामन्तुभूत—समारभेत् । इतिमन्त्रेण वामपादेन भूमौ खातत्रयं कृत्वा

अथ शिखाबन्धनम्—

End :

ओं नमः सर्वाङ्ग एवं प्रकारः । मातृकाक्षरेणेते तैस्सह अकारादिक्षकारान्तसृष्टि संहारक्रमेण अनुलोमविलोमेन मातृकान्यासः ॥

इति बहिर्मातृकान्यासः ॥

Colophon :

इति पञ्चशुद्धिविधिः

63

Sl. No. 49520 **पञ्चाक्षरीकल्पः** **Ms. No. B. 1007**

Beginning :

आयुर्वृद्धिकरं वश्यं जयं रक्षाकरं शुभम् ।
सर्वसिद्धिकरं पुण्यमणिमादिगुणप्रदम् ॥

अपमृत्युहरं श्रीदं सर्वदोषनिकृन्तनम् ।
अपस्मारक्षयकरं सर्वव्याधिप्रभञ्जनम् ॥

+ + + +

End :

एवं मयोदितं सर्वं मदीयोपासनामनुः ।
जहि शत्रून् महाभाग राक्षसानद्य नैकशः ॥

त्वत्प्रसादान्माहाभाग गोप्यं नैव मनु तथा ।
श्रुतं वा सान्तवत्सर्वं जीवन्मुक्तो न संशयः ॥

Colophon :

इति विमलागमे पञ्चाक्षरीकल्पे पञ्चब्रह्मविधिर्नाम चतुर्विंशः पटलः ।

464

Sl. No. 49524 **पञ्चाक्षरीमंत्रः** **Ms. No. P. 3801/6**

Beginning :

पञ्चाक्षरी ।

तप्तचामीकरप्रख्या पीनोन्नतपयोधरा ।
चतुर्भुजा त्रिनयना बालेन्दुकृतशेखरा ।
पद्मोत्पलधरा सौम्या वरदाभयपाणिका ।
सर्वलक्षणसम्पन्ना सर्वाभरणभूषिता ॥

End :

बीजहीनं च निर्बीजं शक्तिहीनं त्वशक्तिकम् ।
कीलकैरूपनाशं च भावने वर्णनाशनम् ।
न काष्ठे विद्यते लोके न पाषाणे न काञ्चने ।
भावे हि विद्यते सिद्धिः तस्माद्भावो हि कारणम् ॥

Colophon :

465

Sl. No. 49526 **पञ्चाङ्गरुद्रन्यासः** **Ms. No. P. 8170/1**

Beginning :

श्रीगुरुभ्यो नमः । हरिः ओम् ॥

अयातः पञ्चाङ्गरुद्राणां, नमस्ते रुद्रम न्यव उतोत इषवे नमः। नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः। यात इषुः शिवतमा शिंव बभूव ते धनुः ॥

End :

अश्वमेधशतसहस्रक्रतु × × × × मवाप्नोति इत्याह भगवान् बोधायनः ॥

एवं यः कुरुते नित्यं सर्वपापैः प्रमुच्यते।
सर्वान्कामानवाप्नोति शिवसायुज्यमाप्नुयात् ॥

सेवन्तिका .... मे प्रसीद ॥

Colophon :

श्री बोधायनाचार्येभ्यो नमः ॥ यादृशं पुस्तकं दृष्टं ... न विद्यते ॥

॥ श्रीसाम्बसदाशिवार्पणमस्तु ॥

466

Sl. No. 49536 **पट्टाभिराममन्त्रजपविधिः** **Ms. No. P. 9696/6**

Beginning :

अस्य श्रीपट्टाभिराममन्त्रस्य ब्रह्मा ऋषिः। अनुष्टुप् छन्दः। श्रीरामचन्द्रो-देवता। श्रीं बीजम्। नमः शक्तिः। रां राम इति कीलकम्। पट्टाभिरामचन्द्र-प्रसादसिद्ध्यर्थे जपे विनियोगः। एं इत्यादि षड्दीर्घषडङ्गः।

End :

इलादि पञ्चोपचारपूजा। मन्त्रः, ओं श्रीं रां रामाय नमः। ओं श्री सीतायै

नमः । लं लक्ष्मणाय नमः । भं भारताय नमः । शं शत्रुघ्नाय नमः । हं हनुमते नमः । उत्तरन्यासः । दिग्विमोकः ।।

Colophon :

467

Sl. No. 49541 पद्माक्षादिप्रतिष्ठाविधिः **Ms. No. C. 779/4**

Beginning :

अथ पद्माक्षादीनां प्रतिष्ठाविधिः प्रदर्श्यते । तत्र ग्रथितां मालां कुत्रचित् पात्रे संस्थाप्य तस्यां गणेशसूर्यविष्णुदुर्गाः पृथक् पृथक् आवाह्य संपूज्य हौमिति मन्त्रेण पञ्चगव्ये तन्निक्षिप्य,

End :

तस्यां इष्टदेवतां सम्पूज्य, आचार्यं दक्षिणाभिः परितोष्य प्रणम्य ब्राह्मणांश्च अन्नादिभिः तोषयेत् इति तृतीयो मालाशोधनप्रकारः ॥

Colophon :

468

Sl. No. 49545 परप्रयोगविध्वंसनमन्त्रविधिः **Ms. No. P. 4925/66**

Beginning :

लक्ष्मीरुवाच—

देव देव नृसिंहेश सर्वलोकजगत्पते ।
परमन्त्रनिवारः स्यात्केनोपायेन मे वद ॥

श्री नृसिंह उवाच--

शृणु देवि प्रवक्ष्यामि मम मन्त्रं च ते प्रिये ।
ग्रहमारणमन्त्रं च जपेदावश्यकं प्रिये ॥

End :

सत्यं सत्यं यथा सत्यं नृसिंहस्मरणं प्रिये ।
गोपनीयं प्रयत्नेन सर्वकार्यार्थसिद्धिदम् ॥
सर्वान् कामानवाप्नोति नात्र कार्या विचारणा ।

Colophon :

इत्यथर्वणरहस्ये स्तम्भोद्भवे

469

Sl. No. 49547 **परमानन्दतन्त्रम्** **Ms. No. C. 2408**

Beginning :

कमलानन्दनाथाय लक्ष्मीनारायणाय च ।
श्रीयज्ञानन्दनाथाय शिवाय गुरवे नमः ॥

अथ परमानन्दतन्त्रप्रारम्भः । ओम् नमस्त्रिपुरसुन्दर्यै नमः ।

End :

चतुर्विंशतिसाहस्रपरिवारेण संयुतः ।
पूर्वाम्नायः कामनीरपीठरूपो महेश्वर ।

सौभाग्यविद्यामारभ्य तिरस्करणिकावधि ।
उक्तमन्त्रास्त्वथ श्रृणु शेषमन्त्रान् महेश्वर ॥

Colophon :

[इति श्रीपरमानन्दतन्त्रे सप्तदशोल्लासः]

470

Sl. No. 49549 परमेश्वरीमहामन्त्रविधिः **Ms. No. P. 3895/2**

Beginning :

अस्य श्री शूलिनी × दुर्गा परमेश्वरीमहामन्त्रस्य दीर्घतमऋषिः त्रिष्टुप् छन्दः । दुर्गापरमेश्वरी देवता । अं बीजम् । आय शक्तिः । ऐं कीलकम् । श्री शूलिनीदुर्गाप्रसादसिद्ध्यर्थे जपे विनियोगः ॥

End :

ओं श्रीं ह्रीं क्लीं हुं ज्वल ज्वल शूलिनी दुष्टग्रहं फट् स्वाहा ।
नित्यमष्टोत्तरशतं जपं कुर्यात् अनन्तरम् ।

हृदयादिन्यासः । हूमिति दिग्विमोकः । ध्यानम् श्या + निम् ।

॥ हरिः ओम् ॥

Colophon :

471

Sl. No. 49555 परशुरामसूत्रम् **Ms. No. B. 254**

Beginning :

अथातो दीक्षां व्याख्यास्यामः । भगवान्परमशिवभट्टारकश्रुत्याद्यष्टादश विद्याः । सर्वाणि दर्शनानि लीलया तत्तदवस्थापन्नप्राणिना यस्य मन्दिरस्य भगवन्विमर्शे मत्यार्यां तैरन्वितः शिवो जीवो निष्कञ्चुकः परमशिवस्वविमर्शः पुरुषार्थो वर्णात्मका नित्याः ।

End :

एकदिवसस्य जपसङ्ख्या द्वादशोत्तरषट्शतानि आवृत्तिरेका भवति । परिवर्तिजपसङ्ख्या द्विशताधिकैकषष्टिसहस्रसङ्ख्या ।

वाराश्च घटिका चैव दिननित्या ततः परम् ।
वर्षमासयुगश्चैव परिवर्तिरिति क्रमात् ॥
इति अष्टाङ्गनामानि ।

Colophon :

परशुरामसूत्रं संपूर्णम् ।

472

Sl. No. 49556 परागमः **Ms. No. B. 785**

Beginning :

अथ पराख्यतन्त्रं प्रारभ्यते

प्रकाशं स्वपरार्थज्ञं दृष्ट्वा गङ्गा समेलनम् ।
अर्हः संपृष्टवान् ज्ञानं प्रतोदः प्रणतः परम् ॥

भगवन् यत्परं ज्ञानं ब्रूहि मे बन्धमोचकम् ।
एवमुक्तः स तेनाह नत्वा सोमं स्फुटं वचः ॥

End :

चतुर्भिरथ माणिक्यैर्वस्तुरत्नमुसंचयैः ।
विद्यापादः समाख्यातो ममापूर्णेन्दुमौलिना ॥

सम्प्रत्येष विचार्य्येतमुक्त्याह्वः पदार्थोऽखिलः ।
समन्त्रविषयश्चैव वर्णयिष्ये क्रियाक्रमम् ॥

मन्त्रे धानं निखिलं विधेयं
यत्तदुक्तं निजलक्षणं यत् ।
तेनात्र तन्निश्चितमल्पचित्तं
भवेन्नृणां भावविशुद्धिहेतुः ॥

Colophon :

इति पराख्ये महातन्त्रे मन्त्रविचारणपदार्थप्रतिपादनपटलः षष्ठः समाप्तः ।
विद्यापादः समाप्तमासीत् ।

473

Sl. No. 49559 **परान्यासविधिः** **Ms. No. P. 5002/63**

Beginning :

अथ परान्यासः—

शिरसि अधोमुखस्थितसहस्रदलकमलकर्णिकामध्यगतपूर्णशशिबिम्बे शृङ्गादिमनुसृत्यआधारचतुर्दलकमले पूर्ववत्शृङ्गादि विभाव्य हार्दकलारूपवह्नि कुण्डलिनीलिङ्गाकारतया ।

End :

समुल्लास्य अमृतानलकुण्डलिन्योः मिथोमर्दनसम्भूतारुणामृतसारैः तुर्यं स्मारं स्मारमान्मानं आसिञ्चेत् । अत्र शृङ्गादिमितित्रिकोणमित्यर्थः । हार्दकोणमिति त्रिकोणमेव ॥

Colophon :

इति परान्यासः । शिवम्

474

Sl. No. 49561 **परापद्धतिः** **Ms. No. P. 3394/I**

Beginning :

श्रीमते रघुनाथेन्द्रयोगिने परमात्मने ।
रक्तशुक्लप्रभामिश्रतेजसे ब्रह्मणे नमः ॥

या देवी सर्वभूतेषु व्यक्तिरूपेण संस्थिता ।
तां नमामि महादेवीं प्रश्नमामात्मरूपिणीम् ॥

श्रीगुरु .... वटुकं शिवमच्युतम् ।
ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वन्दे विभूतये ॥

End :

प्रणम्य मूलविद्याद्वितीयकूटेन निर्माल्यं शिरसि स्थितम् ।
मूलेन चरणोदकं स्वीकृत्य भक्तेभ्योऽपि दत्त्वा आत्मानं
कमलारूपं ध्यायन् यथा सुखं विहरेदिति ॥

Colophon :

श्रीपरमहंसपरिव्राजकाचार्यश्रीमद्रघुनाथेन्द्रपादशिष्यबालरामविरचिता परापद्धतिः समाप्ता ॥

475

Sl. No. 49566 **पराबीजमन्त्रन्यासक्रमः** **Ms. No. P. 7982/47**

Beginning :

श्री वागीश्वर्यै नमः ॥

नाभ्यादिपादपर्यन्तं गलादानाभि चापरम् ।
मूर्धादिगलपर्यन्तं त्र्यक्षरीं विन्यसेत्क्रमात् ॥ १ ॥

दक्षपाणितले चैव वामपाणितलेन हि ।
उभयोः सम्पुटे विद्यां त्रिबीजं विन्यसेत्प्रिये ॥ २ ॥

End :

अङ्गुलीषु पुनर्देवि बाणान् कामांश्च विन्यसेत् ।
ललाटगलहृन्नाभिमूलाधारेषु विन्यसेत् ॥

मूलेन व्यापकं कृत्वा प्राणायामं समाचरेत् ॥

Colophon :

—श्रीः—

476

Sl. No. 49580 **पश्यन्तीन्यासविधिः** **Ms. No. P. 5002/64**

Beginning :

अथ पश्यन्तीन्यासः —

शिरश्शिखाग्रं त्रिकोणं प्रकाशात्मानं विभाव्य तस्य वामरेखायां ऐं ह्रीं श्रीं वामायै नमः । ऐं ह्रीं श्रीं ज्येष्ठायै नमः । सिताद्यै नमः । इति न्यस्य तस्य पूर्वरेखायां अं अम्बिकायै नमः ।

End :

ज्ञानात्मिकायै नमः । क्रियात्मिकायै नमः । इति न्यस्य तस्य तक्षण-रेखायां ऐं ह्रीं श्रीं शान्त्यै नमः । हकारात्मिकायै नमः । अहकारसकारा-त्मिकायै नमः ॥

Colophon :

इति पश्यन्तीन्यासः ॥ शिवम् ॥

477

Sl. No. 49581 **पश्चिमाम्नायः** **Ms. No. P. 4197/5**

Beginning :

लोपामुद्रा तु पूर्वस्याद्द्वितीयं तु वनेश्वरी ।
अन्नपूर्णा तृतीयस्याः तथा कामकला भवेत् ॥

पञ्चमी पादुका ज्ञेया स्थिता जालन्धपीठिका ।
दूत्यादि चतुष्षष्टि सिद्धानां त्रिहस्तकम् ॥

आम्नायं पश्चिमं वन्दे सर्वदा सर्वकामदम् ॥

अस्य श्री लोपामुद्रामन्त्रस्य आनन्दभैरवऋषिः । गायत्री छन्दः । लोपामुद्रा देवता । ह्रीं बीजम् । ऐं शक्तिः । क्लीं कीलकम् । लोपामुद्रा-प्रसादसिद्ध्यर्थे जपे विनियोगः + +

\+ + + +

End :

ओं ऐं क्लीं सौः रं अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यः सर्वशर्वेभ्यो + भ्यः । मकाररूपाय संहारकर्त्रे रुद्राय नमः ।

Colophon :

इति पश्चिमाम्नायः ।

478

Sl. No. 49587 पादुकाक्रमः **Ms. No. C. 2522/3c**

Beginning :

स्वेष्टदेवगुरुप्राज्ञवनिता पूजनोत्सुकः ।
सर्वाहंभावसंयुक्तो निर्द्वन्द्वो नियतव्रतः ॥
अलोलुपोऽहिंसकश्चाविद्धपातविचक्षणः ।
इत्यादिलक्षणोपेतश्श्रीगुरुः कथितः प्रिये ॥

End :

यो गुरुस्थानकं प्राहः पादुकापरिसङ्ख्यया ।
गुरुवत्स तु मन्तव्यो ज्येष्ठैर्वन्द्यो न च प्रिये ॥

इति ते कथितं किञ्चित्पादुकाचारलक्षणम् ।
समासेन कुलेशानि किं भूयः श्रोतुमिच्छसि ॥

Colophon :

इति श्रीकुलार्णवे महारहस्ये पादुकादिक्रमं नाम द्वादशोल्लासः ।

479

Sl. No. 49596 पाशुपतास्त्रम् **Ms. No. P. 3972/3**

Beginning :

तारोपान्ता धरासंस्थो वामनेत्रेन्दुभूषितः ।
पार्श्वो × कर्णयुतो वर्मास्त्रान्तः षडक्षरः ॥

मनुपाशुपदास्त्राख्यो ग्रहक्षुद्रविनाशनः ।
षड्भिर्वर्णैः षडङ्गानि हुंफडन्तैः सजातिभिः ॥

End :

सर्वसम्पत्प्रदं नित्यं सर्वसौभाग्यदायकम् ।
रक्षाकरं गहार्तानां राज्ञां विजयवर्धनम् ॥

आपदुद्धारणादस्मात् आपदुद्धारणक्षमः ।
तन्त्रेषु नास्ति मन्त्रोऽस्य इत्याहुर्मन्त्रवेदिनः ॥

Colophon :

480

Sl. No. 49597 **पाशुपतास्त्रविधिः** Ms. No. P. 4868/29

Beginning :

नानाप्रयोगोपसंहारः कृत्यादिनानाप्रयोगनानाक्षुद्रविद्याप्रयोगतन्तुपञ्चभूतोच्चाटनादिसकलरोगपरिहारमन्त्रं पाशुपतास्त्रम् ।। अस्य श्री पाशुपतास्त्रमन्त्रस्य ब्रह्मा ऋषिः । गायत्रीच्छन्दः पशुपतिश्री महारुद्रादेवता ।

End :

सर्वतन्त्रप्रयोगसंहारकरणाय ओं ह्रीं मम शत्रुसंहरणाय बडवानलसमानतेजोविभवाय ओं श्रीरामाय ओं ह्रां ह्रीं ह्रूं श्रीं क्लीं मम शत्रून् खेखे हुं फट्र स्वाहा । नामगर्भितम्रमुकनामपूर्वकं जपं कुर्यात् ॥ सिद्धिः ॥

Colophon :

481

Sl. No. 49599 **पिशाचबन्धनमन्त्रविधिः** Ms. No. P. 3902/8

Beginning :

पिशाचबन्धनमन्त्रः ।।

ओं नमः चण्डक्रोधाय रुद्राय तुरूं तुरूं भूतसमये तिष्ठ स्वाहा । ठः ठः तेन मन्त्रेण शिखां बद्धा तिष्ठन्ति सलये ग्रहाः समस्ता अप्येवं ग्रहग्रस्तात् केशात् संमन्त्र्यबन्धयेत् ॥

End :

ग्रहानात्तममित्यजन्ति । रक्ताम्बरमधुमधूकवाचा पिशाचीमपि देवदाळीबन्धे

च्चतुर्ग्रहाण्डनसाजमूत्रम् । वाताग्नि चास्युः ग्रहनिग्रहाय ।।

Colophon :

हरिः ओम्

482

Sl. No. 49600 **पिशाचाकर्षणमन्त्रः** **Ms. No. C. 4308/26**

Beginning :

ಆಕರ್ಷಣ ಪಿಶಾಚಕ್ಕೆ—ಶಿರಿಯುಂ ಕಿಲಿಹಿರಿಯುಂ ಕಿರಿಯುಂ ವಗಯುವದೆ
ಅಂಜನಾದೇವಿ ಪುತ್ತ್ರರ ಅನುಮನ್ತ್ರ ಆದೇಶಿ ಆದೇಶಿ—

End :

ಶೀಘ್ರಂ ಶೀಘ್ರವಾಕರ್ಷಯ ಆಕರ್ಷಯ ಹುಂ ಫಟ್ ಸ್ವಾಹಾ ಮೋಲಾನಿ ಸಾಲ
ಗಂಟೆನಲ್ಲಿ ವಗಯುದ್ದೆ ಅಂಜನಾದೇವಿಪುತ್ರ ಹನುಮಂತ ಆವರಣಸಾಧ್ಯ ।

Colophon :

483

Sl. No. 49606 **पीठक्षेत्रागमाम्नायाचारनिर्णयः** **Ms. No. P. 8714/39**

Beginning :

यदि चेदीक्षितो ज्येष्ठः कुलपूविवर्जितः ।
तत्कनिष्ठकमज्ञस्तेचेन पूजां समारभेत् ।।

+कदाचिन्न वक्तव्यं इत्याज्ञा परमेश्वरि ।
पीठक्षेत्रागमाम्नायकथिताचारकौलिकान् ॥

End :

चन्द्रमूर्ध्वाकारेण केतुना योजयेत् । कुजमण्डलेन योजयेत् । बुधं राहुणा योजयेत् । एवं कृते त्रयश्चत्वारिंशत्कोणा भवन्ति । आहत्य त्रयश्चत्वारिंशदस्त्राणि भवन्ति । एकादशाङ्गुलवृत्तमध्ये अष्टादश दलानि रचयेत् । नवाङ्गुलवृत्तमध्ये षोडशदलानि रचयेत् ॥ एवं कृते बिन्दुत्रिकोण इत्यादिश्लोकोक्तलक्षणं चक्रं भवति ॥

Colophon :

484

Sl. No. 49611 **पुरश्चरणविधिः** **Ms. No. P. 4252/19**

Beginning :

श्रीशिवः—

अथाचारविधिं वक्ष्ये साधकानां वरानने ।
ब्राह्मे मुहूर्ते चोत्थाय प्रणम्य गुरुमात्मनः ॥
शरभेशाष्टकं मन्त्रं त्रिवारं मनसा स्मरन् ।
नमस्कृत्य ततो मन्त्र गणेशं शरभेश्वरम् ॥

End :

भूतप्रेतपिशाचानां किमु सर्वग्रहादिना ।
नराणामितराणां च जङ्गमानां वरानने ॥

आलेख्यात्तिर्यगूर्ध्वं वारसम....साध्यशक्ति कशवयलिपितापा ये निग्रहाय ॥

Colophon :

इति श्रीमहाशैवतन्त्रे पुरश्चरणविधिः चतुर्विंशोऽध्यायः ।

485

Sl. No. 49616 पुरुषसूक्तपूजाविधिः **Ms. No. P. 10053/41**

Beginning :

अथ पुरुषसूक्तपूजाविधिः ।

आद्ययावहयेद्देवमृचा तु पुरुषोत्तमम् ।
द्वितीययासनं दद्यात् पाद्यं चैव तृतीयया ॥
चतुर्थ्यार्ध्यं प्रदातव्यं पञ्चम्याचमनीयकम् ।
षष्ठ्या स्नानं प्रकुर्वीत सप्तम्या वस्त्रमेव च ॥

\+ \+ \+ \+

End :

दशम्या पुष्पदानं स्यादेकादश्या च धूपकम् ।
द्वादश्या च तथा दीपं त्रयोदश्या चरुं तथा ॥
चतुर्दश्याञ्जलिं कृत्वा पञ्चदश्या प्रदक्षिणम् ।
षोडश्योद्वासनं कुर्यात् शेषकर्माणि पूर्ववत् ॥

Colophon :

एवं पुरुषसूक्त(पूजा)विधिः समाप्तः ।

486

Sl. No. 49618 **पुरुषसूक्तयन्त्रप्रकारः** **Ms. No. P. 2347/11**

Beginning :

षट्—कोणकर्णिकामध्ये तारं साध्यसमन्वितम् ।
सुदर्शनषडर्णञ्च षट्—कोणेषु च सिद्धिषु ॥
तदङ्गानि चतुष्पत्रे केसरेषु क्रमेण च ।
गोपालकचतुर्वर्णं मन्त्रस्यैकैकमक्षरम् ॥

End :

हैयङ्गवीने प्रविलिख्य यन्त्रं
त्रिवारमेकं परिमृज्य यन्त्रम् ।
या प्राशयेत्सा वनिता शुभाङ्गी
पुत्रं प्रसूते सकलागमज्ञम् ॥

Colophon :

इति पुरुषसूक्तयन्त्रप्रकारः ।

487

Sl. No. 49622 **पुलिन्दिनीमन्त्रविधिः** **Ms. No. P. 4461/57**

Beginning :

अस्य श्री पुलिन्दिनीमन्त्रस्य शङ्कर ऋषिः । गायत्री छन्दः । पुलिन्दिनी देवता । ईं बीजम् । स्वाहा शक्तिः । पुलिन्दिनीप्रसादे (विनियोगः) ह्रीं हृदीत्याद्यङ्गानि । ध्यानम्—

End :

बर्हापीडकचारामचिकुरां बिम्बोज्ज्वलच्चन्द्रिकां
गुञ्जाहारलतांशुविलसद्ग्रीवामधीरेक्षणाम् ।
माकन्दभ्रमपल्लवारुणपटां पूर्णेन्दुबिम्बाननां
देवीं दिव्यमयीं प्रसन्नहृदयां ध्यायेत्किराताम्बिकाम् ॥

ओं नमो भगवति शारदादेव्यागच्छ आगच्छ कन्तुकं कार्यं मे सत्यं ब्रूहि ब्रूहि पुलिन्दिनि ऐं क्लीं सां ईं स्वाहा ।

कार्याकार्यविवेकार्थं नित्यमष्टोत्तरं शतम् ।
जप्त्वा शयीत यस्तस्य स्वप्ने भवति साम्बिका ॥
साधकस्तद्वचः कृत्वा तथैवान्वहमाचरेत् ।
तस्य नास्ति भयं क्वापि सार्वकालं सुखी भवेत् ॥

Colophon :

488

Sl. No. 49632 **पूर्वाम्नायगुरुसारः** **Ms. No. P. 5002/19**

Beginning :

अथ पूर्वाम्नायगुरुपारम्पर्यक्रमः ॥

कर्तव्या पादुका पूर्वं चरणं तदनन्तरम् ।
पञ्चाम्बा नवनाथाश्च मूलविद्याश्च षोडश ॥

आधारविद्यापद्मं च पुनरङ्घ्रिरयं क्रमः ॥

नमश्शिवाय दक्षिणामूर्तिश्रीपादुकां पूजयामि ॥

End :

निर्मलानन्दयोगीशो गन्धानन्दः ततः परम् ।
चिद्रूपानन्दयोगीशो नाथानन्दः ततः परम् ॥

विलासानन्दयोगीशो विश्वानन्दगुरुस्तथा ।
×××× प्रणमामि पुनः पुनः ॥

Colophon :

॥ हरिः ओम् ॥

489

Sl. No. 49637 **प्रणवकल्पः** **Ms. No. P. 3715/2**

Beginning :

× × × × × × × णानां गणनायकम् ।
भजेऽहं विघ्नराजं तं विघ्नहन्तारमव्ययम् ॥

× त्रान्ते नैमिशारण्ये सुमते × × य्य × × × याः ।
मन्त्रान् प्रसञ्जयन् तत्र शौनकः प्रत्यभाषत ॥

शौनक उवाच—

सूत सूत महाप्रा × व्यासशिष्य महामते ।
श्रुता × × × × संसिद्धमन्त्रा गोप्याश्च सकथाः ॥

End :

सूत उवाच––

इतीदं प्रणवस्यास्य ××× साहस्रमीरितम् ।
कृत ××× यज्ञानां सन्ततेः परिपूर्तये ।।
लब्धये(?) सर्वकामानां निग्रहानुग्रहे कृते ।
इतीदं प्रणवस्यास्य नाम्नां ×××× तम् ।।
लब्ध × य सर्वतपसा वेदानां सर्वदाप्तये ।

Colophon :

इति श्रीमत्स्कान्दे महापुराणे तृतीयसंहितायां मन्त्रप्रस्तारे प्रणवकल्पे ××××× ध्यायः ।

490

Sl. No. 49638 प्रणवकल्पः **Ms. No. P. 6866/37**

Beginning :

समिच्चर्वाज्यकान् हुत्वाश्रमे पुरुषसूक्ततः ।
सर्वेषामभयं दत्वा विरक्तः प्रव्रजेद्धरिः ।। १ ।।

श्रुत्वा भागवते शुद्धमाचार्यं शरणं व्रजेत् ।
×× धीहि भगवन् ब्रह्म तस्मै ब्रूयाद्गुरुः परम् ।। २ ।।

End :

श्रृणुष्व वैष्णवं शास्त्रं सदा वेदार्थतत्त्वतः ।
वेदान् मन्त्रानुपनिषत्संहितान् सर्वदा श्रृणु ।। २२ ।।

××××× पञ्चरात्रं तथैव च ।
तत्त्वार्थान् ब्रह्मसूत्रैश्च समे निर्णयतस्त्वतः ।।
विष्णोः सर्वोत्तमत्वं तु सर्वदा प्रतिपादय ।।

Colophon :

इति श्रीमदानन्दतीर्थभगव ××× प्रणवकल्पः समाप्तः ।

491

Sl. No. 49647 प्रणवविवरणम् **Ms. No. P. 5951/41**

Beginning :

अकारः पृथिवीं प्राचीम्
गुरुपीतद्विजो मुखम् ।
बली तु कुक्कुटः शत्रुः
दस्राष्पड्भिश्चतुर्बलम् ।।

....

उकारोऽग्निः प्रतिच्यश्च—

End :

सदाशिवश्चित्राकाशे ।।
ईश्वरश्चित्रमाकाशे पूर्णो वस्वादिपञ्चकम् ।
मृगकुम्भं मूलधातुभूतं मायूरकं गुणाः ।। ५ ।।

Colophon :

492

Sl. No. 49649 **प्रतिक्रियाशूलिनीमहामन्त्रः** **Ms. No. P. 7550/30**

Beginning :

अस्य श्री प्रतिक्रियाशूलिनीदुर्गामहामन्त्रस्य ब्रह्मा ऋषिः । गायत्री छन्दः । प्रतिक्रियाशूलिनी दुर्गा देवता । उं बीजम् । स्वाहा शक्तिः । ह्रीं कीलकं समस्तभयनिवारणार्थे जपे विनियोगः ।

End :

ध्यानम्—

अध्यारूढां मृगेन्द्रं सजलधरं श्यामलां पद्महस्तैः
शूलं पाशं कृपाणं त्वरिजलजगदाचापबाणान्वहन्तीम् ।
चन्द्राचूडां त्रिनेत्रां चतसृभिः खड्गखेडान्विताभिः
कन्याभिः सेव्यमानां प्रतिभटभयदां शूलिनीं भावयामि ।
पञ्चपूजा ।

Colophon :

493

Sl. No. 49652 **प्रतिप्रयोगरुद्रामहामन्त्रविधिः** **Ms. No. P. 4868/26**

Beginning :

अस्य श्री प्रतिप्रयोगरुद्रमहामन्त्रस्य दूर्वासभगवान् ऋषिः । अनुष्टुप् छन्दः । प्रतिप्रयोगरुद्रो देवता । ह्रां बीजम् । ह्रीं शक्तिः । ह्रूं कीलकं । मम प्रतिप्रयोगप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

र्या लागुप्रयोगमनि शान्तिशेयमच्छिदि । तेसिशेदि र्या विघ्नंकरिकि चप्पुरादुता चप्पवलशिन कालमंदु प्रमाणपूर्वकं ॥ चेप्पवलशिनदि ॥ ....कूप्पडदु ॥

Colophon :

॥ श्रीः ॥

494

Sl. No. 49657 प्रत्यङ्गिरसकल्पः **Ms. No. C. 3498/3**

Beginning :

अथ प्रत्यृचप्रयोगो लिख्यते—प्रथमवर्गस्यप्रथमस्याङ्गिरा ऋषिः । अनुष्टुप्छन्दः । उग्रकृत्या देवता । यांकल्पयन्तीति कृष्णाष्टमीसमारभ्य .... पर्यन्तं औदुम्बरदण्डं धारयन्...

End :

आत्मसंरक्षणार्थं जातवेदसं गायत्रीं सम्पुटीकृत्य नित्यमष्टविंशतिवारं जपेत् सर्वशान्तिर्भवति । गायत्र्या सम्पुटीकृत्य तच्छंयोरिति शान्ति जपेत् त्रिः ॥

सर्वशान्तिर्भवति ॥

Colophon :

इति प्रत्यङ्गिराकल्पविधिः समाप्तः ।

495

Sl. No. 49661 प्रत्यङ्गिराकल्पः **Ms. No. P. 3591/4**

Beginning :

अथातस्संप्रवक्ष्यामि सर्वसिद्धिकरं परम् ।
उपसितजनानां तत्सर्वोपद्रवनाशनम् ॥

अथातः प्रत्यङ्गिराकल्पं व्याख्यास्यामः...पूर्वमेव शरीरशोधनार्थं प्राजापत्यव्रतं चरित्वा कृतपुरश्चरणो भवति—

End :

इति विलिख्य प्राणप्रतिष्ठां कृत्वा ततः भूमौ निखनेत् । कृमिकीटशलभमूषिकोच्चाटनं भवति ॥ इन्द्र एद्रुदुले रुमिरुक्कुं वरिमून्नुं....मात्रकैथिलिरुन्दुदु ॥

Colophon :

—श्रीः—

496

Sl. No. 49667 प्रत्यङ्गीराकल्पः **Ms. No. P. 4527/3**

Beginning :

एवंगुणेत्यादि शुभतिथौ मम मनसाभीष्टसिध्यर्थं प्रत्यङ्गिराभगवतीमुद्दिश्य प्रत्यङ्गिराभगवतीप्रीत्यर्थं आग्नेयास्त्रब्रह्मास्त्रसहितप्रत्यङ्गिरासूक्तमन्त्रजपं करिष्ये इति ।

End :

ओं नमो भगवती माहेश्वरी । ओं ह्रीं श्रीं कल्पालते महाभीष्टफलं देहि प्रतिकूलं ममे मस्तु । ओं नमो देव्या च विद्महे विष्णुपत्न्या च धीमहि । तन्नो लक्ष्मिः प्रचोदयात् । ओं श्रीं ह्रीं ब्रह्मकोशिनी मां रक्ष रक्ष हुं फट् स्वाहा ।

Colophon :

497

Sl. No. 49675 प्रत्यङ्गिराकवचम् **Ms. No. C. 3499/2**

Beginning :

देव्युवाच—

देवदेव महादेव सर्वज्ञ करुणानिधे ।
प्रत्यङ्गिरायाः कवचं × ऋचां च प्रयोगकम् ।।

जगन्मङ्गलकं नाम प्रसिद्धि भुवनत्रये ।
शत्रुमारणकार्येषु कृत्रिमादिभयेषु च ।।

End :

इदं रहस्यं देवेशि यन्त्रमुक्तं त्वयानघे ।
सर्वशान्तिस्तवं जप्यं अन्ते सर्वत्र शान्तिदम् ।

शिष्याय गुरुभक्ताय वक्तव्यं नान्यमेव हि ।
निकुंभिलामिन्द्रजिता कृतं जयविवृद्धये ।।

Colophon :

॥ श्रीः ॥

498

Sl. No. 49677 प्रत्यङ्गिरादण्डकम् **Ms. No. C. 3522**

Beginning :

जय प्रत्यङ्गिरे देवि जय दुर्वैरिभक्षिणि ।
जय जीमूतसंघाते जय भक्तौघरक्षिणि ॥
जय भगवति भद्रकालि मात-
र्जय शरणागतरक्षणात्तदीक्षे ।
जय सुररिपुभीकरस्वभावे
जय निगमागमसंस्तुतप्रभात्रे ॥

End :

चरन्ती प्राचीने वचनविपिने भावगहने
स्फुरन्ती चिज्ज्योतिर्विशदमुनिहृत्कन्दरपदे ।
हरत्यन्तश्शत्रुद्विपकुलमदं संसृतिवनी-
दरं तीव्रं सा मे परिहरतु पञ्चास्यदयिता ॥

Colophon :

499

Sl. No. 49683 प्रत्यङ्गीरानित्यपूजाविधिः **Ms. No. P. 8755/9**

Beginning :

श्रीशिवः—

अथातः सम्प्रवक्ष्यामि नित्यपूजाविधिं प्रिये ।
येव विज्ञानमात्रेण चरत्यमरवत्सुखम् ॥ १ ॥

ब्राह्मे मूहूर्ते चोत्थाय देवताध्यानपूर्वकम् ।
विण्मूत्रोत्सर्जनं कृत्वा मौनी तीरं समागतः ॥ २ ॥

End :

प्रत्यङ्गिरे महादेवि सर्वशत्रुविनाशिनि ।
त्वदुपासनमात्रेण सर्वारिष्टान्विनाशय ॥ ३५ ॥

इति प्रार्थ्य महाकृत्यां ततः पूजां समारभेत् ॥

Colophon :

इत्यथर्वणशिरसि एकादशः पटलः । (होसलकर्णाटक आत्रेयगोत्रोत्पन्न महीशूरपुरवास्तव्य वेङ्कटनारायणेन लिखितं स्वार्थं परार्थं च ।)

500

Sl. No. 49689 प्रत्यङ्गिरापूजाविधानम् **Ms. No. A. 587/2**

Beginning :

ब्रह्मलोके सुखासीनं सर्वलोकगुरुं शिवम् ।
सर्वतेजोमयं साक्षात् भक्तानुग्रहकारणम् ॥
सर्वविद्याकरं देवं ज्ञानोपायार्णवं पदम् ।

प्रणम्य सर्वदेवस्तु ऋषयस्सत्रमासत ॥
वसिष्ठो वामदेवश्च जाबाली कपिलस्तथा ॥

End :

पुष्पाक्षतयुतैः श्वेतैः दशांशं द्विजसत्तमाः ।
एवं जपे कृते होमे तर्पणे च यथाविधि ॥
सर्वारिष्टं तरत्येव दद्याद्दानं च दक्षिणाम् ।
गोभूहिरण्यदानानि दश दानानि चैव च ॥
अरिष्टपरिहाराय सर्वमेतत्समाचरेत् ।
इत्येतत्सर्वमाख्यातं अथर्वणविधिक्रमः ॥

Colophon :

इति ब्रह्मागस्त्यसंवादे निकुम्भिलायाग़कल्पे ब्रह्मणोक्तः प्रत्यङ्गिरापूजाविधिः समाप्तः ।

501

Sl. No. 49704 **प्रत्यङ्गिरामन्त्रविधिः** **Ms. No. C. 3494/25**

Beginning :

अस्य श्री प्रत्यङ्गिरामहामन्त्रस्य ब्रह्मा ऋषिः । गायत्रीछन्दः । श्रीब्रह्मप्रत्यङ्गिरा-देवता । क्षं बीजम् । ह्रीं शक्तिः । फट् कीलकम् । श्रीब्रह्मप्रत्यङ्गिराप्रसाद-सिद्ध्यर्थे जपे विनियोगः ।

End :

यां कल्पयन्ति नोऽरयः क्रूरां कृत्यां वधूमिव ।
तां ब्रह्मणापनिर्णुद्मः प्रत्यक्कर्तारमृच्छतु ॥

इति ऋद्‌मूलमन्त्रजपः । प्रत्यङ्गिरायै च विद्महेब्रह्मपुत्र्यैचधीमहि । तन्नो ब्राह्मी प्रचोदयात् । न्यासध्यानं पूर्ववत् गुह्येति च समर्पणम् ॥

Colophon :

इति प्रत्यङ्गिरामन्त्रविधिः ।

502

Sl. No. 49713 प्रत्यङ्गिरामहामन्त्रः **Ms. No. C. 696/34A**

Beginning :

अस्य श्रीप्रत्यङ्गिरामहामन्त्रस्य ब्रह्मा ऋषिः । अनुष्टुप् कालाग्निरुद्रः महादेवो देवता । क्लीं बीजम् । फट्शक्तिः । ह्रूं + कम् । प्रत्यङ्गिराप्रसादसिद्ध्यर्थे जपे विनियोगः +

+ देवीं षोडशशूलयुक्तसदृशामारक्तनेत्रोद्‌बुदां
सामद्भैरवतोषणीं त्रिनयनामव्यग्रहस्ताम्बुजाम् ।
भद्राङ्गीमरुणानुलेपवसनां सिंहाधिरूढां शुभां
दंष्ट्राकोटिविशङ्कवस्यकुहरामम्बां भवानीं भजे ॥

End :

बिभ्राणं रक्षहस्तैरभयवरयुतैर्वामहस्तैश्च नागं
लीलाब्जं चाक्षसूत्रं सुललितडमरुं बीजपूरं क्रमेण ।
द्वात्रिंशल्लक्षणढ्यं स्मितमुखरुचिरं भ्राजमानं युवानं
पूज्यं पद्मासनस्थं त्रिजगदभिमतं प्राप्तबीज महेशम् ॥ १ ॥

Colophon :

503

Sl. No. 49718 प्रत्याङ्गिरामालामन्त्रः Ms. No. C. 696/34c

Beginning :

अस्य श्री प्रत्यङ्गिरामालामन्त्रस्य आङ्गिरस ऋषिः । अनुष्टुप् छन्दः । उग्रकृत्या प्रत्यङ्गिरा देवता । क्रों बीजम् । ज्ञां शक्तिः । प्रत्यङ्गिरा कीलकम् । ह्रामित्यादिषडङ्गन्यासः । सिंहमित्यादि ध्यानम् ।

End :

दशकृत्वा जपेत्प्रातः सर्वाभीष्टफलं लभेत् ।
प्रत्यङ्गिरसहस्रं तु एकवारं तु मालया ॥
प्रजपेत्सर्वकामानां लभते नात्र संशयः ।
यं यं कामं समुद्दिश्य तं तमाप्नोति तत्क्षणात् ॥

Colophon :

इति अथर्वणके प्रत्यङ्गिरामालामन्त्रः समाप्तः ।

504

Sl. No. 49719 प्रत्याङ्गिरामालामन्त्रः Ms. No. P. 4538/24

Beginning :

अस्य श्री प्रत्यङ्गिरामालामन्त्रस्य । अङ्गिरा ऋषिः । अनुष्टुप् छन्दः । प्रत्यङ्गिरा देवता । ह्रां बीजम् । फट् शक्तिः । हुं कीलकम् । प्रत्यङ्गिरा-प्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

समस्तशत्रुरुधिरपानोन्मत्ता चर्म शिवाम् ।

वरप्रयुक्तकर्मघ्नीं वरराष्ट्रप्रदायिनी ॥

एवं ध्यात्वा महाकृत्यां जपेन्मन्त्रं यथाविधिम् ।
शतमादौ शतं चान्ते जपेन्मन्त्रमथर्वणम् ॥

Colophon :

—श्रीः—

505

Sl. No. 49724 प्रत्यङ्गिरामालामन्त्रविधिः **Ms. No. P. 3897/14**

Beginning :

प्रत्यङ्गिरामालामन्त्रम् —

अस्य श्री अथर्वणभद्रकाली प्रयाङ्गिरामालामन्त्रस्य अघोर ऋषिः । अनुष्टुप् छन्दः । अथर्वण + देवता । श्रीं बीजं ह्रीं शक्तिः । देवीवाक्कीलकम् मम सर्वशत्रुपलायनार्थे जपे विनियोगः ॥

End :

मयि प्रसीद प्रसीद । तुभ्यं नमः । ओं ऐं हः क्लीं हुं सं ह्रां ह्रीं ह्रूं जम्भय । जम्भय । मोहय । नाशय क्ष्म्रौं रों श्रीं हुं फट् प्रत्यङ्गिरसे स्वाहा ॥

हरिः ओम्

Colophon :

इति प्रत्यङ्गिरामालामन्त्रं सम्पूर्णम्

506

Sl. No. 49726 प्रत्यङ्गिरामन्त्रयन्त्रविधिः Ms. No. C. 696/34d

Beginning :

ओं नमः प्रत्यङ्गिरे महादेवि सहस्रकोटिकरवाहिनी सहस्रसिंहवाहिनी ऊर्ध्वकेशिनी नररुधिरमांसभोजिनी मम वैरिप्राणापहारिणी कोटिब्रह्माण्डपराक्रमी परिविद्यादिभेदिनी परमन्त्रपरयन्त्रपरतन्त्रप्रभञ्जनी + भूमन्दिरं लिख्य तद्बहिर्भूग्रहं पुनः अधर्भूकोणेषु बाह्यं कोणान्तिकक्रमात् ।

End :

निम्बबीजसमुद्भूते तैलेनालिप्य मन्त्रवित् ।
दीपे सन्तापनं कुर्यां जपेदष्टोत्तरं शतम् ॥

कृष्णाष्टमीं समारभ्य यावत्कृष्णचतुर्दशीम् ।
ततः शत्रुकुलं नश्येत् म्रियते नात्र संशयः ॥
ततश्चोर्ध्वे ब्रह्मादयोऽपि न शक्ताः ।

Colophon :

507

Sl. No. 49727 प्रत्यङ्गिरोमेलकस्तोत्रम् Ms. No. C. 3413/1

Beginning :

अस्य श्रीप्रत्यङ्गिरमन्त्रराजमहामन्त्रस्य । आङ्गिरस ऋषिः । अनुष्टुप् छन्दः । अथर्वणप्रत्यङ्गिरा देवता । क्षां बीजम् ह्रीं शक्तिः । नमः कीलकम् । प्रत्यङ्गिराप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

महाभयेषु घोरेषु न भयं विद्यते क्वचित् ।
सर्वक्षेमानवाप्नोति मर्त्यान् देवि न संशयः ॥

कूटस्थकुरुते दिक्षु विदिक्षुर्भजपञ्चकन् ।
कक्कारेण समोपेतं रक्षयेत्साधकोत्तमम् ॥

Colophon :

इति श्री चन्द्रशूलपाणिरचितं प्रत्यङ्गिरमेलकं स्तोत्रं सम्पूर्णम् ॥

508

Sl. No. 49728 **प्रत्यङ्गिरायन्त्रपूजाविधिः** **Ms. No. P. 3591/38**

Beginning :

अङ्गानि संप्रवक्ष्यामि विस्तरेण यथाक्रमम् ।
षट्कोणवृत्तयोर्मध्ये कुब्जिकामनुवेष्टयेत् ॥

महादिभैरवी चैव कालाग्निरुद्ररूपिणी ।

End :

आकारादिक्षकारान्तं प्रदक्षिण्यं यथाक्रमम् ।
यतेद्यन्त्रं महावीर्यं पू. × यन्त्रेतिनामकम् ॥
शिष्याय भक्तियुक्ताय वक्तव्यं नान्यमेव हि ॥

Colophon :

—पूजायन्त्रसमाप्तः—

509

Sl. No. 49734 प्रत्यङ्गिरावतारविषयः **Ms. No. C. 3866/2**

Beginning :

ईश्वर उवाच—

अथ प्रत्यङ्गिरादेव्याः अवतारं वदाम्यहम् ।
यस्य सन्तिर्वनादेव्याः उत्तरत्प्रत्यदक्षिणेत् ।। १ ।।?

देवाः तत्प्रभवं विशान्तिततवाः सापीरयन्तिग्रहः
शान्ति स्सानपापीरयन्ति मनुजान् गृह्णातिसो मुवुलं ।
भूवदी सहसा गृभन्तिरोगाः क्षयः
विघ्नो न प्रचरन्ति वैरिनि × × कुर्वन्ति नो वैरिणीम् ।।?

End :

ब्रह्मा वेत्ति हरिर्वेत्ति वेत्तिदेवः स शङ्करः ।
स्वयं भगवती वेत्ति अन्येनैव च नैव च ।।
गोपनीयं प्रयत्नेन जननीजारगर्भवत् ।। ४० ।।

Colophon :

इति श्रीरुद्रायामले वड्वामतन्त्रे उमामहेश्वरसंवादे प्रत्यङ्गिराअवतार-
विषयः समाप्तः ।।

510

Sl. No. 49739 प्रत्यङ्गिरासूक्तम् **Ms. No. C. 696/34B**

Beginning :

अस्य श्री प्रत्यङ्गिरासूक्तमहामन्त्रस्य अङ्गिरसप्रत्यङ्गिरसामृषिः । द्वात्रिंशद्दचावनुष्टुप् छन्दः । यएत्रिचः । पङ्क्तिः । अवब्रह्मेत्यादीनां षण्णां एकपदा गायत्री यो न इति त्रिष्टुप् । + +

श्रीं ह्रीं सिंहमुखीं सश्रीं भगवतः श्रीभैरवस्योल्लासत्
शूलस्थूलकपालपाशडमुरुव्यग्रद्दस्ताम्बुजाम् ।
(ह)द्दंष्ट्राकोटिविशङ्कटस्यकुहरामारक्तनेत्रत्रयीम्
बालेन्दूज्ज्वलमौलिकां भगवतीं प्रत्यङ्गिरां भावये ॥

End :

आवृत्तध्वं निवृत्तध्वं ऋतवः परिवत्सरम् ।
अहोरात्राश्च वेदाश्च त्वं दिशः प्रदिशश्च मे ॥ ४७ ॥

त्वमिन्द्रो यमं वरुणं सोममग्निरथानिलम् ।
अत्राहृत्य पशूंश्चैव तमुत्पादय चाद्भुतम् ॥ ४८ ॥

Colophon :

511

Sl. No. 49743 प्रत्यङ्गिरासूक्तभाष्यम् **Ms. No. P. 8755/11**

Beginning :

हरिः ओम् ।

यां कल्पयन्ति नोऽरयः
क्रूरां कृत्यां वधूमिव ।
तां ब्रह्मणा अपनिर्णुमः
प्रत्यंकर्तारमृच्छत् ॥
यां कल्पयन्तीत्यारभ्य कृत्यासूक्तं विदुर्बुधाः ।
टीकां तस्य महायोगी पिप्पलादश्चकार ह ॥ १ ॥

नः अस्माकं अरयः शत्रवः यां क्रूरां द्विपदचतुष्पदादि वियोगफलकां अस्मद्बन्धनादि व्यापारसमर्थां कृत्यां कल्पयन्ति + + +

End :

तत्राथर्वणिकाः + पञ्चऋङ्मिलित्वा एको मन्त्रः । एवमग्रेऽपि पञ्च-ऋङ्मिलित्वा एको मन्त्र इति । एवं प्रकारेण पञ्चचत्वारिंशदृचां नव मन्त्रा भवन्ति । ततः अव इनेति पादमात्रमेकादशो मन्त्र इति वदन्ति । एतासामपि छन्दांसि फलविनियोगश्च ततः प्रयोगपद्धतौ ज्ञेयः ॥

Colophon :

इति पैप्पलादकृतं प्रत्यङ्गिरासूक्तभाष्यम् ।
महीशूरुपुरस्थआत्रेयगोत्रोत्पन्नवेंकटरमणात्मजवेङ्कटनारायणेन लिखितमिदं प्रत्यङ्गिरासूक्तभाष्यं स्वार्थं परार्थं च ॥

512

Sl. No. 49746 **प्रत्यङ्गिरास्तोत्रम्** **Ms. No. P. 8755/2**

Beginning :

अस्य श्री अङ्गिरास्तोत्रमहामन्त्रस्य नारदभगवानृषिः । अनुष्टुप् छन्दः । प्रत्यङ्गिरा उग्रकृत्या देवता । क्रों बीजम् । फट् शक्तिः । ह्रीं कीलकम् ।

प्रत्यङ्गिराप्रीत्यर्थे विनियोगः । क्रामित्यादिन्यासः । + +

End :

रक्षणीया महाविद्या न देया यस्य कस्यचित् ।
इमां विद्यामधीयानः सुखीभवति नित्यतः ।।
सम्पूज्यः सर्वलोकेषु त्वत्प्रसादान्महेश्वरि ।
यश्चैनां पूजयेन्नित्यं स मे प्रियातमो भवेत् ॥
उत्तरन्यासः तच्छंयोः शान्तिः ।
सर्वं श्रीकृत्या? भगवती सुप्रीता वरदा भवतु ।।

Colophon :

इति श्री चामुण्डोग्रशूलपाणिविरचिते प्रत्यङ्गिरास्तोत्रं सम्पूर्णम् ।

513

Sl. No. 49749 **प्रत्यङ्गिरास्तोत्रमालामन्त्रः** **Ms. No. C. 3501/3**

Beginning :

